Sanskrit

Writings of European Scholars

Satya Vrat Shastri

.1

SANSKRIT WRITINGS
OF
EUROPEAN SCHOLARS

SANSKRIT WRITINGS
OF
EUROPEAN SCHOLARS

JÑĀNAPĪṬHA LAUREATE

Satya Vrat Shastri

HONORARY PROFESSOR, SPECIAL CENTRE FOR SANSKRIT STUDIES
JAWAHARLAL NEHRU UNIVERSITY

FORMERLY PROFESSOR AND HEAD, DEPARTMENT OF SANSKRIT
UNIVERSITY OF DELHI

EX-VICE-CHANCELLOR
SHRI JAGANNATH SANSKRIT UNIVERSITY, PURI (ORISSA)



VIJAYA BOOKS
Delhi

Published by :

VIJAYA BOOKS

1/10753, St. No. 3, Subhash Park,
Naveen Shahdara, Delhi-110 032,
Ph. : 22822514, 9910189445
Email : vijyabooks@gmail.com

First Edition : 2012

ISBN : 978-81-910948-3-1

Price : ₹ 395/-

Printed by :
Vikas Computer & Printers
Naveen Shahdara, Delhi-110032

PREFACE

Scholars from different countries of Europe have contributed significantly to Sanskrit studies. They have edited critically a large number of manuscripts and published them with translation and notes and introduction touching upon their date, their authorship and their place in the contemporary literature. They have produced works on the history of Sanskrit literature, compiled dictionaries, word indices and grammars. They have deciphered Sanskrit inscriptions and read the script on coins. They have studied and interpreted ancient texts and worked hard on deciding their relative chronology. Equipped in depth with the knowledge of European classical languages like Greek and Latin, they have traced similarities between the languages of Europe and Sanskrit and the myths in the same giving rise to the evolution of the sciences of Comparative Linguistics and Comparative Mythology.

I had been wondering all along if these scholars of Europe who were endowed with such thorough knowledge of Sanskrit as to be able to fully grasp the ancient idiom that helped them interpret even some of the most abstruse and intricate texts on a plethora of topics ranging from the Vedas, the Brāhmaṇas, the Upaniṣads, the Epics, the Purāṇas, the works on different sciences like astronomy, astrology, mathematics and medicine, philosophy and metaphysics, art and architecture and the vast corpus of poems, plays, fiction (Kathās, Ākhyāyikās and Campūs), and lexica, could write something in original in Sanskrit. No monograph comprising their Sanskrit compositions has come to my notice making it look like that they, with all their sound knowledge of Sanskrit, could not compose in it—probably they were not initiated into this; there being no tradition for it that could have induced them to go in for it; probably they did not practice writing in Sanskrit. Incidentally they are not alone in this. There have been till recently many Sanskritists even in India who, with all their massive scholarship and the mastery over the

language, could not write or speak in it, they not having practised it as a live idiom. But there were still some among them who could compose in it in an expression, chaste and chiselled. The same should be the situation even in Europe. There should be some scholars who could have been in a position to compose originally in Sanskrit. With this idea in view I started my search for their Sanskrit writings. I pursued my mission with all persistence and perseverance. And to my delight my efforts did not go in vain. I could lay my hand, thanks to the help provided by my European friends, on quite a few Sanskrit writings of European scholars in the form of letters, stray verses, memoria and translations. These I included in my write-up in Sanskrit titled *Vaideśikavidușāṁ Saṁskṛtaracanāḥ*, Sanskrit writings of foreign scholars, in Vol. V on Modern Sanskrit Literature of my seven-volume work *Discovery of Sanskrit Treasures.* Subsequent to its publication my esteemed friend Michael Hahn of Germany sent me an off-print of the *Yavanaśatakam,* a hundred wise sayings from the works of prominent Greek authors with their Sanskrit rendering in verse with their originals by the German scholar Carl Cappeller as also another collection of hundred and twenty verses of German poets by the same scholar (Carl Cappeller) under the title *Subhāṣitamālikā* with their Sanskrit rendering in verse again, this time with their originals. The writings in the *Discovery of Sanskrit Treasures* I am bringing out in the present monograph, the first of its kind, with the new material which includes, apart from the two works of Carl Cappeller referred to above, letters in Sanskrit written to the well-known Sanskrit scholar Nityananda Shastri of Kashmir by such stalwarts as Aurel Stein, A.W. Stratton and Jean Philippe Vogel, copies of which were furnished to me by my esteemed friend S.N. Pandita, the grandson of the great Shastri, as also a letter each written to the writer of these lines by Klaus Bruhn and Alois Payer of Germany, letters written to Bhagirath Prasad Tripathi 'Vagish Shastri' by one of his French pupils Philippe Vouin, a letter written to Radhavallabh Tripathi by Töttösi Casba of Hungary (given as Addendum having come to notice when the book had all been composed) and the essays and speeches of Maria Krzysztof Byrski and Filip Rucinski of Poland, Pierre-Sylvain of France, Miquel Peralta of Spain, Gianni Pelligrini of Italy and Måns Broo of Finland. For

proof correction I pretty often lean on my esteemed friend Satya Vrat Varma of Sri Ganganagar. The proofs of this monograph were also referred to him. He took great care to go through them and offered valuable suggestions. I am grateful to him for this.

I would consider my labours amply repaid if the present monograph helps dispel the notion that the European scholars were or are incapable of writing in original in Sanskrit. Some of them were and are as good creative writers in Sanskrit as they were and are good critics.

—Satya Vrat Shastri

Camp: Hotel Maharaja's Inn, Patna
28th December, 2009.

Sanskrit Writings of European Scholars

The tradition of Sankrit studies goes back in Europe to the past two centuries or so. A galaxy of scholars there have diligently pursued Sanskrit literature. They went in search for Sanskrit manuscripts, a good number of which they edited critically with detailed introductions and notes and translated in English and other European languages. They compiled dictionaries of Sanskrit, wrote its grammars and worked on the history of its literature. Countless studies of ancient India's literary wealth couched in Sanskrit they brought out in the form of books, monographs and articles that dot scores of research journals and magazines. Though having a thorough mastery over the Sanskrit language and literature, not many among them tried their hand at writing in Sanskrit. This is not unexpected; there being no tradition of speaking or writing in Sanskrit in Europe. However, some of them, have ventured into writing in Sanskrit showing thereby that had others like them applied their mind to it, they would have come out with beautiful compositions which could be the envy of any Sanskritist of India. It is to prove this the Sanskrit writings of those European scholars are taken up here for the information and the delight of their Indian counterparts.

Letters

There was a well-known scholar of Sanskrit of the name of Ernst Waldschmidt of Germany. He had learnt Sanskrit from his teacher Emil Sieg. On the latter's attaining the age of eighty, he sent his good wishes to him in Sanskrit verses in the Mandākrāntā metre, in the style of the *Meghadūta* of Kālidāsa, which read as follows :

पृच्छामि त्वां कुसुमरचने गन्धसौरभ्यमाले
दौत्यं हर्तुं स्मरणघटितं धन्यवादं भरन्मे।
गन्तव्यस्ते नगरविदितो धीमतामुत्तमाङ्ग

आग्नेयोक्तेर्विवरणकरो गस्तकौचेयभासः[1]।।
जातो वंशे विजयवचनात्प्राप्तकल्याणनाम्नि
विद्वान् यो मे गुरुरपि सखा विद्धि सोऽशीतिवर्षः।
आचार्यस्य प्रविश भवनं तस्य पत्नीप्रशिष्टं
गाढग्रन्थं वद सुमधुरं प्राज्ञ विज्ञं पठन्तम्।।
जिज्ञासूनां त्वमसि शरणं बुद्धिधारापयोद-
स्तर्कोपेतश्चतुरमनसा चारु निर्मुक्तशङ्कः।
आकाङ्क्षामो हृदि तव हितं तेन चोच्चैर्ह्वयामो
जीवेच्छ्रीमान् जयतु जयवान् वर्षनानाशतानि।।

There was a Sanskrit scholar of the name of Andrzej Gawroński of Poland. For years he held the position of the Director of the Oriental Institute of the University of Warsaw. Even up to this day he is admired by the Sanskritists of Poland for his deep knowledge of Sanskrit language and literature. It is said that once in his student days he went to Paris to attend a conference. A budding scholar, he occupied in the conference hall a back seat. While the proceedings were on, he, out of some inner urge composed a verse in Sanskrit which he showed to the one sitting next to him who passed it on to the one next to him. In this process the verse reached the Chairman who recited it from the dais. So charmed was he that he asked young Gawroński to occupy the chair for the rest of the session. What this verse was nobody knows. People in the Oriental Institute, Warsaw just speak about it. All efforts were made to trace it but to no avail. It might be lying buried somewhere in the papers of Gawroński or might perhaps be lost. The same Gawroński had in his successor as the Director of the Oriental Institute a bright pupil in Słuszkiewicz, who along with his aptitude for higher research was quite adept in writing in Sanskrit, both in prose and in verse.

There is a tradition in Poland—not only in Poland but the whole of Europe—that people celebrate the birthday of any great person like St. John or St. Paul as their own and call it as Name Day. To them it is an occasion of great festivity. For one such Name Day of his Guru Gawroński, Słuszkiewicz sent his good wishes both in prose and in verse.

A copy of both, the verse and the prose, Słuszkiewicz had presented to his successor in the Oriental Institute Krzysztof Byrski

---

1. The sense of the expression is not clear.

with the note, "is presented by the composer with gratitude." The copy is safe with the latter. A copy of this the latter had given to the writer of these lines during one of his visits to Warsaw.

First the verse and then the prose.

The verse :

पद्यभागः

अस्त्वन्येषां बहुलगहनाकीर्णमित्युग्रदुर्गं
क्रान्त्वा क्रान्त्वा स्खलितचरणं कण्टकैर्दीर्णवासः।
अन्ते मोक्षो न इति निहतानिष्टनिर्वेदमेव
आयुःसंज्ञं गमनमचिरान्मृष्टपादाङ्कपङ्क्ति।।

नष्टं नामापि ननु सुतरां का कथा कर्मणामि-
त्युद्दिश्यान्यान् अवमतिपरं कथ्यतां वृत्तविद्भिः।
जीवं तेषां श्रमभरयुतं यातयामं किलैव
वाक्कर्माद्यं लिपिरिव गतं जातु लोकार्णवेऽस्मिन्।।

युष्मन्नाम्ना दशशतकराच्चण्डमुद्द्योतिते तु
सूर्यभ्रान्त्या सकलमपि विद्यत्कुलं[1] तूर्णमेव।
रश्मींस्तारान् क्षयिततिमिरान् सर्वतो विप्रसार्य
विद्यालोकेऽहमहिमकयेवार्ककान्तत्वमेतु।।

भूयोभिः किं कुशलयशसी चक्रवाकाभिधे द्वे
स्यातां रात्रावपि नु वियुते संनिधाने सदा ते।
इत्याद्यद्य स्मृतशुभशता निर्गता मद्धृदो वाग्
आशिष्टायै बहुमतगुरोः कल्पतामल्पतायाम्।।

सूर्यादौष्ण्यं वारिराशेश्च शौच्यं
वाताच्छैत्यं वालुकाभ्यो बहुत्वम्।
इत्यादाय त्वत्सकाशं गुरो हे!
गच्छन्त्वद्य प्राग् यथा मन्मनांसि।।

Out of the five verses above the first four are in the metre Mandākrāntā and the fifth in the metre Śālinī. They are all in very pleasant and racy style and are embellished with beautiful alliteration, e.g., मृष्टपादाङ्कपङ्क्ति , का कथा कर्मणाम्, कल्पतामल्पतायाम्

Słuszkiewicz turns in his poetic style the two, the well-being and the fame, of his teacher as a couple. As an ideal one, this couple

---

1. अत्र यतिभङ्गः

has not only to match the Cakravāka couple that is known for intensity of mutual attachment but has to excel it in that while the latter suffers compulsive separation in the night in agony, the couple in the case of Gawroński—that is the wish of Słuszkiewicz—would just have no separation, not even in the night!

The text as it is has two minor printing errors. In verse 3 विद्यत्कुलम् should be विद्वत्कुलम्. In verse 4 in रात्रावपि नु वियुते, नु should be न.

There is irregularity in the break in विद्वत्कुलम्. The expression आशिष्टायै is puzzling. Difficult of grammatical formation, its sense poses a problem. These are, however, minor blemishes in an otherwise well-chiselled composition.

The prose :

गद्यभागः

"अद्य खल्वष्टाङ्गपातत्वेन गुरून् प्रणमामः। द्वे एव वर्षे अस्माकं गुरुभिरध्याप्यमानानां पर्यायं गते। किन्तु संवत्सरयुगमात्रमूढं दुष्करं यदि सत्यमित्युद्भिन्नकम्पाः संस्कृतविषयालवाल उपदेशप्रभृत्यध्यापनोत्सेकादिव्यापारशतपोषिताः शिष्यपादपास्तिष्ठामः। गुरुज्ञानसूर्यप्रभववाग्विशेषरश्मिपुञ्जबलेन च लवमात्रशेषीकृतसूचिभेद्यान्धकारा वर्तामहे। अथवा जातभेदावस्थान्तरत्वेन शुभोक्त्यादिमधुलालसाः पाठकमिलिन्दभूताः संस्कृतपुस्तकोद्यानेषु गुरुपादादिष्टमार्गा यथासुखं पुष्पात्पुष्पं पतामः। एतत्प्रतीन्धनजनितहर्षशिखाप्राग्भारत्वे बृहद्भानुकल्पीभूता अपि न तावद् आश्रयाशं यथार्थनामानं विदध्मः। अथ गुरुनामोत्सवदिने भक्तिबहुमानादिपरिवारा साक्षादिव वपुष्मती कृतज्ञता शरदां शतं जीवत सर्वाण्यपि रोगाध्यादिरूपाणि दुःखानि दीर्घायुस्तेजःप्रभावोत्पादितोत्कटभयकान्दिशीकीकृतान्यतिमात्रबाधितविरोधिमनांसि दूरतो वर्तन्ताम् इत्यादिभिः स्वान्तारामप्रभवैराशीर्वादसुमनोभिरवतंसवेष्टितोत्तमाङ्गान् गुरून् कुर्मः।"

The highly ornate style of the above passage easily reminds one of Bāṇa. In it similes and metaphors vie with each other. The author shows his skill in drawing a verbal picture through them. The pupils, that include himself evidently, he speaks of as trees that are nurtured through sprays of water in the form of instruction and a host of such other activities in the basins of the subject of Sanskrit, their blinding darkness in the form of their ignorance being dispelled by the rays of the sun in the form of the knowledge ingrained in the

Professor. The skill of the author in the use of words assumes new dimensions when he speaks of the flame of joy among them, the pupils, issuing from the firewood, the knowledge of the teacher who is the source of it. His gratefulness (to his teacher) he speaks of as assuming on the Name Day a physical form as it were with devotion and regard as family members.

The *Wörterbuch* or the *St. Petersburg Sanskrit—German Dictionary* is all too familiar to Sanskritists of India and abroad. Its compilers were two German scholars Rudolph Roth and Otto Böhtlingk. Of these to Böhtlingk, another German scholar Cowell had sent a Sanskrit verse. on the occasion of his birthday. Cowell had pointed out in that verse that people earn fame through hard work alone. It is with this that the dictionary could come to completion. With the exertion over, Sarasvatī (the goddess of learning) declares in firm tone (Cowell uses the verb *vadate* here which shows his skill in grammar in that √ *vad* which is ordinarily Parasmaipadin gets Ātmanepada in the sense of *bhāsana* or, firm declaration, *vide* Pān. *Bhāsanopasambhāṣājñānayatnavima-tyupamantraṇeṣu vadaḥ*, 1.3.47) that the dictionary would be immortal, *amaro bhavisyati.* The expression *amaraḥ* through pun hints obliquely at the *Amarakoṣa,* the work actually carrying the title *Nāmaliṅgānuśāsana* but better known as *Amarakoṣa* after the first part of the name of its compiler Amarasiṁha. Cowell here purports to suggest with the skilful interweaving of the words that just as the *Nāmaliṅgānuśāsana* had become *Amara* (*koṣa*); the other meaning immortal, the same way Böhtlingk's *koṣa* would also become *amara*, immortal i.e. it would Command Unquestoned authority and wide popularity The Indian poets are known for their word play. It is rare to come across that among Western scholars. Cowell is from among those rare ones. Cowell's verse noticed in detail above reads as follows :

यशः श्रमेणैव नरैरुपार्ज्यते
श्रमेण कोषोऽपि समाप्तिमाप्तवान्।
श्रमे व्यतीते वदते सरस्वती
ध्रुवं स कोषोऽप्यमरो भविष्यति।।

Cowell had earlier conveyed similarly his best wishes to Max Müller on his 50th birthday. In this he had compared the passing

years to speeding (waters) and the youth making a quick exit having come under the grip of age. He counsels him not to grieve over it nor also to feel sad. How opposite to each other are the two: Rāhu in the form of the mortal frame and the moon in the form of the fame. The use of *kva* in the verse cannot but remind one of the use of it by Kālidāsa in his *Raghuvaṁśa*. The verse reads

रयेण तुल्या व्यतियान्ति वत्सराः
जरावशं यौवनमाशु नश्यति।
अलं शुचा किं परिदेवनैर्गुरो!
क्व देहराहुः क्व यशःसुधाकरः।।

It was in 1835 that Macaulay in persuance of his new education policy recommended to Lord William Bentinck, the then Governor General of India, the closure of the prestigious Sanskrit College of Calcutta. Stung by it a teacher of the said College, a prominent Pandit of the time of the name of Jayagopala Tarkalankara thought of writing to H.H Wilson, the former Principal of the College whose love for Sanskrit was all too well known to help avert the catastrophe. He composed a Sanskrit verse and sent it to him. The verse reads as follows :

अस्मिन् संस्कृतपाठसद्मसरसि त्वत्स्थापिता ये सुधी-
हंसाः कालवशेन पक्षरहिता दूरं गते ते त्वयि।
तत्तीरे निवसन्ति संहितशरा व्याधास्तदुच्छित्तये
तेभ्यस्त्वं यदि पासि पालक तदा कीर्तिश्चिरं स्थास्यति [1]।।

"In this pond, the Sanskrit College, the swans in the form of learned scholars who were let into it by you have lost their wings with the passage of time with you having left them. On its banks are stationed (now) hunters with arrows placed (on bows) to eliminate them. O the saviour, if you could save them from them, your fame will stay for long."

Smitten with intense pain, Wilson wrote back to the Pandit the following four Sanskrit verses :

विधाता विश्वनिर्माता हंसास्तत्प्रियवाहनम् ।
अतः प्रियतरत्वेन रक्षिष्यति स एव तान् ।। 1 ।।
अमृतं मधुरं सम्यक् संस्कृतं हि ततोऽधिकम्।
देवभोग्यमिदं यस्माद् देवभाषेति कथ्यते ।। 2 ।।

1. *Udbhaṭasāgara*, Purnachandra De, Sharada Publishing House, Delhi, Section III, p. 143

न जाने विद्यते किं तन्मधुरत्वं हि संस्कृते।
सर्वदैव समुन्मत्ता येन वैदेशिका वयम् ।। 3।।
यावद् भारतवर्षं स्याद् यावद् विन्ध्यहिमाचलौ।
यावद् गङ्गा च गोदा च तावदेव हि संस्कृतम् ।। 4 ।।[1]

"The Creator is the creator of the world. Swans are his favourite vehicle. So those being dearer to him he will protect them."

"The nectar is extremely sweet. Sanskrit is sweeter than that. Because it is enjoyed by the gods, it is said to be the language of the gods (Devabhāṣā)."

"I know not what sweetness is there in Sanskrit that we, the foreigners are mad after it."

"So long as there is India, so long as there are the Vindhya and the Himācala, so long as there are the Gaṅgā and the Godāvarī, will there be Sanskrit."

With the worry still gnawing at the hearts of the Pandits of the College, they got together in a conclave to think of means to avert the tragedy. One of them, Premachandra Tarkavagisha, an authority on Alaṅkāra-śāstra, suggested that Wilson be approached again to use his good offices to intercede on behalf of the College with the British authorities to roll back the sinister decision. With the conclave approving the idea, he sent Wilson the following verse :

गोलश्रीदीर्घिकाया बहुविटपितटे कालिकातानगर्यां
निःसङ्गो वर्तते संस्कृतपठनगृहाख्यः कृशाङ्गः कुरङ्गः ।
हन्तुं तं भीतचित्तं विधृतखरशरो 'मेकले' व्याधराजः
साश्रु ब्रूते स उइलसनमहाभाग मां रक्ष रक्ष ।।[2]

"On the banks of the pond called Goladīrghikā (in popular parlance Goladīghī) lined with a number of trees in the city of Calcutta there is a deer lean in body in the form of the Sanskrit College . The chief of the hunters Macaulay has taken up sharp arrows to kill it, the scared one. With tears it calls out : O noble Wilson, save me, O ye save me."

---

1. *Udbhaṭasāgara*, Section III, p.144.
2. ibid.

Wilson duly acknowledged it through a verse that was in the Śārdūlavikrīḍita metre. The verse reads as follows :

निष्पीड्यापि परं पदाहतिशतैः शश्वद् बहुप्राणिनां
सन्तप्ताऽपि करैः सहस्रकिरणेनाग्निस्फुलिङ्गोपमैः।
छागाद्यैश्च विचर्विताऽपि सततं भ्रष्टाऽपि कुद्दालकै-
र्दूर्वा न म्रियते कृशाऽपि नितरां धातुर्दया निर्बले ।।[1]

"In spite of its being tender, the Dūrvā (a particular type of grass) even though crushed by hundreds of foot-falls of many a being, even though scorched by the rays of the sun of the form the sparks of fire, even though chewed by animals like goats, even though dug by spades does not die. The Creator is very merciful to the weak."

There is a Russian scholar of the name of Kalyanov, a resident of the city of Leningrad, who calls himself *Kalyāṇamitra*, the Sanskritized form of his name. Thoroughly proficient in Sanskrit, he talks in the language freely. Once he came to India and spent a few days here. On getting back to his country he reproduced in Sanskrit verses what he saw here with the mention of the places he visited. It is probably the first travelogue of a foreign Sanskritist. A few verses from it are reproduced below to enable the reader to have a feel of his Sanskrit :

सर्वत्र भारते खण्डे कृतज्ञात्मा स्मराम्यहम्।
बहून् देशान् दृष्टवन्तः चारुप्रकृतिविस्मिताः।।
दृष्टपूर्वा न चास्माभिः कदाचन तथाविधाः।
कल्कत्तानगरीं गत्वा विमानेन विहायसा।
दृष्ट्वा तांस्तांश्च विषयान् पाटलीपुत्रमागताः।।

---

1. Wilson's verse has an unmistakable imprint of the verse :
निष्पिष्टाऽपि पदाघातैः खरतापैश्च तापिता।
अजाद्यैश्चर्विताऽप्येषा न दूर्वा म्रियते क्वचित् ।।
Udbhaṭasāgara, p.22
A little bit of the similar impact is noticeable of the following verse in the verse of Wilson in acknowledgement of that of Jayagopala Tarkalankara :
भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती
तत्र सुमधुरं काव्यमुद्भटस्तु ततोऽपि च ।।
ibid., p. 32

इतो गता वयं शीघ्रं बङ्गलोरपुरं प्रति।
यत्र प्रियः शीतवातो नित्यं वहति दक्षिणः।।
ततो मद्रासनगरं यत्र स्नाता महार्णवे।
महानटीं सुलोचनां श्रीमदायतलोचनाम्।
सस्नेहमभिनन्दामि तेजसास्याश्च मोहितः।।
बहुराष्ट्राण्यतिक्रम्य विमानेन विहायसा।
पुराणीं सुन्दरीं भूमिं भवतां वयमागताः।।
युष्मान् वयं सूचयामः स्निग्धानस्मत्सुहृज्जनान्।।
अस्मद्भूम्याः पूर्वकालादासीन्मैत्र्यं सनातनम्।
एतद्विवर्धनार्थं च वयं सर्वे यतामहे।।
अविभेद्यमिदं मैत्र्यं प्रजानामावयोर्महत्।
सर्वत्र जनताभूत्यै जीवतात् शाश्वतीः समाः।।

The writer of these lines had the opportunity of teaching at the Seminar für Indologie (Institute of Indology) at the University of Tübingen. On the completion of his assignment, when he was to return home, the Institute organized a farewell. There H. von Stietencron, the then Director of the Institute, recited the following verses he had composd specially for the occasion which truly mirror his feelings:

भारतराजधान्यां यो व्याकरणविदां वरः।
पारगः सर्वविद्यानां कवीनां मुकुटे स्थितः।।
शशास सत्यमावृत्य शास्त्री शास्त्रविशारदः।
शिष्याञ्शिक्षाशुश्रूषार्थाञ्शर्मण्यदेशमागतः।।
वर्षान्ते तु सपत्नीकस्त्यूबिंगत्रगराच्छुभात्।
स्वदेशं गन्तुकामोऽद्य पुनः प्रयातुमुद्यतः।।
स्मृतिः सुरमणीया स्यात्स्वकर्मसु सुहृत्सु च।
दूरे वसन्नदूरेऽस्तु हृदि मैत्रीं प्रवर्तयन्।।

Later he had expressed similar feelings in a verse in Āryā metre in one of his letters:

जीवन्ति मे हृदये ये
तव मित्र! प्रीत्या चित्तरागाः।
ते त्वां सुप्रह्लादयितुं
शीघ्रं त्वन्मनोऽधिगच्छेयुः।।

In the context of letters it is worthwhile to reproduce here those written in their own hand in the Devanāgarī script (belying the impression that the Europeans prefer writing Sanskrit in the

Roman script) by such stalwarts as Aurel Stein, A.W. Stratton and J.Ph. Vogel to Pandit Nityananda Shastri of Srinagar, Kashmir, copies of which were provided to the writer of these lines by S.N. Pandita, the grandson of the great Shastri, and which are being reproduced here with his kind permission.

मोहन्दमठिकायां श्रीहरमुकुट
पर्वतप्रान्ते । ईस॰ १८८८।१।१९

श्रीसरस्वतीप्रसादपात्रीभूतसर्व
सद्विद्वज्जनगुणभूषितश्रीपण्डित
नित्यानन्दशास्त्रिमङ्गलाभिधानः
डाक्तर. म॰ औरेल. स्टैनस्य सवि
नयपूर्वकां स्वस्तिवादभरितामिमां
विज्ञप्तिं दृग्गोचरीकुर्यात्॥
भवद्धस्तकमलविचित्रितां
वर्धापनवादसूचकां सौशील्य
मैत्र्यसंबन्धप्रबोधकां पत्रिकां दृष्ट्वा
मया महान् संतोषोऽनुभूतः॥ तत्कृ
णीभूतस्य भवदादरस्याहं संयक्
कृतज्ञोऽस्मि । इति निश्चयो धार्यः॥

उत्तरदान विलम्बस्य स एकाकी
हेतुर्यन्मया कार्यबाहुल्यभरितेन
बहूनां मित्रलिखितपत्राणां प्रवाह
बहायेतेषु दिवसेष्वधिकश्रमोऽनु-
गतः॥

यद्भवता मीसैान् साहिबाय
स्वपुस्तकं प्रेषितं तस्य तु योग्य
फलमवश्यं प्रादुर्भविष्यतीति
न संशयः॥ तेनच मया च समकाले
राजाधिराजप्रसादात्समपदवी
समवाप्ता॥ भवदर्थं श्रीबोमेल-
साहिबेनापि पत्रद्वारेण स्वस्ति
वाचो विशिष्टः एव प्रेषितः॥

भवच्छ्रमं सदैव सफलीकुर्यात्
स्वास्थ्यं च प्रदद्याच्छ्रीशारदा॥

म० आरॅ.क. सेनः॥

श्री विद्वद्गणशिरोमणि सर्वसद्गुणालंकृत श्रीमहापण्डित

नित्यानन्दशास्त्रिणे सिर. औरेल स्टैनाभिधः

समग्रादरभरितं स्वस्तिवादं पुरःकृत्येममर्थं निवेदयति

भवानेव मदीयः संतोषोऽभूदनुगत्य मन्निमन्त्रणश्री

विन्टेर्निस् साहिबवराद्भवता महाभारतग्रन्थानाम्

अन्वेषणविषये साहाय्यविधानं सम्यगङ्गीकृतम्॥

संपूर्णा मदीयाशा वर्तते यद्भवच्छ्रमसाफल्यमपि

तस्मिं विषये संभूतमेव श्रीशारदानुकम्पेन॥

द्वित्रिदिवसेषु तस्य विद्वद्वरस्य प्रत्यागमः श्रीप्रवरपुरे

संभविष्यति। तदा तं भवद्धस्तकमलादादेशं प्राप्य

पुस्तकसंग्रहविषयेऽभिप्रायेण कृतज्ञो भवेयम्॥ किमधिकं॥

श्रीसरस्वती सदैव पालयेद्वर्धयेच्च भवन्तम्। इति शं॥

मोहन्दमर्गिकायाम्। १९२३।६।१

A. Stein

स्वस्ति:

महामार्युभयोरुपस्थियोर्ग्राम्ययोरागते ष्वनुचराच्छ्रुत्वा श्वोदिने मया उक्तः मित्रः पृष्टः किं कर्तव्यमिति । तस्योपदेशोऽयम् । अत्र ततो गन्तव्यम् । नगरसमीपे भयं नास्तीति । तथावां मुनशीबागोद्यान आगतौ ॥

श्वोदिने पञ्चम्यां होरायां यदि भवाना गमिष्यति तदोपस्थितो भविष्यामि । प्रति दिनं च तत्काल उपस्थास्यामि । सर्वदा तत्भवतो दर्शनाद्धर्षो जनिष्यते । दार्शपौर्णमासिकानि श्रोतुमिच्छेयम् ॥

श्रीनगरे ।
१।३।०१ ॥ G. W. Sharm

यत्पुस्तकं दर्शपूर्णमासयागमुद्दिश्य युष्मत्पार्श्वे वर्तते यदि पश्येयं प्रकर्षेण हृष्टो भवेयम् ॥

G. W. S.

श्रीशः प्रसीदतु

काश्मीरदेशस्य विद्वज्जनतिलकभूत-
सकलशास्त्रपारंगत समस्तशुभगुणगणालंकृत-
श्रीनगरस्थ श्रीयुत श्रीनित्यानन्दशास्त्रीति यथार्थनाम-
पण्डितवरिष्ठं होलन्ददेशीयो नागालयसंज्ञो
तानाम्नीं स्वञ्जलिनादेन वन्दयित्वा विज्ञापयति ।

अस्ति गिरीशभूषणभूतश्चन्द्रभागातीर-
रमणीयः प्रदेशः । तत्र कस्मिंश्चिच्चामुण्डादेवी-
प्रासादप्रसादिते स्थाने प्राचीनमूर्त्याधारो वर्तते ।
प्रतिलोहितशिलापट्टलिखितशारदालिप्यक्षरशोभमा-
लङ्कारवृत्तविशेषविशेषितात्यन्तरम्यप्रशस्तिरत्नेन
विद्योते । अस्याः प्रतिबिम्बं च देवनागरीलिपि-
लिखितां चैव कापीं भवतः समीपं प्रेषयामि ।
किमर्थं । पण्डितवरेण संस्कृतभाषाकुशलतया
यद्यदस्यां प्रशस्त्यां शिलापट्टभङ्गादिनष्टं

स्यात् तत्संभावितव्यं निश्चितकं श्चेति मम

परमाशा वर्तते । सुहृद् हि केन चिद्दुत्कं

दूरमानाब्धिमतरद् दुष्करं किं महात्मनाम् ।

अद्यापि मे हृदय इयमाशा परमास्ति

शीघ्रमेव मित्रवरिष्ठानन्द दर्शनेन लोचन-

कुमुदं मे विकस्वरं भवेदिति शुभम् ॥

The writer of these lines has also in his possession a letter sent to him by his German colleague of Tübingen days Alois Payer. Payer had visited India along with his wife Margarita (which he Sanskritizes as Mārgeritā) in 1983 when the writer of these lines was the Vice-Chancellor at Puri, Orissa. He had stayed with him for about a week before proceeding to other places. On getting back to Germany he had sent him a letter in Sanskrit which reads as follows :

महाकवयः सत्यव्रतपण्डिताः! सस्नेहमभिवादनानि

अतिदीर्घकालं तत्रभवद्भ्यः पत्रं न प्रैषयम्। तत्रभवन्तो मम दुश्चरितं मर्षयन्त्विति मम प्रार्थना। तत्रभवतां पत्रमतोषयदेवावाम्।

पुर्या अपक्रम्य सुखसुप्तौ शान्तिनिकेतनमागच्छाव। तत्र प्रोफेसर बनर्जी महाभागा रेल्यानस्थानमागम्यावां विश्वविद्यालयस्यातिथिभवनं नीत्वा विश्वविद्यालयं रवीन्द्रनाथ-ठाकुरमहाभागानां निवेशनान्यदर्शयन्। आवां शान्तिनिकेतने तिष्ठन्तावतुष्याव। शान्तिनिकेतनेऽहोरात्रं स्थित्वा काल्कटमहानगरं प्रातिष्ठावहि। रेल्यानविलम्बेन काल्कटमहानगरं मध्यनिशायामेव प्रापद्यावहि। तत्र प्रोफेसरमूखर्जीमहाभागानामगारे व्यश्राम्याव। शनिवासरे प्रोफेसरमूखर्जीमहाभागा नौ भारतीयकौतुकागारे प्राचीना मूर्तीश्चित्राणि चादर्शयन्। तन्नगरेऽपि तिष्ठन्तौ तुतुषिव। रविवार आवाभ्यां ट्यूबिङ्गननगरं प्रति गन्तव्यमासीत्। यात्रा सुखं निष्पन्ना। ट्यूबिङ्गननगरे प्रोफेसर स्तीतनक्रन्-

महाभागानपश्यम्। द्विदिनानन्तरं प्रोफेसर स्तीतन्क्रन्महाभागा अमेरिकादेशं प्रति प्रास्थिषत। तत्रभवतां सपत्नीकानां कुशलवृत्तमस्त्विति सर्वेषामाशा। ओफ्तरदिङ्गनग्रामं प्रत्यागत्य सप्ताहं रोगपीडित आसम्। इदानीं मया बहूनि कृत्यानि कर्तव्यानि। मार्गेरितामहाभागयाऽद्यप्रभृति सप्ताहं पञ्चषष्ट्याश्च्छात्राणां छात्रीणां च परीक्षा कर्तव्या। पूर्वमेव त्रिंशदधिकं शतं पत्राणि सा पर्यैक्षत।

आवां तत्रभवतां तत्रभवत्पत्न्याश्च स्मरावो बहुधा। बल्जियमविश्वविद्यालयगतान् तत्रभवतो द्रक्ष्याव इत्याशास्वहे। तत्रभवतां सपत्नीकानां सर्वं कुशलमेवास्त्वित्यर्थयावहे।

तत्रभवतां पुत्रौ,

आलोविस्मार्गेरिते।

Knowing the interest of the writer of these lines in collecting Sanskrit writings of European Sanskritists Stefano Piano of the University of Torino, Italy had tried his hand at composing a Sanskrit verse. The letter where it figures is being reproduced below:

Stefano Piano

Best greetings to You and Your Family for a happy new year!

Thank You very much for your नववर्षशुभाशंसा and Your beautiful sanskrit verse!

Are You still collecting sanskrit "poetry" from foreign Countries? Longtime ago I tried to compose a śloka on the theme of love - I found it out of old papers - It is as follows, and let Vālmīki and other great Kavi-s forgive me:

सुरूपा हि त्वमेवासि व्याघ्र इव तु निर्दया ।
मामेकाकिनमेवेह रतापि किं न खादसि ॥

I hope it will not badly pierce your refined ear!

Best wishes again to the whole family from

Stefano & Family

In the treasure trove of letters in Sanskrit received by the writer of these lines is one by the great German savant Klaus Bruhn written again in Devanāgarī script. This also is being reproduced here.

...URU
...für Kultur und Geschichte Indiens

HAMBURG 13, den 4 - 2 - 54
Bornplatz 2
Fernsprecher 44 10 71

Klaus Bruhn

To: Satyavrata Shastri
Panjab University
Oriental College
Jullundur City

मान्याः विद्वद्वराः

आरभ्य

क्षमिष्यन्ते कालविलम्बमाचार्यवर्या इति, अनेन जनेन अतीतसंवत्सरैकस्य लेखस्य अनन्यभाषाद्वारा उत्तरदाने मनो दीयते । श्रीमत्पत्रपठनानन्तरं [दिष्ट्या लब्धोऽयं] भारतवासिना समं संलापस्यावसर इति हृदये उत्पन्नो हर्षोदयः । तथापि अनन्यसाध्यापार-भारस्य दुष्करत्वात्संस्कृतपत्रस्य मन्दत्वाद्विजबुद्धेर्न तत्क्षणमेव प्रत्युत्तरीकृतम् । किंतु अद्य परिज्ञानान्तरम् (डॉ) यत्नेन लेखनारम्भः क्रियते ।

यानि सप्त वर्षाणि मे संस्कृतप्राकृतयोरध्ययने व्यापृतस्य प्रतीतानि शीलाङ्क-विरचित-चउप्पन्नमहापुरिसचरियाख्यप्राकृत-निबन्धको ग्रन्थलेशः । भविष्यत्काले जैनागमसंबद्ध-टीकादेर्वृत्तिरधिकृत्य यतिष्ये । अद्य आदेशादेवं भारतागमनानुष्ठानं कुर्यामिति मे अत्यन्तौत्सुक्यम् ।

सन्तीह हंबर्ग-विश्वविद्यालये प्रतिवर्षं केचिद्भारतविद्यार्थिनः संस्कृतभाषया हिन्दी-भाषया वा अध्ययनरता, कतिपये प्राकृतभाषाधिगममपि कुर्वन्ति । अधीयन्ते प्रायेण वेदाः, काव्या, जैन°, बौद्धसूत्राणि । कदाचित्तथैव अपभ्रंशनिबन्धा पठ्यन्ते । डॉ आल्सडोर्फ (वर्तमाने काले इह भारतविद्याशालाया अधिष्ठाता) बहूनि वर्षाणि अपभ्रंशानुसन्धानक्रियायां व्यापृतवान् । डॉ तावडे (गुर्जरदेशोत्पन्नः) हिन्दीभाषाध्यापने वर्तते ।

अलं विस्तरेण । यदीदं विद्वद्वरैरपरपत्रे किंचिदन्यदपि कथयिष्यते । संप्रति भवतां सावद्यं लेखपठनक्लेशेन क्लान्तिरुत्पादिता स्यादिति आशङ्कया विरम्यते ।

युष्मद्धितैषी

Klaus Bruhn

Bhagirath Prasad Tripathi "Vagish Shastri" of Varanasi has developed a technique of teaching Sanskrit which has a special appeal for foreigners who flock to him for learning it and after a few years of stay with him; he arranges for their stay also in his house; acquire a mastery over it which could be the envy of any lover of it. One such pupil of his Philippe Vouin, who is from France and is a medical doctor by profession, has been writing to him from his country letters in Sanskrit. Their number goes up to the staggering figure of around sixty. The writer of these lines had the occasion of looking through them, preserved as they are neatly in a file in chronological order by "Vagish Shastri" who allowed him to photocopy as of them as he wanted. He picked up from them a few which are not of very personal nature. These are reproduced below to give the readers an idea of their felicity of expression and mastery over Sanskrit diction :

मार्गशीर्षबदिपञ्चम्यां रविवासरे

वै. 2037 सैण्ट-अलबाँग्रामे

येन प्रियहरेश्चेतः भाव्यते प्रमुदन्वितम्।
तस्मै शाब्दी गणेशश्च प्रदद्यातां सदा सुखम्॥

बहिर्वात्याऽद्य भृशं सर्वतो वाति, सरस्वतीशाटीसवर्णेन च विपुलेन प्रावरणेनाऽवनी निचिता भवति। मत्समक्षं त्वदीयं कौमुदशुदिपञ्चमीकं पत्रं विभासते, यत्पठनेन प्रहर्षोर्मयो हृदन्तर्मे स्फोट्यन्ते स्म मुहुर्मुहुः। दीपोत्सवाभिनन्दनप्रेषणकृतज्ञस्तवाऽस्मि, सपरिवाररुद्रदेवस्य चाऽतिशोभनं वर्णाऽऽलेख्यं बहु रोचते मे। त्वत्पार्श्वेऽपौरुष्यन्तर्दृष्टिर्भवति वै, यतो रुद्रभक्तिरपि शनैः शनैश्चेतसि ममोत्पद्यते। अनेकेऽपि गाण्डीवशरा मया समधिगता, यैरेव त्वमात्मानं विनाकरोषि स्मेत्याशङ्के, त्वदीयं बाह्यनाम मुद्राङ्कितप्रथमपृष्ठोपरि दृष्ट्वा। यद्येवं तदाहं संकोचामि मुहुर्मुहुः, न केवलं यावत्त्वादृशो महाविदुषः सर्वेषामपि गाण्डीवशराणां पाठः संग्रहश्चाऽत्यावश्यकौ नाम भवतः।

अथातस्त्वदीयलेखार्थमधिकृत्य ब्रवीमि। नादब्रह्मशब्दः कोशेषु न लभ्यते, तस्य तु समासस्य तात्पर्यमनुमिनोमि, मन्ये, आदिस्रष्टृनादे सनातननाददेवे वा। ततो दूरतरे 'वीणापाणिः... शारदा नादमेवानुसन्धत्ते' इति वाक्य एव मया 'नादम् अनुसंधा' (आत्मनेपदे) इति वचनस्यार्थो न गृह्यते। अपि सा संगीतप्रणेत्री (रचयित्री वा) भवतीत्यर्थः? अतः परं सुष्ठु गृहीतम्, मन्ये। पूर्वं वाराणस्यामेव त्वं वाक्चतुष्टयविषये (ध्यानमधिकृत्य) काञ्चिन्निर्देशान् दत्तवान्, त्वेतद्विषयकाणि (स्फोटानाहतनादविषयेऽपि) विज्ञापनान्यन्यानि

प्राप्तुकामोऽस्मि, यथासम्भवम्। अन्यत्, अपि चक्रसिद्धान्तेन कश्चित्सम्बन्धोऽस्मिन् वाक्चतुष्टये भवति? अपि योगिभिः, यो नादो नवग्रहभ्रमणेन सृज्यते, सोऽपि श्रोतुं शक्यते? स्वर-नाद-ध्वनि-शब्द-विचाराणां मध्ये किमन्तरं भवति? (प्रश्नानामेतेषां संकुलं क्षम्यताम्)।

मया कुञ्चिकातन्त्रीवाद्यद्वारा सात्त्विकं वाद्यकं केवलं श्राव्यते। पाश्चात्त्ये संसारेऽतिप्रसिद्ध एको वाद्यप्रणेता ऽष्टादशशततमशताब्दपरार्धे जीवति स्म, यस्य नाम 'मोजार्त्'[1] इति विश्वविश्रुतं भवति। तत्प्रणीता वाद्यकृतिरधिकतमं रोचते मे। सैव सत्त्वमयी भवति, यदेव त्वं सेण्ट अलबाँग्रामे भविष्यद्गमनावसरे निजश्रवणाभ्यां (इतो वा साम्प्रतमपि ध्यानमाध्यमेन) साक्षात्कर्तुं शक्ष्यसि। एकोनविंशशताब्द्यां पश्चिमजगति राजसिकं शृङ्गारकरुणमयं च (romantic music) संगीतं भूयिष्ठेनाभूत्। इदानीन्तनकाले नूतनं विस्वरात्मकं संगीतं प्रायशो रच्यते, यत्तमोमयं राक्षसं वा भवतीति निश्चप्रचम्। मया त्वनुमीयते, यद् देवपूजनार्थं सात्त्विकमेव वाद्यकं (संगीतं वा) उचितं भवति। आगामिवर्षाकालीनं भारतगमनं नौ सम्भविष्यति, मन्ये, यदि डोमिणीक्पार्श्वे कश्चिद्विघ्नो नोत्पत्स्यते तदा (एवं सति वाचस्पतिः स्वाभ्यां मातुलाभ्यां साकं विमानेन यातुं शक्ष्यति)। तस्याऽऽगामिनि माघमासेऽवकाशकालो भविष्यति, कष्टं तु मदीयस्य सहायकस्य (Assistant) स्पर्धैकाऽग्रिमफाल्गुनमास एव संवर्त्स्यति, यदर्थाय सज्जीकरणेन बहव आयासा अपेक्ष्यन्ते (यथा पुरा मयानुभूयते स्म)। तत्काल एव किञ्चित्पूर्वकालेऽपि वा मम भारतीयवर्षाय प्रतिष्ठमानस्य स्वार्थपरता नूनं भवेत्, यतस्तर्हि स वराको मदीयस्य चिकित्सालयविभागस्यैकाकिनोत्तरदायिनाऽवशिष्येत।

त्वदर्थं लिलेखिषां ममोपश्रुत्य, सेर मरीलूईस् भणितवती 'महापण्डितमहोदयाय सौहृदवचनानि मत्तः प्रेषणीयानि, कृपया। तेन सहाऽहम् (ईश्वर-) प्रार्थनायाम् अन्तरतायाम् (interiority) आत्मनो मौनिगम्भीरत्वे च संयुक्ता भवामीत्युट्टङ्कयितव्यम्' इति।

श्रीमद्वाचस्पतेर्भविष्यदत्रत्योपस्थितिं प्रति ध्यानं सहर्षं ददामि मुहुर्मुहुः।

सर्वेषामपि हिताकाङ्क्षी भवदीयः
फिलिप्पे वोउइन्

फाल्गुनकृष्णद्वादश्यां बुधे

वै. 2036

एकरेखाऽऽलिखितगणेशाऽऽकारमात्रालङ्कृतपत्रप्रेषणात्प्रभृति स वराकः प्रियहरिः श्रीमतीरेखाग्रजः प्रतिदिनं पत्रवाहकस्याऽऽगमनं प्रतीक्षते, गुरुदेवस्योत्तरमाशस्य।

अत्रान्तरे मया गाण्डीवस्य शरचतुष्टयं संप्राप्तम्, येनैवोत्तरप्रदेशसर्वकारनिर्णयो विज्ञापितोऽभूत्, यदनुसारेण पाठ्यक्रमे संस्कृतपठनं वैकल्पिकमात्रं भवेत्। मया शोकाऽऽकुलहृदयेन विज्ञातमपि, यदयोध्यायां त्रयो वराकाः संस्कृतानुरागिणो विद्यार्थिनो भुशुण्डीप्रहारेण मारिता अभूवन्। अपीदानीमध्यापकानामध्येतृणां च संस्कृतान्दोलनमद्यापि प्रचलति? अप्यस्य निर्णयस्यानुबन्धा भवन्ति, यैस्तव वृत्तिर्वेतनं चाभिद्रोग्धुं शक्येते? संस्कृतपठनविषये श्रीमतीन्दिरागान्धीमतमधुना किमस्ति? योऽपरिवर्तनीयनिर्णयस्तदुपरि भविष्यति, अपि स प्रधानमन्त्रिवशस्याधीनत्वं याति, न वा?

सर्वेऽपीमे प्रश्ना मदीयं विचारगोचरमाक्रामन्ति मिलित्वा। कृपया, कतिपयैः शब्दैरस्याः सन्देहदोलाया विरामं कुरु। पण्डितानामारामाख्यकोशरचनाविषयेऽपि त्वदीयमाशीर्वादं सविनयं प्रार्थयते भवतां हितैषी भक्तश्च गाणपत्यः।

अनु.–यदि त्वमिच्छसि, भारत एव संस्कृतस्य प्रचारप्रसारयोः समर्थनार्थं मया कश्चिल्लेखो वैदेशिकसाक्ष्यरूपेण विरचयितुं शक्ष्यते, य एव त्वया संशोधितः (अद्यैव समधिगतगाण्डीवान्तिमशरवत्) गाण्डीवसाप्ताहिक एव प्रकाशयितव्यो भविष्यति। सर्वं मे प्रियतमं पुण्यतमं च भवति यदेव संस्कृतार्थमनुग्राहयितुमर्हति।

फिलिप्पे वोउइन्

माघशुक्लद्वितीयायां शमाग्रजवासरे वै. २०३६

प्रेष्ठ गुरुदेव!

जनोऽयं सम्प्रीतमनास्त्वदीयं मञ्जुलं दीपषट्कसहितस्थितस्फटिकाभश्रीगणेश-मूर्त्यलङ्कृतं पत्रं नीलवर्णगीतादैनन्दिनीञ्च प्राप्तवान्, यत्कृते त्वां स्वकृतज्ञतां भृशं प्रकाशमानेतुमिच्छति। एतस्मिन्नेवाभिप्राये ते, यदि चेदपेक्षा मत्पार्श्वेऽद्यापि भवेत्, तर्हि प्रेमहरिकृते स्नेहस्य सन्ततव्यग्रतायाश्च तवाभिज्ञानं लभेय खलु?

पञ्चदिनेभ्यः प्राक् डोमिणीक्भ्राता पुनः कृष्णवानरदेशगमनार्थं नौकामधिरोहति स्म, अम्बा तु राजधानीं प्रत्यावृत्ताभूत्। इदानीञ्जाने, यद् द्वावपि त्वत्तः स्वस्वचित्रपत्रे सुष्ठु समधिगतवन्तौ स्तः। उभावपि च तुभ्यं मुहुर्मुहुः कृतज्ञताप्रकाशनार्थं मां नियुक्तवन्तौ वै॥ भगिन्याः प्रीतिमनुमाय (उभे अपि लक्ष्मीनामधेयालङ्कृते स्तः) अहं सोत्साहं श्रीपण्डितजवाहरलालनेहरूपुत्रीविजयं दूररूपाऽऽकर्षकयन्त्रमाध्यमेनानुपश्यामि स्म। तस्याः सर्वलोकविस्तारिविभवो भवतीत्यत्र विवादास्पदं नास्ति, मम च विस्मयो नाभूत्, तस्या दर्शनार्थं फ्रान्स्देशीयलोकतन्त्रराष्ट्रपतिर्मासान्ते भारतगमनं करिष्यतीति श्रुत्वा। दुस्समाधेयास्तु बाह्याभ्यन्तरराजनीतिकसमस्याः सा भजतेऽपि। यदि त्वं पत्रहारेण तत्र विषयेऽविरुद्धं व्याख्यानं (गाण्डीवलेखवत्) लिखितुं शक्नोषि, तर्ह्यधुनातनान्तरराष्ट्रिय-समस्याविषयकं त्वदीयं मतं ज्ञातुमिच्छामि, भोः। पवित्रस्थानं यथाशब्दं भयङ्कर 'पाकस्थान'

भूतमेव लक्ष्यते। आत्ययिकसायुधसमरः कश्चिच्चेद् भवेत्, तर्हि मदन्तिकं भागिनेयत्रितयस्य प्रेषणे विलम्बं मा कुर्वीथाः। तदा तेषां पोषणमध्यापनं च यथाशकृत्यवधास्यामीति प्रतिज्ञा मेऽभीष्टदेवतायाः (श्रीगणेशस्यैव) साक्ष्ये।

शब्दकोषरचनायां प्रत्यहमायासं करोमि। मयाऽनेकदा त्वं तत्र प्रष्टव्यो भवेः, अनेकान्धकारापहरणाय। यथा 'Atom bombs'-'Milk teeth'-'water boy (before lying-in)' इत्यांग्लभाषामयानि वचनानि केन प्रकारेण संस्कृतेऽनुवदितव्यानि?

अन्यच्च, त्वया विविधविद्यालयीयविश्वविद्यालयीयविद्वत्ताक्रमाः (स्तरा वा, यथा स्नातक इत्यादि), निर्देष्टव्याः, कृपया, स्वस्वार्थैः सह। तदुपरि मया वाराणस्यामेव टिप्पणीलेखनमभीष्टमभूत्, कष्टन्तु तदर्थमपि समयो न्यूनोऽभवत्।

इदानीं द्वावन्तिमौ प्रश्नौ लिखितव्यौ। 1 अम्बैवं पृच्छति—'अपि भारते निस्तुषः सतुषो वा तण्डुलो भक्ष्यते?' तण्डुलतुषे हि कानिचित्खाद्यौजांसि वर्तन्ते, यानि विग्रहपुष्ट्यनुकूलानि भवन्ति। अपि त्वं महर्षिभरद्वाजप्रणीतं वैमानिकशास्त्रं जानासि? अपीदं भारतवर्षेऽधुना प्राप्तव्यं भवति? मया विज्ञातं यददः 'The International Academy of Sanskrit Research of Mysore द्वारा प्रकाशितमभूत्। आर्द्रीभूतहृदयः प्रियहरिर्माघशुक्लपक्षस्योपक्रमं चेतनीकरोति। साम्बः परुल्लवर्षीयकाशीगमनं स्मरति मुहुर्मुहुः यस्योपस्थितिर्ह्यस्तनवृत्तवच्चेतसि सुस्थिरा तिष्ठति। प्रियतमस्य भारतीयपरिवारस्य स्मरणमपि सुस्थिरं भवति। पूर्वमेवाग्रिमं 1981 ईसवीयगामि भारतगमनं मनसि निदधामि, किन्तु तस्याऽनुजस्थलावकाशसम्बन्धिमासमद्यापि न जानामि। पुष्पलतायाः (यस्या अतिशोभनं पत्रं मया प्राप्तमभूत्) समादरप्रदं निमन्त्रणमङ्गीकृत्याऽऽवाभ्यां जयपुरे वाराणस्याञ्च यदि प्रवासस्थितिर्दलीकरिष्यते तदा यद्येवमीश्वर इच्छति, अन्तरराष्ट्रीयघटनोद्भूतप्रतिबन्धाभावे सति।

सर्वेषामपि सन्निकर्ष उपस्थितचेता हिताभिलाषुकश्च

'भिस्सटा', 'दग्धिका' वा (scorched rice) स्पष्टतः किमस्ति?

Sir Monier Williams नाम्ना कोशकारेण क्वचिदमरकोशस्योल्लेखो न क्रियते। अत्याश्चर्यमिदं नु?

अन्ते... नवीनं 'तालीतन्त्रीवाद्यम्' (davi chord= piano) क्रेतुकामोऽस्मि, ज्येष्ठस्य पितामहीदत्तस्य (त्वयात्रैव दृष्टस्य) अप्रयोक्तव्यत्वात्।

फिलिप्पे वोउइन्

श्री ढुण्ढिराजाय नमः

श्रावणबदिचतुर्थ्यां शुक्रवासरे

वै. 2036

प्रेष्ठ गुरुदेव!

श्रीढुण्ढिराजानुकम्पयोत्तीर्णस्य 'डोमिनीक्' अनुजस्य मत्पार्श्वेऽवकाशकालं गमयतोऽद्यैव त्वदीयं प्रकाशमयं शान्त्यात्मकं च दीर्घं चातिशोभं चाऽऽषाढशुदिदशमीतिथिकं पत्रं समधिगतं, यत्पारायणपरायणोऽहं स्वाध्यायकक्षे सर्वस्मिन्नपराह्णेऽभूवम्। समकालेऽम्बा मातामह्या सार्धं मातुलान्यतरस्य स्पेइन्-देशस्थिते गृहे मासमेकं प्रवसति, मातुलस्य निमन्त्रणमनुमत्य।

त्वया वर्णचित्राणि गुरुपूर्णिमावसरसम्बन्धितडित्पत्रमपि सुप्राप्तानीत्याशंसे। पश्य, मत्पार्श्वे नैराश्यं न वर्तते, यतो बहुशो मयैव आ-शंस् धातुः पत्रेषु प्रयुज्यते। वस्तुतस्त्वया हृदयगवाक्षेण मे सुष्ठ्ववलोकितम्, यदि त्वयाऽऽशाभङ्गे नैराश्यशब्दो व्याह्रियते स्म। यथा श्रीमद्भगवद्गीतया नवग्रहाणां महत्त्वं कष्टं नोद्दिश्यते (नवग्रहाणां कश्चिदुल्लेखोऽपि तत्र न क्रियते, मन्ये), यदेव मम नवग्रहभक्तस्य पुराणज्योतिषं सिषेवयिषोश्च कञ्चिदाशाभङ्गमुत्पादयति स्म, यद्यपि बृहत्पाराशरहोराशास्त्रे—.

'जीवानां कर्मफलदो ग्रहरूपी जनार्दनः ॥' (1.35) —इत्युद्गीर्यते।

मन्ये, यच्छ्रीमद्भगवद्गीतयेतो मुक्तेरेव गतयोऽनुशास्यन्ते, न वस्तुतः सांसारिका जीवानां कर्मफलदानविधयः। किन्तूत्तरम्—

'दैत्यानां बलनाशाय देवानां बलवृद्धये।
धर्मसंस्थापनार्थाय ग्रहाज्जाताः शुभाः क्रमात् ॥56॥
रामोऽवतारः सूर्यस्य चन्द्रस्य यदुनायकः।
नृसिंहो भूमिपुत्रस्य बुद्धः सोमसुतस्य च ॥57॥

—इत्याद्युच्यते।

ततो ग्रहा अपि संसारे धर्मसंस्थापनेंऽशं गृह्णन्ति, स्वस्वफलैश्च मोक्षस्य प्रतिबाधकाः केवलं न भवन्ति। पौराणिकानां पाश्चात्त्यानामधिज्ञानवादिनामपि ग्रहभक्तिर्लभ्यते स्म। तेषां मतानुसारेण पञ्चत्वकालात्पश्चात् सर्वस्य प्रत्यगात्मना विविधग्रहाणां विमण्डलेष्वारोहणं शनैः प्रारभ्यते स्म, यद्द्वारतः सांसारिकबन्धनेभ्यो मुक्तिः कदाचित्संसाध्यते स्म। अन्यद्, यतः

'परमात्मांशमधिकं येषु ते [च वै] खेचराभिधाः ॥
जीवांशमधिकं येषु जीवास्ते वै प्रकीर्तिताः ॥ 30 इति

ततस्तेषां परमात्मांशाधिक्यादेव ते ननु मानवपूजनं लब्धुमर्हन्ति? मया फलितज्योतिषग्रन्थेषु बृहत्समालोडनं प्रारब्धम्, तन्निर्देशानां वरीयसे सुखतराय च प्रयोगाय। यथा, सर्वमपि पृथक् संमेल्य, यल्लग्नस्थितचन्द्रफलविषयकं चमत्कारचिन्तामणौ भावप्रकाशे

ज्योतिष-तत्त्वप्रकाशे लग्नचन्द्रिकायां च फलदीपिकायाम् सारावल्याम् जातकाभरणे बृहज्जातके मानसागर्याम् जातकचन्द्रिकायां च निर्देशरूपं प्राप्यते, ततो ऽध्येतुः समक्षं समानविषये बृहती निर्देशानां सूची निर्मीयते, यस्याः सरलो विमर्शो विविधग्रन्थेषूत्तरकालीनसमालोडनमेव परिहारयति, किं पुनर्यत इमे निर्देशा मिथः पुनरुक्तात्मका न भवन्ति, आत्मपरिपूरणं तु कुर्वन्ति। एवंविधसूचीनिर्माणेऽवश्यं मया दीर्घकालीनं प्रतिकृतिकर्माऽपेक्ष्यते। मन्ये, यद् भारतवर्ष एवान्ये गवेषिण एवं विदधति प्रयुक्तज्योतिषफलादेशस्य सौविध्यार्थाय विवर्धापनार्थाय च।

भवद्भ्यः सर्वेभ्योऽपि शं कुर्यात् सौभाग्यान्विताया विनायकजनन्या भर्ता। तव विमलस्य प्रकाशवतश्च सुहृत्तमस्य हिताऽऽशंसी प्रियहरिः।

फिलिप्पे बोउइन्

वै. 2033
दशहरादिपूर्वेद्युः
शशिशिशुवारे

नवग्रहानध्यात्वा ज्योतिषार्णवतरणेऽसमर्थो ना।
कदम्बमनत्वान्धवज् जीवितान्तपर्यन्तं भ्रमति ॥

कदम्बावचलावभ्रे द्वावेव प्रलयावधि।
ग्रहगतिविधातारौ सविनयं नमाम्यहम् ॥2॥

आकाशे नीलप्रदेशावप्रकाशकतारकौ।
कयोर्ऋभ्वोरिमौ धाम्नी किं देवस्यासुरस्य च ॥3॥

अत्र शास्त्राणि मूकानि गृहीतानीव लज्जया।
ध्रुवेऽपि बहुभाषीणि तैर्बिन्द्वेतौ जुगुप्सितौ ॥4॥

विदुषां किन्त्वभिज्ञातं नाडिवृत्तस्य चालनम्।
येन प्रतिनिवर्त्येते प्रजानाथयुगे ध्रुवौ ॥5॥

अयनांशप्रवृद्धिं वा वरं हि स्मारयाम्यहम्।
चलनद्वयकार्येण ऋतुदेशा विकारिताः ॥6॥

नामध्रुवैः स्थलं त्यक्तं पराभावप्रकाशने।
किं न्वव्ययंस्य देवस्य तत्रालयः स संस्थितः ॥7॥

पूर्वपक्षोऽवमानी हि यो ऽङ्गीकृतो न शास्त्रिणा।
कदम्बवासिसंज्ञे हे ब्रवीतु मे विपर्यये ॥8॥

शिक्षमाणस्य जातिवृत्तमयः प्रथमः प्रबन्धयत्नः।

48120 सन्त् अल्बान्
फ्रान्स्

संवत् 2032
माघशुक्लप्रतिपदि सूर्य्यवासरे

भगवन्!

भवत्पत्रागमने संप्रहृष्टस्तत्पठनं प्रारभ्य तदैव गरीयस्या संयतया च संप्रीत्या समाविष्टचेता अभूवम्। भवदीयाभिः सामधर्मार्थनीतिमद्भद्राभिर्वाग्भिर्भद्रम्। यद्यपि कतिपयखण्डनानामर्थमद्यापि संशये, तथाप्यभिधेयः प्रायो मया गृहीतो-मन्ये।

जन्मस्थानं मम लङ्गोनिति बोर्दोनगराभ्याशे गिरोण्डितिप्रदेशे।

अधुना दिष्ट्या भारतवर्षगमनमेव (भवद्भिः समादिष्टम्) मे समीपमिति ज्ञायताम्, श्रावणशुकादिमासबदि सविशेषम्। अथ 'काशीगमनमात्रेण नान्नम्भट्टायते द्विजः' किं पुनर्यूरपदेशीयोऽङ्गेति मम विदितम्। मयि त्वेतादृशस्य गमनस्य महत्त्वं सुगमं भवति, यद्यपि विंशद्वारमात्रेण द्रष्टुकामस्य ह्यल्पम्, यत्र तावद्दर्शनीयम्!

नेता चेदस्माकं गमनसहायाश्चाङ्गीकुर्वन्ति, तद्वाराणस्यां मदिच्छानुसारेण वासं करिष्यामः। यद्यपि नाऽऽङ्ग्लभाषाकस्तथापि भवतः स्यादाक्रान्तुमकूजमपि वन्दितुं चेति भावनायां चेतो मे प्रीणातितमाम्।

मत्प्रथमपत्रप्रेषणोत्तरं खण्डखाद्यकपञ्चसिद्धान्तिकाग्रन्थाभ्यां दिल्लीनगरस्थमोतीलालबनारसीदासप्रसादाद् भारतीयज्योतिर्विद्यासंस्कृतग्रन्थावली मे संवर्धिता। तत्समस्यासमाधानप्रारम्भे न तावत्कष्टम्—यद्येतस्मिन् वारं परं कल्पः स्याम्—प्रभवामि, तत्र च यः कश्चन ग्रामज्ञानी मत्तो वेदीयान्, नास्त्यत्र संशयः। किंस्विद्यथा प्ग्रिनिकृतप्राकृतेतिहासद्वितीयाध्यायस्य [1]संस्कृतानुवादः सुखतरो मेऽग्रतः स्याद्(?) यावन्, मत्संस्कृतभाषाज्ञानखण्डिमतः[2] संशोधकसाहाय्यं रचयन्नपि तमेव प्रारब्धुं शक्नुयाम्।

यतो[3] भारते वर्षे दूरकालाददृष्टसख्याकीर्ण इवाहं भविता, ततस्तानुपादाय भव्यस्य सहाध्यायित्वस्य मूलान्येव तदावस्थापितास्मीति विश्वसिमि। दूतौ मे दक्षिणं जिज्ञासनं महच्च भारतीयशिष्टतापूजनम्।

अधिकोक्तिभयाद् अत्रावस्यामि। यद् वै भवद्भिः प्रतिलिखितम् स एव मम परमाश्रयो भवति, भवतां च विश्वासधारणार्हत्वं मे व्रतमिति ज्ञायतामप्यन्तेन।

मज्जन्मपत्रप्रकाशनम् आत्मनिवेदनकारणं
भूयिष्ठेनाभवद्, भवतां पुरः सविनयं निहितम्

फिलिप्पे वोउइन्

---

1. अनुवादयोग्यावदवरतः। एषोऽध्यायः खेटगतिविषयक आधिक्यतः।
2. एतद्विषये भवदीयस्य पत्रस्य सौविध्यवदितिखण्डने किञ्चित्काठिन्यं मह्यं तद्धितानामकोविदाय ददाति।
3. भारतवर्षीयैः सहेत्यर्थः।

मयकाद्य नातिपन्नाः सन्धिविधय इत्याशासे! कृतेऽपि यत्ने ध्रुवमशुद्धयो वर्तन्ते—तत्क्षम्यतामित्यभ्यर्थये।

(श्रीः)

रविवासरे, कार्त्तिक्याम्
वै. 2036

तवाङ्कितां गिरं मित्र! पूजास्थाने ऽनुगीय वै।
कौमुद्यां प्रातरेवाऽहं साम्बः स्तोत्राण्यपाठिषम् ॥1॥

पूर्वं रक्ताभपुष्पाणि निशानागोद्भवेऽपि च।
रम्भाफलं च निक्षिप्य रम्भा[1]पुत्रस्य तुष्टये ॥2॥

तत्कीर्तनं मयाचारि खेटस्तुतिपुरःसरम्।
अन्ते सरस्वतीस्तोत्रं कक्षमिममपूरयत् ॥3॥

ह्यः समधिगतं पत्रमभूद् वृत्तमयं तव।
परमाध्यापनं श्रेष्ठं तदन्तर्मणिवत् स्फुटम् ॥4॥

पाठं पाठं मया लब्धः प्रमोदोऽतिशयेन भोः!
तदर्थं कृतज्ञः शिष्यो गुरुपादारविन्दयोः ॥5॥

वृत्तानीमानि सस्नेहं मालावन्निदधाम्यहम्।
ईशवशाच्छुभं भूयादिति वाञ्छोभयोरपि ॥6॥

फिलिप्पे वोउइन्

1. रम्भेति गौरी।

Translations

An anonymous English poet had written the following verses in his language :

Thou hidden love of God whose height
Whose depth unfathomed so mine knows
I see from far thy beauteous light
Only I saw far thy repose
My soul is sick, nor can it be
At rest till it find rest in thee

Cowell had translated these in Sanskrit as follows:

यस्योच्चत्वमगाधतां च न जनो वेदामितां दूरतो
ज्योतिस्सुन्दरमस्य गूढभगवत्स्नेहोऽहमीक्षे तव।
शान्त्यै तेऽन्तरहं विनिःश्वसिमि हा खिन्नो ममात्मा त्वयम्
शान्तिं लब्धुमलं न यावदयतां नो शान्तिमेष त्वयि।।

In the context of translation it will be pertinent to refer to the most significant contribution of another German scholar Carl Cappeller who had brought out two works, one Śataka, the *Yavanaśataka* where he translated in Sanskrit verse a hundred wise sayings of Greek poets (he does not give the Greek original along with his translation) and the other, the *Subhāṣitamālikā* where he translates in Sanskrit verse a hundred and twenty wise sayings of German poets wherein he gives the German original along with his Sanskrit rendering. Both of these, the *Yavanaśataka* and the *Subhāṣitamālikā*, form part of this monograph.

Yavanaśatakam:

A Hundred Stanzas from Greek Poets Translated

By Professor C. Cappeller, Ph.D.,
JENA

Homer

1

न राज्यं बहुभिः कार्यमेकः शास्तु प्रजा विभुः।
लोकत्राणाय यो देवैः स्थापितः परमे क्षये।।

2

यादृशानि हि पत्राणि तादृशाः सन्ति मानुषाः।
यथा पत्राणि वृक्षेभ्यो निपतन्ति महीतले।।
रोहन्ति च पुनर्वातैः प्रेर्यमाणानि माधवैः।
एवं कुलानि जायन्ते विनश्यन्ति च देहिनाम्।।

3

न हि कश्चिज्जनो दैवमतिवर्तितुमर्हति।
क्षुद्रकः स्यादुदारो वा जन्म यो लब्धवान्भुवि।।

4

अनग्निमनिकेतं च कुलघ्नं विद्धि तं नरम्।
यो वैरं रमते कुर्वन्नेकराष्ट्रनिवासिनाम्।।

5

न हि प्राणिषु सर्वेषु महीतलविसर्पिषु।
शोचनीयतरः कश्चिन्मनुष्यादिति मे मतिः।।

6

सूक्ष्मा जिह्वा बहून्यस्यां विविधानि वचांसि च।
यादृशं तु भवेदुक्तं प्रत्युक्तमपि तादृशम्।।

7

एतद्भवति मर्त्यानां देवैः पूर्वविनिर्मितम्।
दुःखादापतितुं दुःखं ते स्वयं सुखमासते।।

8

तद्गीतं सर्वगीतानां प्रशंसन्ति हि मानुषाः।
येनापूर्वेण कर्णानि[1] ह्रियन्ते हृदयानि च।।

9

बहुमान्यमधीशत्वमचिराद्धि महाधनैः।
पूर्यते भवनं राज्ञो यशश्चैव विवर्धते।।

10

समाः कतिपये सन्ति पापीयांसो न दुर्लभाः।
श्रेयांसस्तु पितुः पुत्रा विद्यन्ते यदि पञ्चषाः।।

11

न प्रशस्यतरं किंचिन्न तादृक्तृप्तिकारकम्।
यथा भर्ता च भार्या च द्वावन्योऽन्यवशानुगौ।
दुर्जनानां मनःशल्यं सुहृदां नयनोत्सवः।
भूयिष्ठं तु महाप्रीत्या सुखयन्तौ परस्परम्।।

12

विधिना प्रेषितं विद्धि याचकं चातिथिं च ते।
सत्कारेण प्रयच्छास्मै दानं स्वल्पमपि प्रियम्।।

13

न तथान्यद्यशो भाति यावज्जीवसि भूतले।
यथा यल्लभ्यते हस्तैः पादैश्चाजिषु जित्वरैः।।

14

न सर्वेषां मनुष्याणां सर्वान्देवा ददुर्गुणान्।
स्वाकृतिं च विवेकं च दिव्यां चापि सरस्वतीम्।।

---

1. The neuter here is questionble.

एकोऽङ्गदुर्बलत्वेन वैरूप्येण च योजितः।
यस्य वाक्पटुता वक्त्रे शृण्वतां तृप्तिदायिनी।।
अन्यो रूपविशेषेण सर्वेभ्यो व्यतिरिच्यते।
न यस्मै ददिरे देवा हृद्गमां मधुजिह्वताम्।।

15

पितृपैतामहे स्थाने यत्सौख्यं हृदि जायते।
न तद्देशान्तरे लभ्यं विभवेषु महत्स्वपि।।

16

क्षेत्रं कर्तुं वरं मन्ये नरस्याधनिनो भुवि।
न तु सर्वकुलं शास्तुं प्रेतानां यममन्दिरे।।

17

तं हि प्राघुणिका नित्यं ध्यायन्ते मनसा नरम्।
यो गृहे प्रतिजग्राह पूजयामास चादरात्।।

18

तुल्यदोषाववैम्येतौ तिष्ठन्तं योऽतिथिं गृहे।
निष्कासयितुमिच्छेत[1] यियासुं च निरोधयेत्।।

19

भिक्षार्थेन मनुष्या यत्पर्यटन्ति वसुंधराम्।
सहमाना महाक्लेशांस्तस्मिन्निन्द्यो (तस्मान्निन्द्यो?) हतोदरः।।

20

न हि कश्चिदुपायोऽस्ति क्षुद्रोगं विनिगूहितुम्।
यस्य हेतोस्तितिक्षन्ते श्रमान्बहुविधान्नराः।।
नावो दीर्घैररित्रैश्च योजयन्ति बुभुक्षया।
तितीर्षन्त उदन्वन्तं रणेषु च युयुत्सवः।।

21

न शोच्यं मरणं पुंसः शेते यो निहतः शरैः।
रक्षणे स्वकुटुम्बस्य गवाश्वस्य च पालने।।

1. √iṣ being Parasmaipadin the use of Ātmanepada with it here is questionble.

Hesiod.

(Opera et Dies.)

22

कुलालश्च कुलालाय वणिजे वणिगीर्ष्यति।
दरिद्रश्च दरिद्राय गायनाय च गायनः।।

23

भयानां पृथिवी पूर्णा पूर्णो ऽब्धिः प्रसरन्ति च।
व्याधयः परितो जन्तूंस्स्वयंजाताः पदे पदे।।

24

नाद्य सूनुः पितुर्भक्तो न च सूनौ रतः पिता।
मित्रं नाद्रियते मित्रं नातिथिश्च प्रतीच्छकम्।।
न भ्रातैव प्रियो भ्रातुः पूर्वकाले यथाभवत्।
विजजृम्भे मनोमादः पूज्यते पापकर्मकृत्।।
नष्टो धर्मो गता लज्जा विरलान्पश्य सज्जनान्।
धूर्तो वञ्चयते गीर्भिः पट्वीभिः शपथैरुत।
ईर्ष्या निविविशे मर्त्यान्दुर्मुखी घोररूपिणी।
परव्यसनसंहृष्टा धिगद्यत्वस्य दुष्टता।।

25

मूढाशयो बलीयांसं निरोद्धुं यो व्यवस्यति।
स पराभवमाप्नोति दुःसहां च विमाननाम्।।

26

यो नरोऽपकरोत्यन्यमात्मन्येवापराध्यति।
दुर्मन्त्रस्योपदेष्टैव दुर्मन्त्रेण निहन्यते।।

27

लघिमा सुलभस्तात बहुभिश्चाधिगम्यते।
तस्य संनिहितं वेश्म मार्गश्च निरुपद्रवः।।
गौरवस्यामरा देवाः स्वेदं वर्त्मकल्पयन्।
तद्दीर्घेण पथा प्राप्यं विषमेणोर्ध्वगामिना।।

28

श्रेष्ठो मां प्रति यो बुद्ध्या चिन्तयत्यात्मनो हितम्।
यः शृणोति सतां मन्त्रं सोऽपि श्लाघ्यो न संशयः।।
यस्तु नास्ति स्वयं प्राज्ञो न च कर्तुं व्यवस्यति।
हितवाक्यानि मित्राणामधमं विद्धि तं जनम्।।

29

भोजयेः स्वगृहे मित्रममित्रं च निवारयेः।
भूयिष्ठं तु निमन्त्र्यास्ते य आसन्ननिवासिनः।।
ज्ञातव्यौ गृहवृत्तान्ते बान्धवप्रतिवेशिनौ।
बद्ध्वा परिकरं बन्धुरबद्धान्योऽभिधावति।
हृच्छल्यं कुप्रतीवेशी साधू रक्षमनुत्तमम्।
विपत्तौ शरणीभूतं सौख्यदं कीर्तिवर्धनम्।।

30

प्रीतिः प्रीत्या प्रतिग्राह्या दर्शनेन च दर्शनम्।
दात्रा दानपरे भाव्यमदात्रा दानरोधिनि।।

31

अल्पमल्पं शनैश्चेयं तच्च कार्यं दिने दिने।
चिन्वतो रक्षतश्चान्ते भूयो भूयो भविष्यति।।

32

अस्ति ग्रहीतुमातृप्ति भद्रमेतत्प्रियंकरम्।
नास्तीति सुमहद्दुःखमिदं तात विमृश्यताम्।।

33

उपरिष्टादधस्ताच्च ग्रहीतव्यं यथारुचि।
भाण्डमध्यस्थितं रक्ष्यं बुध्ने रक्षितुमप्रियम्।।

34

न ते सीमन्तिनी चेतो मधुजिह्वा विलोभयेत्।
अभिसृत्य स्मराकृष्टा पीनश्रोणीपयोधरा।।

35

न बह्वतिथिना भाव्यं न चानतिथिना त्वया।
न च धूर्तसहायेन न च साधुविरोधिना।।

36

न दोषेणावगन्तव्यमाकिंचन्यं मनस्विना।
दैवदत्तं हि दारिद्र्यमनिष्टं हृदयंकषम्।।

Mimnermus.

37

षष्टिवर्षस्य मे मृत्युर्भवेदिति वरो मम।
आयुषश्चानयेदन्तं व्याधिचिन्तादिभिर्विना।।

Solon.

38

न कश्चित्सुखसंपन्नो दुःखभारेण पीड्यते।
यो मनुष्यकुले जातः सर्पति वसुधातले।।

39

बहवो धनिनः पापा दरिद्रन्ति च सज्जनाः।
एतद्विधिहितं लोके वयं तु न वृणीमहे।।
पुण्यादभ्युदयस्तेषां यस्माद्धर्मः सनातनः।
वित्तानि तु मनुष्याणां गत्वराणि क्षणे क्षणे।।

40

नाहं पञ्चत्वमृच्छेयमन्येषामश्रुभिर्विना।
अहो दुःखमिति ब्रूयाद्बन्धुवर्गो मृते मयि।।

Theognis.

41

धर्मं श्रेष्ठतमं मन्ये वरिष्ठां तु विरोगताम्।
किं तु प्रियतमं वस्तु तल्लब्धुं यदभीप्ससि।।

42

न सिंहोऽपि सदा मांसं भोक्तुं विन्दति पश्यत।
बलवन्तमपि क्रूरा पीडयेदनुपायता।

43

स्वैरिणीं योषितं द्वेष्मि नरं च रतिलम्पटम्।
पत्युरन्यस्य यः क्षेत्रे कृषिं कर्तुं व्यवस्यति।।

44

अमित्रं च गुणोपेतं न निन्देयं कदाचन।
वयस्यं च न शंसेयमनर्हं धर्मरोधिनम्।।

Alcman.

45

निद्रावशं संप्रति पर्वतानां
शिरांसि यातानि सकन्दराणि।
इच्छन्ति शय्यां वनचारिणश्च
श्यामायते च स्तिमितेव पृथ्वी।।
त्यजन्ति गुञ्जं मधुलिट्कुलानि
कृतं विहंगैर्विटपेषु मौनम्।
शीतेषु पाथोनिधिगह्वरेषु
तिमिंगिलाः स्वप्नसुखं भजन्ते।।

Anacreon

46

किं मे तिर्यक्कटाक्षान्सृजसि सुचटुलानश्विके सिन्धुजाते
यां पश्यामि प्रचारे हरितकमदर्तीं लीलया वल्गमानाम् ।
तिष्ठ क्षिप्रं यथा ते परिमृदुनि मुखे प्रक्षिपेयं खलीनं
पश्यारोढा जनोऽयं तुरगयमनविद् गत्यभिज्ञश्च सादी ॥

Pindar.

47

मम वाणीमयं तेजो ददौ देवी सरस्वती ।
अन्यद्विश्रुतमन्येषु राजा तु शिखरायते ।।

48

हर्षोत्कर्षेण संभग्नं दुःखशल्यं विनश्यति ।
विधेर्यदि प्रसादेन सौभाग्यं समुपानतम् ।।

49

न विनिश्चितमायुरस्ति जन्तो-
र्दिवसो वा यदि सूर्यजात एषः ।
परिणाममुपैष्यति प्रसन्नं
सुखदुःखोर्मिमयो हि जीवनाब्धिः ।।

50

अंशः कोऽपि मृतानां च धर्मेणास्ति व्यवस्थितः।
न हि बान्धववात्सल्यं भस्मीभावेन हीयते।।

51

प्रथमं सुखजीवनं धनानां
सुजनेषु प्रथितं यशो द्वितीयम्।
उभयं प्रतिपद्यते जनो यः
श्रिय एष प्रतिभाति वल्लभो मे।।

52

किं हि कश्चिन्न वा कश्चिच्छायास्वप्नसमो नरः।
भासा तु दिव्यया स्पृष्टः श्रियं पुष्यति सौख्यदाम्।।

Aeschylus.

53

दैवेनोपानतं यत्स्यात्तत्क्षाम्यमनसूयया।
अवर्ज्यामप्रधृष्यां च जानता भवितव्यताम्।

54

इममेव महाव्याधिमीश्वराणां विचक्षते।
न सुहृत्स्वपि विश्वासमायातुं हितकाङ्क्षिषु।

55

यस्य नास्ति स्वयं चित्तं शोकभाराभिपीडितम्।
तस्य दुःखसमापन्नानुपदेष्टुं न दुष्करम्।।

56

दुःखितः स्वयमस्मीति न तस्मादितरान्बहून्।
क्लेशेष्विच्छामि संमग्नान्सहायान्निजदुर्गतेः।।

57

वरं मन्ये सकृन्मर्तुं प्रवेष्टुं च यमालयम्।
न तु सोढुमनिर्भिन्नां नानादुःखपरंपराम्।।

58

न दुःस्थितौ नाभ्युदये कदाचित्
स्त्रैणं सहायं वरयेत विद्वान्।
सुखे हि तत्साहसमप्रधृष्यं
भये तु नारी कुलगोत्रनिन्दा।।

59

नभसि मेघवृते सति मानुषो
भयमितश्च ततश्च विपश्यति।
दिशमतो विमलामवलोकय-
न्नविरतं सुदिनत्वमितीक्षते।।

60

धन्वनश्च समुद्राच्च प्रोत्थितानि मुहुर्मुहुः।
अत्याहितानि चित्राणि पश्यन्ति चिरजीविनः।।

61

पक्षी कथं विशुध्येत पक्षिमांसमुपाश यः।
नरो यश्च बलादूहे कन्यां पितुरदायिनः।

62

अनीर्ष्यं सुखमिच्छामि न स्यां हर्ता पुरामहम्।
न च जीवनमापन्नो नयेयं बन्धनस्थितः।।

63

रुदन्तमनुरोदितुं विकरुणोऽप्यवस्येज्जनः
परस्य च सुखे भवेत्स्मितमुखो विहर्षोऽपि सन्।
नरान्तरविदस्तु ये पटुधियो विजानन्ति ते
सुहृत्स्वपि सुहृद्गतां प्रतिदशां मनः शीतलम्।।

64

अहो विरलता नृणां सहभुवं
जनेऽभ्युदयिनि क्षमां विदधताम्।
विषं हि हृदये द्विधा दहति नो
निजाश्च विपदः परस्य च सुखम्।।

65

अस्त्यतृप्तिर्हि सौख्यस्य न कश्चित्सुमहानपि।
विविक्षन्तीं गृहे लक्ष्मीमपेहीति निवारयेत्।।

66

कुलतन्तुं वितन्वद्भिः पुंसामचिरजीविनाम्।
कीर्तिरुद्ध्रियते पुत्रैर्जालं तुम्बीफलैरिव।।

67

बहूनि सुविभीषणानि जनयत्युपस्थे मही
तिमिंगिलगिलादयो जलनिधौ प्लवन्ते झषाः।
पतन्ति च नभस्तलाद् बहुविधा महोल्काः क्वचि-
द्वने च मृगपक्षिणोऽनिलवशात्त्रसन्त्युल्बणात्।।

नरस्य तु महामदः कथयितुं कथं शक्यते
स्त्रियाश्च मदनोत्थितं हुतवहोपमं साहसम्।
वियोजयति यज्जनौ सहचरौ व्रतस्थौ पुरा
पशूनिव च मिश्रयत्यसमसायकोन्मादितान्।।

68

मैथुनं खलु दंपत्योर्दिव्यधर्मप्रतिष्ठितम्।
गरीयः शपथादुग्राद्रक्षणीयं च मेनिरे।।

69

नानोपायैर्विमुच्येरन्बन्धनानि दृढान्यपि।
पीते तु रुधिरे भूम्या जीवनं न निवर्तते।।

70

वृथैव माता जननीत्यवाचि
पिता यथार्थं जनयत्यपत्यम्।
रेतो दधद्यद्विधिवद्गृहीत-
मियं बिभर्त्याप्तदिनं च सूते।।

71

न सुप्रतिष्ठितानाहुरल्पकान्महता बिना।
महांस्तु विधृतो ह्रस्वैरुन्नतिं प्रतिगच्छति।।

72

कष्टात्कष्टतरं यस्य स्वयं शोकजलार्णवे।
निमग्नस्य न सन्त्यन्ये समानार्तिपरिप्लुताः।।

73

अचैतन्ये स्थितं मन्ये जनस्य परमं सुखम्।
बालो यावन्न जानाति हर्षशोकौ यमावमू।।

74

कालेन सृज्यते सर्वं कालेन ह्रियते पुनः।
इत्यनाशा न कर्तव्या निःसंख्या हि दिने क्षणाः।

75

सत्यमेवास्ति तद्वाक्यं मानुषेषु यदीरितम्।
अदानान्यरिदानानि नार्थकानि च कर्हिचित्।।

76

द्वेषणीयस्तथा शत्रुर्यथा भावी सुहृत्पुनः।
तथा चैव प्रियः सेव्यो यथा द्वेक्ष्यन्ननागते।।

77

तत्तद् बहुविधं मर्त्यो यावज्जीवति पश्यति।
भविष्यं तु न जानाति प्रियं स्यादथवाप्रियम्।।

78

अवितथं तदवाचि पुरातनैर्यदहितं हितवन्मतिविभ्रमात्।
विधिहताय विभाति शरीरिणे तदनु नाशपथं प्रतियाति सः।।

79

किं नु किंचिद्धि पुत्राणां मण्डनं भुवने वरम्।
समृद्धस्य पितुर्भाग्यात्पितुर्वा सूनुसंपदः।।

80

आश्चर्याणि बहूनि सन्ति न तथा किंचिन्मनुष्यो यथा
यो नौभिः प्लवते महाजलनिधिं वातोद्धतं दारुणम्।
पृष्ठे यश्च वसुंधरां भगवतीं देवीं क्षमाशालिनीं
गोयुक्तेन विदारयत्यविरतं सीतां हलेनोत्कषन्।।

जालैर्यश्चपलान्मनोऽधिकतया गृह्णाति घोरे वने
क्षुद्राक्षैर्मृगपक्षिणो झषकुलं यश्चोद्धरत्यर्णवात्।
तेनोत्कृष्टधिया नरेण महिषो वाजी च केशान्वितो
द्वावेतौ वनचारिणावदमितौ दान्त्वा युगे योजितौ।।
बुद्ध्या यः समचिन्तयद् व्यवहृतिं धर्मांश्च वास्तुक्षितः
शीतान्वर्जयितुं दिवश्च तुहिने ग्रीष्मे सुतप्ताञ्छरान्।
किं नासौ कृतवान्करिष्यति न वा मृत्योर्य उग्रं वशं
मोघीकर्तुमशक्नुवञ्जनरुजान्व्याधीन्बभञ्जौषधैः।।

81

ईशेशानां समरविजयिन्काम संकल्पयोने
मृद्धोर्नक्तं स्वपिषि सुसुखं गण्डयोर्यस्तरुण्याः।
हित्वा ग्रामांस्तरसि च जलं वारिधेः को नराणां
को देवानां तव न गमितो लक्ष्यतामायुधानाम्।।
औत्सुक्येन प्रचटुलदृशां लम्भयन्नङ्गनानां
धर्मासक्तान्मनसिज नरान्कारयस्यप्यकार्यम्।
सीदस्यन्तः परिषदि सह प्राज्ञिभिर्मन्त्रिभिस्त्वं
मल्लश्चेव प्रतिभटगलेऽनङ्ग पादं ददासि।।

82

को हि द्वित्रानपि प्राज्ञो दिवसान्परिकल्पयेत्।
न हि श्वोऽस्ति ध्रुवं तावद्यावदद्य न यापितम्।।

83

जनानां धर्मशीलानां निकषः कालपर्ययः।
एकेनैव मुहूर्तेन प्रकाश्यन्ते खला नराः।।

84

सर्वेषामपि शल्यानां मध्ये हृदयभेदिनाम्।
न तथा बाधते किंचिद्यथा दुःखं स्वयंवृतम्।।

85

मनुष्योऽस्मीति जानेऽहमध्रुवं श्वोदिनं मम।
यथा तव यथामुष्य यथान्यस्य च कस्यचित्।।

86

आयुर्दीर्घतरं य इच्छति जनः प्राज्ञेतरं वच्मि तं
नानादुःखदमेव तद्दिनदिनात्प्रोत्तारितं जीवनम्।
तृप्तिः का हि भवेत्पथि श्रमवतो दूरे यदन्ते स्थितो
मृत्युर्मौनमयः समस्तभुवनद्विष्टश्च भोक्तापि सन्।।

87

भावाच्छ्रेयानभावो यदि तु विधिवशात्प्राप्यते जन्मभूमौ
सद्यो मर्तुं द्वितीयं चलमनसि गते यौवने किं हि शिष्टम्।
ईर्ष्यालोभावकृष्टं कलहरणवधैरायुरत्येति पुंसां
भोगैर्यावद्विहीनानभिभवति जरा सर्वशोकस्य योनिः।।

Euripides

88

यथैवाकुशलाः सन्ति साधने हितकर्मणाम्।
एवं दुष्टेषु कार्येषु बहूपायाः सदा स्त्रियः।।

89

को हि निश्चिनुयादर्थं सत्यासत्यं च निर्णयेत्।
उभयोर्वचनं यावत्पक्षयोर्नावधारितम्।।

90

मौनमाचरितुं नित्यं विनयं च विरक्षितुम्।
न च गन्तुं बहिर्गेहाद्भूषणं योषितां परम्।।

91

न कोऽपि मर्त्यो भजते स्वतन्त्रतामेको धनस्यैति हठस्य वाश्रयम्।
धर्मेण वा पौरजनेन वापरः स्वैरप्रचारात्सततं विरुध्यते॥

92

ध्रुवं न किंचिन्न यशो न सौष्ठवं न कामवस्थां प्रतिपत्स्यसे स्वयम्।
एवं हि देवा विदधुः प्रियाप्रियैरस्माकमायूंषि हविर्बुभुक्षया।।

93

न कस्यचिन्मां प्रति किंचिदन्यत्प्रियं भवत्यात्मनि जन्मदेशात्।
मनो हि धीश्चिद्धृदयं च सर्वमपह्नुवानस्य च तद्गतानि।।

94

न हि कश्चिन्मनुष्याणां धनस्य सदृशो गुणः।
पात्रतां येन गच्छन्ति बलं चाप्रतिमं भुवि।।

95

अकृत्रिमं सत्यवचः स्वभावतः
स्फुटार्थतां याति पटूक्तिभिर्विना।।
व्यलीकवाणी गदवत्पदे पदे
महौषधानामुपयोगमर्हति।।

96

आचारो यदि भेत्तव्यो राज्यार्थेनैव भिद्यताम्।
शेषे धर्मपथः पाल्यो न च हेयः कदाचन।।

97

भूयो भूय इति प्राज्ञो न ब्रूयान्न च चिन्तयेत्।
तेन यज्जीवनायालं मानसं परितोषयेत्।।

98

येन भार्या सती प्राप्ता सुखं तस्य सनातनम्।
गृहे गृहबहिश्चाधिं ददाति कुकुटुम्बिनी।।

Theocritus

99

मा विषादं गमस्तात श्वो हि श्रेयो भविष्यति।
आशा धारयति प्राणान्मृता एव निराशकाः।।

100

द्रुमाणां तुहिनं कष्टं निम्नगानामवर्षणम्।
पाशबन्धो विहंगानां श्वापदानां च वागुरा।।
यूनो मृगदृशां चिन्ता भगवन्बलसूदन।
नाहमेकः सकामोऽस्मि नारीसक्तो भवानपि।।

Metres

Śloka 1–44, 47, 48, 50, 52–57, 60–62
65, 66, 68, 69, 71–77, 79, 82–85,
88–90, 94, 96–100
Aupacchandasika 49, 51
Upajāti 45, 58, 70, 98
Vaṁśastha 91, 92, 95
Drutavilambita 59, 78
Jaloddhatagati 64
Mandākrantā 81
Pṛithvī 63, 67
Śārdūlavikrīḍita 80, 86
Sragdharā 46, 87

SUBHĀṢITAMĀLIKĀ

Selected Subhāṣitas From German Poets
Tṛanslated By C. Cappeller
Jena

1
Goethe

Alles in der Welt lässt sich ertragen,
Nur nicht eine Reihe von schönen Tagen.

सर्वं खलु मनुष्येण सह्यं लोके ब्रवीम्यहम्।
न तु सह्या विमेघानां सुदिनानां परम्परा॥

2
Rückert

Am Ende deiner Bahn ist gut Zufriedenheit;
Doch wer am Anfang ist zufrieden, kommt nicht weit.

नास्ति जीवपथस्यान्ते सन्तोषेण समं धनम्।
आदौ तु योऽस्ति सन्तुष्टो न स दूरं गमिष्यति।

3
Burmann

Arbeit macht das Leben süss,
Macht es nie zur Last;
Der nur hat Bekümmerniss,
Der die Arbeit hasst.

लघयत्युद्यमो भारञ्जीवं स्वादु करोति च।
स एवार्तिसमापन्न उद्यमाद्यो जुगुप्सते ।।

4
Schiller

Auch die Liebe bewegt das Leben,
Dass sich die graulichten Farben erheben.

Leicht betrügt sie die glücklichen Jahre,
Die gefällige Tochter des Schaums;
In das Gemeine und Traurig-wahre
Mischt sie die Bilder des goldenen Traums.

कामोऽपि लोकस्य महाप्रचोदको
विचित्रयत्यस्य विधूसराकृतिम्।
तत्त्वे च मायां ललितां विमिश्रयन्
प्रतारयत्यभ्यधिकं वयो नवम्।।

5

Goethe

Benutze redlich deine Zeit:
Willst was begreifen, suchs nicht weit.

उद्यमेन नयेः कालं विधिनादेशितं तव।
नान्विष्येश्चातिदूरेण सङ्ग्रहीतुं यदिच्छसि।

6

Schiller

Das eben ist der Fluch der bösen That,
Dass sie fortzeugend immer Böses muss gebären,

स हि महत्तमो मन्ये दोषो दुष्टस्य कर्मणः ।
संरोपयदिवात्मानं प्रसूते यदघान्तरम्।।

7

Goethe

Das ist die wahre Liebe, die immer und ewig sich gleich bleibt,
Wenn man ihr alles gewährt, wenn man ihr alles versagt.

सत्यां प्रीतिमवैम्येतां साम्यं या न विमुञ्चति ।
काममवाप्य सर्वत्र प्रतिषिद्धा च सर्वतः।।

8

Scheiffel

Das ist im Leben hässlich eingerichtet
Dass bei den Rosen gleich die Dornen stehn,
Und was das arme Herz auch sehnt und dichtet,
Zum Schlusse kommt das Voneinandergehn.

जवानां रक्तपुष्पाणां कण्टकावरणं यथा ।
कामिजनस्य विश्लेषो हतदैवेन कल्पितः ।।

9

Schiller

Das ists ja was den Menschen zieret
Und dazu ward ihm der Verstand,
Dass er im innern Herzen spüret
Was er erschuf mit eigner Hand.

अलङ्कारो जनस्यैष बुद्धेश्चैतन्महाफलम् ।
अन्तरात्मनि जानीमो यत्कृतीर्निजहस्तयोः ।।

10

Derselbe

Das Leben ist der Güter höchstes nicht;
Der Uebel grösstes aber ist die Schuld.

जीवितं नास्ति सर्वेषां धनानां धनमुत्तमम् ।
सकलानां तु पापानामघं पापमनुत्तमम् ।।

Wanderers Nachtlied. 1.

11

Goethe

Der du von dem Himmel bist,
Allen Schmerz und Leiden stillest,
Den, der doppelt elend ist,

Doppelt mit Erquickung füllest,
Ach ich bin des Treibens müde,
Was soll all der Schmerz und Lust?
Süsser, heilger Friede,
Komm, ach komm in meine Brust !

दिव्योद्भवे सकलदुःखविनाशयित्रि
द्विस्तापितं द्विरपि या शिशिरीकरोषि।
शान्ते प्रिये विश मनो मम दूयमानं
संसारचक्रपरिवृत्तिसुखासुखेन।।

Wahl eines Freundes

12

Logau

Der sei dir nicht erkiest,
Der Freund ihm selbst nicht ist;
Wer Freund ihm selbst nur ist,
Der sei dir nicht erkiest.

आत्मनो ऽस्ति न यन्मित्रं तस्य मान्विष्य सौहृदम्।
न चाप्येष सुहृत्कायः प्रिय आत्मन एव यः।।

13

Goethe

Des Todes rührendes Bild steht
Nicht als Schrecken dem Weisen und nicht als Ende dem Frommen.
Jenen drängt es ins Leben zurück und lehret ihn handeln,
Diesem stärkt es, zum künftigen Heil, in Trübsal die Hoffnung;
Beiden wird zum Leben der Tod.

मूर्खद्विष्टो मनसि विदुषस्तिष्ठते नो करालो
नो भावस्योपरतिरिव च श्रद्धधानस्य मृत्युः।
आ प्राणान्तादितरमनिशं कर्मणे तेजयित्वा
प्रश्वास्यान्यं विपदि मरणं कल्पते जीवनाय।।

Die Jäger der Ruhe

14

W. Müller

Die Menschen die nach Ruhe suchen, die finden Ruhe nimmermehr,
Weil sie die Ruhe, die sie suchen, beständig jagen vor sich her.

ये शान्तिं मृगयन्ते तां न ते विन्दन्ति कर्हिचित्।
यस्माद्यां मृगयन्ते तां प्रणुदन्ति पदे पदे।।

Verleumder

15

Logau

Die Mücken singen erst, bevor sie einen stechen;
Verleumder lästern drauf, indem sie lieblich sprechen

रुवन्ति प्रथमं कर्णे तुदन्ति मशकास्ततः।
भाषन्ते मधुरं यावद् व्रणयन्त्यपरं खलाः।।

16

Fontane

Die Ruh ist doch das beste
Auf dieser Erdenwelt.
Was bleibt uns denn auf Erden,
Wird uns die Ruh vergällt?
Die Rose welkt in Schauern,
Die uns der Frühling giebt;
Wer hasst, ist zu bedauern,
Und mehr noch fast wer liebt.

शान्तिं मन्ये धनमनुपमं जीविते मानुषाणां
नाशे यस्याः सकलभुवने शिष्यते नः किमन्यत्।

पुष्पं वातैरभिहतमिव म्लायमानं वसन्ते
यो द्वेषस्थः स सुखविकलः किं पुनर्यः सकामः॥

17

Goethe

Die Sorge nistet gleich im tiefen Herzen,
Dort wirket sie geheime, Schmerzen,
Unruhig wiegt sie sich und störet Glück und Ruh;
Sie deckt sich stets mit neuen Masken zu,
Sie mag als Haus und Hof, als Weib und Kind erscheinen,
Als Feuer, Wasser, Dolch und Gift;
Du bebst vor allem, was nicht trifft,
Und was du nie verlierst, das musst du stets beweinen.

चिन्ता रे हृदयं नृणां निविशते दुःखं रहः कुर्वती
स्वास्थ्यं चात्र विनाशयत्यहरहः संरुन्धती निर्वृतिम्।
नानावेषधरा विषघ्न्युदकवत् स्त्री पुत्ररूपेण वा
मिथ्या सन्तनुते भयं विलपनं चैतस्य नष्टं न यत्।।

18

Derselbe

Die Stätte, die ein guter Mensch betrat,
Die ist geweiht für alle Zeiten.

सज्जनस्य सकृत् पूतं पादस्पर्शेन यत्स्थलम्।
परेषां सर्वकालेषु तत्सुखायोपजायते।।

Der Streit

19

Nicolai

Die Sterne zankten sich, wer grössres Licht verbreite;
Die Sonne stieg : aus war es mit dem Streite.

ताराभिः स्पर्धमानाभिर्मम ज्योतिर्महत्तरम्।
इति त्यक्तो विवादो ऽयम् उदये तीक्ष्णमालिनः।।

20

Goethe

Edel sei der Mensch,
Hülfreich und gut!
Denn das allein unterscheidet ihn
Von allen Wesen, die wir kennen.

उदारात्मा मनुष्यः स्यात् परेषां चोपकारकः।
एतेनैव हि सर्वेभ्यः प्राणिभ्यो व्यतिरिच्यते।।

Wissenschaft

21

Schiller

Einem ist sie die hohe, die himmlische Göttin, dem andern
Eine tüchtige Kuh, die ihn mit Butter versorgt.

एकस्मै महती देवी विद्या यज्ञैरुपासिता।
अन्यस्मै जीवनायैव गौर्यथा क्षीरदायिनी।।

22

Derselbe

Ein jeder Wechsel schreckt den Glücklichen;
Wo kein Gewinn zu hoffen, droht Verlust.

विपर्ययेण सर्वेण भीतिमेति सुखी जनः।
वृद्धिर्यत्र न लब्धव्या क्षय एवावशिष्यते।।

23

Derselbe

Ein jeglicher versucht sein Glück,
Doch schmal nur ist die Bahn zum Rennen :
Der Wagen rollt, die Achsen brennen;
Der Held dringt kühn voran, der Schwächling bleibt zurück,

Der Stolze fällt mit lächerlichem Falle,
Der Kluge überholt sie alle.

चर्याभूमिः परिमितपदा यत्र धावन्ति सर्वे
चक्राणां च प्रसरणजुषामूष्म अक्षा भजन्ते।
शूरस्याविर्भवति जवनं मन्दता चाबलस्य
प्रौढाचारो निपतति भुवां लक्ष्माप्नोति दक्षः।।

24

Goethe

Entzwei und gebiete! tüchtig Wort,
Verein und leite! bessrer Hort.

वरं मित्रोपलम्भेन प्रणेतुं साधुना पथा।
न तु शत्रूपजापेन शासितुं विवशाः प्रजाः।।

25

Schiller

Ertragen muss man was der Himmel sendet;
Unbilliges erträgt kein edles Herz.

क्षन्तव्यमविषादेन विधिना यदुपानतम्।
परेषामपकारास्तु प्रतिकार्या महात्मना।।

26

Goethe

Es freut sich die Gottheit der reuigen Sünder :
Unsterbliche heben verlorene Kinder
Mit feurigen Armen zum Himmel empor.

आगस्कृता दण्डशतार्हणेन
तुष्यन्ति देवाश्चरतानुतापम्।
विमुक्तदोषं च दिवं प्रसन्ना–
स्तेजस्विभिर्बाहुभिरुद्वहन्ति।।

27

Derselbe

Es fürchte die Götter
Das Menschengeschlecht!
Sie halten die Herrschaft
In ewigen Händen,
Und können sie brauchen
Wies ihnen gefällt.
Der fürchte sie doppelt,
Den je sie erheben!

सततममरमन्योरुद्विजन्तां मनुष्या
द्विरपि तु स बिभियाद् उच्चसंस्थो नरो यः।
अचलमुचितहस्तैर्हीश्वरत्वं दधाना
यदभिरुचितमेषां साधयन्त्येव देवाः।।

28

Schiller

Es kann der Frömmste nicht in Frieden bleiben,
Wenn es dem bösen Nachbar nicht gefällt.

नोत्सहेत क्षमिष्ठोऽपि सन्धिं सम्परिरक्षितुम्।
विग्रहो यदि रोचेत दुर्धिये प्रतिवेशिने।।

29

Derselbe

Es liebt die Welt das Strahlende zu schwärzen
Und das Erhabne in den Staub zu ziehn.

यततेऽयं सदा लोकः श्यामीकर्तुं यदुज्ज्वलम्।
उच्चस्थानगतं यच्च न्यक्कर्तुं पदपांसुवत्।।

30

Derselbe

Es soll der Dichter mit dem König gehen,
Denn beide wandeln auf der Menschheit Höhen.

कवी रसिककाव्यस्य राज्ञा सङ्गममर्हति।
व्रजितौ यदुभावस्य लोकस्यैवावतंसताम्।।

31

Herder

Fache den Funken nicht an, der zwischen Freunden erglimmt ist :
Leicht versöhnen sie sich, und du bist beiden verhasst.

मा कृथा मित्रयोरन्तर्वैरज्वलनधुक्षणम्।
उभयोर्हीयुषोः सन्धिं स्वयं द्वेषं गमिष्यसि।।

Correctheit

32

Schiller

Frei von Tadel zu sein ist der niedrigste Grad und der höchste :
Denn nur die Ohnmacht führt oder die Grösse dazu.

जघन्यां तु गतिं मन्ये परमां च विदोषताम्।
तस्य यद्धेतुरल्पत्वं शीलस्य महिमाथ वा।

33

Derselbe

Frommts den Schleier aufzuheben,
Wo das nahe Schreckniss droht?

Nur der Irrthum ist das Leben
Und das Wissen ist der Tod.

नोपसंहर्तुमिच्छेत[1] तिरस्करणमायतेः ।
मृत्युर्हि भवति ज्ञानम् एको मोहस्तु जीवनम् ।।

34

Goethe

Früchte bringet das Leben dem Mann, doch hangen sie selten
Roth und lustig am Baum, wie uns ein Apfel begrüsst.

उच्चावचानि लोको
दर्शयति नरं फलानि संभोक्तुम् ।
यद्यपि सुखलभ्यानि
द्रुमशाखायां न लम्बन्ते ।।

35

Balde

Früh in blühender Jugend lern, o Jüngling,
Lebensglück. Sie entfliehn, die holden Jahre!
Wie die Welle die Welle, treibt die eine
Stunde die andre.
Keine kehret zurück, bis einst dein Haupthaar
Schneeweiss glänzet, der Purpur deiner Lippen
Ist entwichen, nur eine Schönheit blieb dir,
Männliche Tugend.

पुत्र द्रागाकुमाराद् दुरधिगमतमां नीतिविद्यामधीष्व
क्षीरोदोर्मिर्यथोर्मिं प्रणुदति सततं रे मुहूर्तो मुहूर्तम् ।
यच्चातीतं व्यतीतं विकृतिमललितां यावदभ्येति कायः
केशा जीर्यन्ति शुष्यत्यधरकिसलयं शिष्यते पुण्यमेकम् ।।

1. It is an irregular form. See fontnote on page 37.

36

Schiller

Gefährlich ists den Leu zu wecken,
Verderblich ist des Tigers Zahn;
Jedoch das schrecklichste der Schrecken
Das ist der Mensch in seinem Wahn.

सुप्तस्य सिंहस्य भयाय बोधनं
विपत्तये व्याघ्रमुखं विदारितम् ।
महाभयानां तु भयं महत्तमं
नरो मतिभ्रान्तिमदेन मोहितः ।।

37

Wieland

Geniesse was du hast, als ob du heute
Noch sterben solltest, aber spar' es auch,
Als ob du ewig lebtest. Der allein ist weise,
Der, beides eingedenk, im Sparen zu
Geniessen, im Genuss zu sparen weiss.

मुमूर्षुरद्यैव धनानि भुङ्क्ष्व
जिजीविषुस्तानि सदैव रक्ष ।
यो रक्षति स्वानि धनानि भुञ्जन्
भुङ्क्ते च रक्षन् स जनो विपश्चित् ।।

Gewissensserupel.

38

Schiller

Gerne dien' ich den Freunden, doch thu ich es leider mit Neigung,
Und so wurmt es mich oft, dass ich nicht tugendhaft bin.

Entscheidung

Da ist kein anderer Rath, du musst suchen, sie zu verachten,
Und mit Abscheu alsdann thun, was die Pflicht dir gebeut.

सेवे मित्रजनं कामान्न धर्मेण प्रचोदितः।
तस्मादधार्मिकोऽस्मीति दह्यते हृदयं मम।।
यतितव्यं सखीन् द्वेष्टुं प्रीतिमुन्मूल्य तत्परम्।
धर्महितोर्भजस्वैनान् अन्यदत्र न विद्यते।

39

Goethe

"Hat man das Gute dir erwiedert?"
"Mein Pfeil flog ab, sehr schön befiedert;
Der ganze Himmel stand ihm offen,
Er hat wohl irgendwo getroffen."

किं सुक्रियया भवतोऽभवत् फलं
प्रसृष्टवानस्मि शरं सुतेजनम्।
दिङ्मण्डलं तस्य बभूव गोचर–
स्तन्मे मतिर्यत्कथमप्यसज्जत।।

40

Derselbe

Heilig sei dir der Tag; doch schätze das Leben nicht höher
Als ein anderes Gut, denn alle Güter sind trüglich.

मुहूर्तो बहु मन्तव्यो मा तु भावय जीवनम्
उत्तमं सर्ववित्तानां सर्वं वित्तं हि चञ्चलम्।।

41

Goethe

Ich besass es doch einmal,
Was so köstlich ist;
Dass man doch zu seiner Qual
Nimmer es vergisst!

ममाप्यासीदसौ पूर्वं निधीनां परमो निधिः।
तस्य यन्नास्ति विस्मर्तुं सन्तापः परिजायते।।

42

Derselbe

Ihr glücklichen Augen,
Was je ihr gesehn :
Es sei wie es wolle,
Es war doch so schön.

हे सख्यौ ब्रवीम्येतच्चक्षुषी सफलीकृते।
अद्य यथाकथञ्चित्स्यात्पुराभूद् भवतोः सुखम्।।

43

Schiller

Im Fleiss kann dich die Biene meistern,
In der Geschicklichkeit ein Wurm dein Lehrer sein,
Dein Wissen theilest du mit vorgezognen Geistern;
Die Kunst, O Mensch, hast du allein.

भृङ्गो ऽप्यलं शिक्षयितुं तवोद्यमं
चित्रं कृमीणामपि भाति नैपुणम्।
विद्या प्रजानामपि दिव्यजन्मनां
शिल्पं तवैकस्य मनुष्य मण्डनम्॥

Erwartung und Erfüllung

44

Derselbe

In den Ocean schifft mit tausend Masten der Jüngling;
Still, auf gerettetem Boot, treibt in den Hafen der Greis.

पोतैः पवनविक्षिप्तैः समुद्रं प्लवते युवा।
भङ्गावशिष्टया वृद्धस्तीरमृच्छति नौकया।।

45

Goethe

Irrthum verlässt uns nie, doch ziehet ein höher Bedürfniss
Immer den strebenden Geist leise zur Wahrheit hinan.

मोहतिमिरसंवीतम् ईहा काचिन्महत्तरा ।
उत्पतन्तं मनोहंसं सत्यं प्रत्युपकर्षति ।।

46

Uhland

Ist die Zeit auch hingeflogen,
Die Erinnrung weichet nie;
Als ein lichter Regenbogen
Steht auf trüben Wolken sie

श्याममेघावलीलीनमिन्द्रायुधमिवोज्ज्वलम् ।
विषयाणामतीतानां स्मरणं चेतसि स्थितम्॥

47

Goethe

Ist wohl der ein würdiger Mann, der im Glück und im Unglück
Sich nur allein bedenkt, und Leiden und Freuden zu theilen
Nicht verstehet, und nicht dazu vom Herzen bewegt wird?

किमार्यवृत्तिः प्रतिभाति ते नरो
विचिन्तयन् यः सुखदुःखयोः सदा ।
आत्मानमेकं हृदि न प्रियाप्रियं
विभक्तुमन्यैः सह संव्यवस्यति ।।

Memento I.

48

Derselbe

Kannst dem Schicksal widerstehn,
Aber manchmal giebt es Schläge;
Wills nicht aus dem Wege gehn,
Ei so geh du aus dem Wege.

दैवं तात प्रतीकुर्वंस्ताडनानि सहिष्यसे।
पराङ्मुखस्य दैवस्य मार्गो देयो विपश्चिता।।

Kenne dich

49

Logau

Kannst du dem, der vor dir geht, seine Mängel bald erblicken,
Wird dir auch die deinen sehn, wer dir nachsieht, auf dem Rücken.

स्वयं पश्यसि रन्ध्राणि त्वत्पुरो गच्छतां यथा।
दोषास्तथैव दृश्यन्ते तव पृष्ठानुगामिभिः।।

Wahl

50

Schiller

Kannst du nicht allen gefallen durch deine That und dein Kunstwerk,
Mach es wenigen recht, vielen gefallen ist schlimm.

सर्वेषां यदि नो शक्यं रोचितुं क्रियया तव।
द्वित्राणामेव रोचस्व बहूनां दुष्ठु रोचितुम्।।

51

Goethe

Liebe menschlich zu beglücken
Nähert sie ein edles Zwei:
Doch um göttlich zu entzücken,
Bildet sie ein köstlich Drei.

कामो मनुष्यहर्षाय शुभं योजयति द्वयम् ।
देवानां तु महातृप्त्यै निर्माति त्रयमद्भुतम् ।।

52

Derselbe

Lockte die Neugier nicht den Menschen mit heftigen. Reizen,
Sprecht, erführ' er wohl je, wie schön sich die weltlichen Dinge
Neben einander verhalten? Denn erst verlangt er das Neue,
Suchet das Nützliche dann mit unermüdlichem Fleisse,
Endlich begehrt er das Gute, das ihn erhebet und werth macht.

दुर्धर्षेण कुतूहलेन यदि नो लोभ्येत जन्तुः सदा
वस्तूनां व्यतिषङ्गमद्भुतमिमं लोके परीक्षेत किम् ।
आदाविच्छति यन्नवं प्रियकरं यत् स्वार्थकृत् तत्परं
पश्चाद्धर्मपथं चरन् बहुमतो यात्युन्नतिं पुण्यभाक् ।।

53

W. Müller

Mancher liegt schon lang im Grabe und beherrscht noch diese Welt;
Unterdessen schläft der andre, der zum Herrschen ist bestellt.

कश्चिच्छास्ति गुणोत्कर्षान्महीं चिरमृतोऽपि सन् ।
साम्राज्ये स्थापितो यावदन्यो मुह्यति निद्रया ।।

Wie du mir, so ich dir.

54

Goethe

Mann mit zugeknöpften Taschen,
Dir thut niemand was zu lieb :
Hand wird nur von Hand gewaschen;
Wenn du nehmen willst, so gieb!

हे कदर्य तवादातुर्न कश्चित् कुरुते प्रियम्!
यदि लिप्सा स्वयं देहि फलेन फलमादिश।।

55

Halm

Mein Herz ich will dich fragen:
Was ist denn Liebe? Sag! —
"Zwei Seelen und ein Gedanke,
Zwei Herzen und ein Schlag!"
Und sprich: woher kommt Liebe?
"Sie kommt und sie ist da."
Und sprich: wie schwindet Liebe?
"Die wars nicht, ders geschah."

हृदय ब्रूहि किम्भूतः शृङ्गारः प्रतिभाति ते।
चित्तद्वन्द्वस्य धीरेका कम्प एको द्वयोर्हृदोः।।
किमुद्भवस्तु शृङ्गार उद्भवत्यस्ति च क्षणे।
किमन्तश्च नास्ति तस्यान्तो नाभवद् ध्यभवद्यदि।।

56

Goethe

Mit den Göttern
Soll sich nicht messen
Irgend ein Mensch.
Hebt er sich aufwärts und berührt

Mit dem Scheitel die Sterne,
Nirgends haften dann
Die unsicheren Sohlen,
Und mit ihm spielen
Wolken und Winde

न खलु न खलु स्पर्धा कार्या सुरैः सह जन्तुना
नभसि तुलयन्नुत्पातं चेत् स्पृशत्यपि तारकः।
क्वचन चलनान्यासज्जन्ते न पादतलान्यतो
जलदपवनाः क्रीडां कुर्वन्त्यनेन निरर्गलम्।।

57

Goethe

Mit einem Herren steht es gut,
Der was er befohlen selber thut.

भर्तुरेवंविधस्यैव कार्यसिद्धिर्भविष्यति।
यो यदाज्ञापयामास भृत्यवत् कुरुते स्वयम्।।

58

Schiller

Mit leichtem Muthe knüpft der arme Fischer
Den kleinen Nachen an im sichern Port,
Sieht er im Sturm das grosse Meerschiff stranden.

लघूडुपं प्रसन्नात्मा तीरे बध्नाति धीवरः।
नावं सुमहतीं पश्यन् भज्यमानां महार्णवे।।

59

Rückert

Möge jeder still beglückt
Seiner Freuden warten;
Wenn die Rose selbst sich schmückt,
Schmückt sie auch den Garten.

सर्वो दधीत मोदम् आत्मसुखं चिन्तयेच्च सन्तुष्टः।
पुष्यत् स्वामेव श्रियमलङ्करोति कुसुमं वाटीम्।।

Memento. II

60

Goethe

Musst nicht widerstehn dem Schicksal
Aber musst es auch nicht fliehen:
Wirst du ihm entgegengehen,
Wirds dich freundlich nach sich ziehen.

नास्ति विधेः प्रतीकारो नाप्यस्ति च पलायनम्।
अनुकूलतरं दैवं दाक्षिण्येन प्रतीच्छतः।।

61

Schiller

Nicht an die Güter hänge dein Herz,
Die das Leben vergänglich zieren;
Wer besitzt, der lerne verlieren,
Wer im Glück ist, der lerne den Schmerz.

मा वित्तेषु मनो धत्स्व नश्वरद्युतिशोभिषु।
चिन्तनीयः क्षयो वृद्धौ स्मतव्यापच्च सम्पदि।।

62

Goethe

Nicht jeder wandelt nur gemeine Stege:
Du siehst, die Spinnen bauen luftge Wege.

न क्षुद्रोऽपि जनो नित्यं नीचारम्भणतत्परः।
उच्चस्थानेषु लूताभी रच्यन्ते पश्य तन्तवः।।

63

Bube

Nimmer verzage der Mensch umringt von düsteren Sorgen.
Auf das Dunkel der Nacht folget der leuchtende Tag.

चिन्तातिमिरसंछन्नो मा विषीदतु मानुषः।
उद्यतः सवितुर्ज्योतिः शर्वरीमनुषज्जते।।

Mignon's Lied

64

Goethe

Nur wer die Sehnsucht kennt,
Weiss was ich leide!
Allein und abgetrennt
Von aller Freude,
Seh ich ans Firmament
Nach jener Seite.
Ach, der mich liebt und kennt
Ist in der Weite.
Es schwindelt mich, es brennt
Mein Eingeweide.

औत्सुक्यस्यानभिज्ञः प्रणयिविरहिता यत्क्षणेऽहं न वेद
प्रोत्पश्यन्ती दिगन्तं गतनयनसुखा तुष्टिहीना स्थिताऽस्मि।
यो मां जानाति यो मां मनसि निहितवान् दूरवर्ती जनोऽसौ
भ्रान्त्याक्रान्तं शिरो मे दहति च हृदयं निर्दयः कामवह्निः।।

65

Lenau

O Menschenherz, was ist dein Glück?
Ein unbewusst geborner,
Und kaum gegrüsst, verlorner,
Unwiederholter Augenblick.

सखे हृदय पृच्छामि किम्भूतं सुखमस्ति ते।
अज्ञातजातनिर्नष्टो[1] स्वगतापगतः क्षणः।।

66

Goethe

O glücklich wer noch hoffen kann
Aus diesem Meer des Irrthums aufzutauchen!
Was man nicht hat, das eben brauchte man,
Und was man hat, kann man nicht brauchen

धन्यो य आशां न मुमोच मानुषः
प्रतारणे मोहजलस्य वारिधेः।
तत्त्वेन यद्धर्यर्थकरं न वेद्मि त-
ज्जानामि यत्तस्य फलं न विद्यते।।

67

Goethe

Säume nicht dich zu erdreisten,
Wenn die Menge zaudernd schweift;
Alles kann der Edle leisten,
Ders versteht und rasch ergreift.

प्रारभस्वाविषण्णात्मा पश्यतां जडचेतसाम्।
सर्वं शक्यमुदारेण दक्षेणाक्लिष्टकर्मणा।।

68

Derselbe

Schädliche Wahrheit, ich ziehe sie vor dem nützlichen Irrthum.
Wahrheit heilet den Schmerz, den sie vielleicht uns erregt.

वरं नाशकरं सत्यं मोहादर्थकरादपि।
सत्याज्जातं हि यद् दुःखं तत्प्रायः शाम्यति स्वयम्।।

---

1. By not going in for *ṇatva* here the translator shows his rare grammatical acumen. With √*naś* assuming the form *ṇaṣ* Pāṇini prohibits it, vide his sūtra *naśeḥ ṣāntasya*, 8.4.36

69

Schiller

Schön ist der Friede, ein lieblicher Knabe
Liegt er gelagert am ruhigen Bach,
Und die munteren Lämmer grasen
Lustig um ihn auf dem grünenden Rasen;
Süsses Tönen entlockt er der Flöte,
Und das Echo des Berges wird wach,
Oder im Schimmer der Abendröthe
Wiegt ihn in Schlummer der ruhige Bach.

Aber der Krieg hat auch seine Ehre,
Der Beweger des Menschengeschicks.
Das Gesetz ist der Freund der Schwachen,
Alles will es nur eben machen,
Möchte gerne die Welt verflachen;
Aber der Krieg lässt die Kraft erscheinen,
Alles erhebt er zum Ungemeinen,
Selber dem Feigen erzeugt er den Muth.

।। सन्धिविग्रहौ ।।

सुरम्यः सन्धिर्यः प्रियतमवपुर्बालक इव
प्रसन्नाया नद्याः सुतृणवति शेते द्रुमतटे।
गवां मध्ये प्रीतो मुखरयति वंशीं च मधुरं
लघु त्वस्मै स्वप्नं श्रवणसुभगा गायति सरित्।।
प्रशंसेयुश्चान्ये नृकलनकरं विग्रहमपि
प्रतन्वन्तं शौर्यं सकलगुणवृद्धिं विदधतम्।
वरं धर्माद्वीर्यम् अबलजनमित्रात् प्रयतते
समीकर्तुं कृत्स्नं प्रकृतिविषमं यो जगदिति।।

70

Logau

Sich selbst bekämpfen ist der allerschwerste Krieg,
Sich selbst besiegen ist der allerschönste Sieg.

आत्मनाऽऽत्मानमायोद्धुमस्ति युद्धं न तत्समम्।
आत्मानमात्मना जेतुं विजयो नास्ति तादृशः।।

Das gemeinsame Schicksal

71

Schiller

Siehe, wir hassen, wir streiten, es trennt uns Neigung und Meinung;
Aber es bleichet indess dir sich die Locke wie mir.

सदा विद्विष्वहे पश्य वाग्भिश्च विवदावहे।
जीर्यन्ति चावयोः केशाः कलहे वर्तमानयोः।।

72

Geibel

'S ist nicht allein der Wangen Pracht, die mit den Jahren flieht,
Nein, das ist's was mich traurig macht, dass auch das Herz verblüht.

न शोचामि तथा गण्डौ नश्यच्छ्रीकौ शनैः शनैः।
यथा हृदयमन्तःस्थं म्लानं ग्लानं जडीकृतम्।।

73

Rückert

Sprachkunde, lieber Sohn, ist Grundlag' allem Wissen!
Derselben sei zuerst und sei zuletzt beflissen!
Einleitung nicht allein und eine Vorbereitung
Zur Wissenschaft ist sie, und Mittel zur Bestreitung,
Vorübung nicht der Kraft, um sie geschickt zu machen,
Durch Ringen mit dem Wort, zum Kampfe mit den Sachen.

विद्योत्तमा पुत्रक शब्दशास्त्रमधीष्व तां ज्ञानमहाप्रतिष्ठाम्।
प्रस्तावनामध्ययनस्य बुद्धेर्विवर्धनीं चापि वचोऽर्थवत्त्वात्।।

Freund und Feind.

74

Schiller

Theuer ist mir der Freund; doch auch den Feind kann ich nützen :
Zeigt mir der Freund was ich kann, lehrt mich der Feind was ich soll.

वयस्यो बहु मन्तव्यो न चामित्रोप्यनर्थकः।
शक्यक्रियं दिशत्येकः कार्यं यत् त्वस्ति मेऽपरः।।

75

Vgl. Pred. Salom

Thu nur das Gute und wirf es ins Meer,
Weiss es der Fisch nicht, so weiss es der Herr.

सत्कृत्यैव यथाशक्ति क्षिप सत्कारमर्णवे।
मत्स्यो यद्यपि नो वेद वेद त्वत्कृतमीश्वरः।।

76

Goethe

Thu nur das Rechte in deinen Sachen,
Das andre wird sich von selber machen.

धर्ममाचर विश्वस्तः सर्वेषु तव कर्मसु।
व्रजतो पथि धर्मस्य ते यदिच्छसि सेत्स्यति।।

77

Bube

Trage geduldig und sanft der Menschen Gebrechen und Fehler.
Was der heute gethan, thuest du morgen wohl selbst.

तितिक्षस्व मनुष्याणां दोषांश्च स्खलितानि च।
अद्य यद्ध्यकरोदन्यस्त्वं श्वः कर्तासि तत्स्वयम्।।

78

Goethe

Wanderers Nachtlied. II.

Ueber allen Gipfeln ist Ruh,
In allen Wipfeln spürest du
Keinen Hauch;
Die Vöglein schweigen im Walde.
Warte nur, balde
Ruhest du auch.

अग्रे गिरीणां विरता प्रसन्नता
शाखासु मन्दोऽप्यनिलो न वेपते।
कृतं च मौनं विपिने पतत्रिभि-
र्मनः शनैस्त्वमपि (त्वामपि?) शान्तिरेष्यति।।

79

Derselbe

Ueber ein Ding wird viel geplaudert,
Viel berathen und lange gezaudert,
Und endlich giebt ein böses Muss
Der Sache widrig den Beschluss.

चिरं वस्तुनि कस्मिंश्चिद् वाङ्मन्त्राभ्यां विलम्ब्यते।
कुरुते निश्चयं यावदवर्ज्येतिकर्तव्यता।।

80

Derselbe

Und so lang du das nicht hast,
Dieses Stirb und Werde,

Bist du nur ein trüber Gast
Auf der dunkeln Erde.

यावच्च तव नास्त्येतन्म्रियस्व प्रतिजीव च।
भुवां (भुवि?) तिमिरभूतायां भवस्यन्ध इवातिथिः।।

81

Schiller

Und was kein Verstand der Verständigen sieht,
Das übet in Einfalt ein kindlich Gemüth.

यच्च बुद्धिमतां बुद्ध्या द्रष्टुमपि न शक्यते।
स्वैरं तदाचरत्येव बालको मुग्धमानसः।।

82

Satis

Vielen theile deine Freuden,
Allen Munterkeit und Scherz,
Wenig Edlen deine Leiden,
Auserwählten nur dein Herz.

स्वहर्षं बहुभिः सार्धं सर्वैः प्रीतिं च नर्म च।
उदारैरेव दुःखानि वृतैः स्वहृदयं भज।।

83

Schiller

Völker verrauschen,
Namen verklingen;
Finstre Vergessenheit
Breitet die dunkelnachtenden Schwingen
Ueber ganze Geschlechter aus.
Aber der Fürsten
Einsame Häupter
Glänzen erhellt,
Und Aurora berührt sie

Mit den ewigen Strahlen,
Als die ragenden Gipfel der Welt.

नश्यन्ति क्षितयो जनश्च बत रे वंशश्च नामानि च
श्यामं सम्प्रति याति विस्मृतिपथं सर्वं भुवं मानुषम्।
ईशानं तु यशांसि भान्ति विरलं शृङ्गाणि भूमेर्यथा
स्पृष्टान्यर्कमरीचिभिः समुदितैः स्मर्तव्यशोभानि च।।

84
Derselbe

Von des Lebens Gütern allen
Ist der Ruhm das Höchste doch;
Wenn der Leib in Staub zerfallen,
Lebt der grosse Name noch.

सर्वेष्विह धनेष्वाहुर्यशो धनमनुत्तमम्।
भस्मीभूते शरीरे हि पुण्या कीर्तिर्न नश्यति।।

85
Goethe

Wäre nicht das Auge sonnenhaft,
Die Sonne könnt' es nicht erblicken;
Läg' nicht in uns des Gottes eigne Kraft,
Wie könnt' uns Göttliches entzücken?

भवेन्न चेदक्षि निसर्गसौर्यं
किं सूर्यमालोकितुमुत्सहेत।
भवेत[1] दिव्यो यदि नो ममात्मा
दिव्येषु मेऽर्थेषु रतिः कथं स्यात्।।

86
Derselbe

Was du ererbt von deinen Vätern hast,
Erwirb es, um es zu besitzen.

1. The use of √ *bhū* in Ātmanepada here is questionable.

पित्र्यं ते यदभूद् वित्तं पारम्पर्यक्रमागतम्।
तत् तत्त्वेन यथा ते स्यादर्जयस्व पुरार्जितम्।।

87

Schiller

Was du vor der Minute ausgeschlagen,
Bringt keine Ewigkeit zurück.

आनीतं यन्मुहूर्तेन प्रत्याख्यातमभूत् त्वया।
न तत्कल्पसहस्रेषु प्रतिलब्धासि कर्हिचित्।।

88

Goethe

Was glänzt, ist für den Augenblick geboren;
Das Echte bleibt der Nachwelt unverloren.

यच्छोभि तत् क्षणेनैव जायते चान्तरेति च।
अन्तःसारं तु यज्जात्यं कल्पान्ते तन्न नश्यति।।

89

W. Müller

Gift und Wollust

Was schauderst du zurück vor Gift? wie selten stirbt ein Mensch daran!
Und lachst der Wollust sehnlich zu, die stündlich mordet was sie kann.

किं बिभेषि विषात् तात हन्यन्ते येन पञ्चषाः।
व्यसनानि तु पुष्णासि मारयन्ति क्षणे क्षणे।

90

K. Förste

Was vergangen, kehrt nicht wieder;
Aber ging es leuchtend nieder,
Leuchtets lange noch zurück.

यद् विनाशपथं यातं पुनरेति न तत् क्वचित्।
वर्तते तु चिरं दृष्टावस्तमेति यदुज्ज्वलम्।।

91

Cronegk

Weil sie zu leichtlich glaubt, irrt muntre Jugend oft;
Das Alter quält sich gern, weil es zu wenig hofft.

विश्रम्भातिप्रसङ्गेन भ्रान्तिं गच्छति यौवनम्।
आशातन्तुविशीर्णत्वाज्जरा दुःखेन पीड्यते।।

92

Goethe

Wem wohl das Glück die schönste Palme beut?
Wer freudig thut, sich des Gethanen freut.

कस्योपैति नरस्याङ्कं लक्ष्मीरधिकदुर्लभा।
यः करोति सुखी कर्म कृतकार्यश्च तुष्यति।

93

Gellert

Wenn deine Kunst dem Kenner nicht gefällt,
So ist das schon ein schlimmes Zeichen;
Doch wenn sie gar des Narren Lob erhält,
So ist es Zeit sie auszustreichen.

न रोचते चेद् विदुषे क्रिया ते
विप्रत्यया तं प्रति बुद्धिरस्तु।
श्रुतिं तु मूर्खस्य समाप्य चिन्त्यं
हा धिक् क्रिया मे विफलीकृतेति।।

94

Bürger

Wenn dich die Lästerzunge sticht,
So lass dir dies zum Troste sagen:

Die schlechtsten Früchte sind es nicht,
Woran die Wespen nagen.

दष्टो लोकापवादेन मा विषीदतु सज्जनः।
कुफलानि न खाद्यन्ते मक्षिकाभिरिति ब्रुवन्।।

95

W. Müller

Armuth und Freundschaft.

Wenn die Armuth durch die Thüre kommt geschlichen in das Haus,
Stürzt auch schon die falsche Freundschaft aus dem Fenster sich heraus.

यदा विशति दारिद्र्यं द्वारेण शनकैर्गृहम्।
बहिर्याति गवाक्षेण व्यलीका मित्रता क्षणात्।।

96

Schiller

Wenn die Blätter fallen in des Jahres Kreise,
Wenn zum Grabe wallen entnervte Greise,
Da gehorcht die Natur
Ruhig nur
Ihrem alten Gesetze,
Da ist nichts was den Menschen entsetze.

पतनं म्लानपत्राणां. मरणं वा गतायुषाम्।
विहितं विधिनेत्येतन्न प्राज्ञेभ्यो भयङ्करम्।।

97

Goethe

Wenn du als Jüngling deinen Vater ehrst,
So wirst du gern von ihm empfangen;

Wenn du als Mann die Wissenschaft vermehrst,
So kann dein Sohn zu höherm Ziel gelangen.

यूना त्वया यद्यभिपूज्यते पिता
सुखेन लब्धास्यमुना यदर्पितम्।
विद्यां यदा प्रोन्नयसि स्वयं नर
पुत्रस्य ते तस्य फलं भविष्यति।।

98

Derselbe

Wenn einer sich wohl im Kleinen deucht,
So denke, der hat was Grosses erreicht.

स्वल्पे वस्तुनि कस्मिंश्चित् परितुष्यति यो जनः।
अनेनैव महत् किञ्चिदवापीति मतिर्मम।।

99

Rückert

Wenn gestrauchelt ist ein Mann,
Mag er wieder sich erheben;
Dem gefallnen Weibe kann
Nichts die Reinheit wiedergeben.

स्खलितः पुनरुत्थातुं गन्तुं चोत्सहते पुमान्।
पतितां तु स्त्रियं कश्चिन्नोत्थापयितुमस्त्यलम्।।

100

Goethe

Wenn ich kennte den Weg des Herrn,
Ich ging ihn wahrhaftig gar zu gern;
Führte man mich in der Wahrheit Hans.
Bei Gott, ich ging nicht wieder heraus.

सत्पथं यदि जानीयां प्रपद्येय सुखेन तम्।
न च सत्यगृहं प्राप्य निर्गच्छेयं कदाचन।।

101

Schiller

Wenn sich die Fürsten befehden,
Müssen die Diener sich morden und tödten;
Das ist die Ordnung, so will es das Recht.

अन्योन्यं चेदसूयन्ति विद्विषन्ति च पार्थिवाः।
व्यतिघ्नन्ति प्रजास्तेषामिति धर्मो व्यवस्थितः॥

102

Herder

Wer die Sache des Menschengeschlechts als die seine betrachtet,
Nimmt an der Götter Geschäft, nimmt am Verhänguisse Theil.

अर्थं यः सर्वलोकस्य स्वार्थमिव समीक्षते।
स नरो लोकधातॄणां कुर्वन् कर्म विभाति मे।।

103

Lessing

Wer Freunde sucht, ist sie zu finden werth;
Wer keinen hat, hat keinen noch begehrt.

मित्रमिच्छति यो लब्धुं स मित्रं प्राप्तुमर्हति।
यस्य न सन्ति मित्राणि न मित्राण्यन्वियेष सः।।

104

Gleim

Wer glücklich ist, kann glücklich machen:
Wers thut, vermehrt sein eignes Glück.

भवति यः स्वयमेव जनः कृती
सुखयितुं परमप्यलमस्ति सः।

परसुखाय तु यो यतते सुखं
स्वमपि वर्धयतीति मतिर्मम।।

105

Goethe

Wer ist ein unbrauchbarer Mann?
Wer nicht befehlen und auch nicht gehorchen kann.

एतं कुपुरुषं मन्ये यो नाज्ञपयितुं स्वयम्।
न च शुश्रूषितुं वाचमन्येषामध्यवस्यति।।

106

Derselbe

Lied des Harfuers

Wer nie sein Brot mit Thränen ass,
Wer nie die kummervollen Nächte
Auf seinem Bette weinend sass,
Der kennt euch nicht, ihr himmlischen Mächte.
Ihr führt ins Leben uns hinein
Und lasst den Armen schuldig werden;
Dann überlasst ihr ihn der Pein,
Denn alle Schuld rächt sich auf Erden.

यो नाशान्नं कदाचिन्नयनजलगलो नापि दुःशर्वरीषु
भ्रष्टस्वप्नो मुमोच स्वशयनममरा नो स जानाति युष्मान्।
ये नीत्वा जीवलोकं तदनु बहुविधं कारयित्वाऽघमन्ते
क्रूराणां यातनानामुपनयथ वशं मर्त्यकीटं वराकम्।।

107

W. Müller

Wie die Biene Blumensäfte, also sammle Weisheit ein :
Ist die Blüthenzeit vorüber, wird der Blüthen Honig dein.

षट्पदा इव पुष्परसं
सञ्चिनु विद्यामनवरतं यत्नात्।
कुसुमसमये व्यतीते
मधु पुष्पाणां भविष्यति ते।

108

Schiller

Wie gross war diese Welt gestaltet,
So lang die Knospe sie noch barg;
Wie wenig, ach, hat sich entfaltet,
Dies wenige wie klein und karg!

पल्लवेन पिनद्धं यत् पुरा ऽऽसीत् सुमहाकृति।
तस्यैवाल्पकमुद्भिन्नं कृच्छ्राच्चापि तदल्पकम्।।

109

Derselbe

Wie in den Lüften der Sturmwind saust,
Man weiss nicht von wannen er kommt und braust,
Wie der Quell aus verborgenen Tiefen,
So des Sängers Lied aus dem Innern schallt
Und wecket der dunkeln Gefühle Gewalt,
Die im Herzen wunderbar schliefen.

अज्ञातस्वनजन्मभूमिरनिलः प्रोद्वाति दिग्भ्यो यथा
गूढान्निःसरति क्षरन् स्फुटजलैरुत्सो यथा गह्वरात्।
गीतं रम्यमिदम्प्रकारमुरसो गातुर्बहिः प्रोच्चरद्
भावानां स्वपतामिवान्यहृदये धत्ते समुज्जृम्भणम्।।

110

Schiller

Der Schlüssel

Willst du dich selber erkennen, so sich, wie die andern es treiben:
Willst du die andern verstehn, blick in dein eigenes Herz.

आत्मानमेव जिज्ञासुरन्येषां पश्य चेष्टितम्।
अन्यांश्चेज्ज्ञातुमिच्छा ते वीक्षस्व हृदयं निजम्।।

111

Goethe

Willst du in die Ferne schweifen?
Sieh, das Gute liegt so nah!
Lerne nur das Glück ergreifen,
Und das Glück ist immer da.

अलं दूरप्रवासेन हस्तप्राप्ये हिते सति।
श्रीः केशेषु ग्रहीतव्या श्रीश्च सन्निहिता सदा।।

112

Derselbe

Wisst ihr, wie auch der Kleine was ist? Er mache das Kleine
Recht; der Grosse begehrt just so das Grosse zu thun.

अल्पोऽपि पात्रतामेति सम्यक् कुर्वन् यदल्पकम्।
एतेनैव प्रकारेण यन्महत् कुरुते महान्।।

113

Derselbe

Wohl dem, der seiner Väter gern gedenkt,
Der froh von ihren Thaten, ihrer Grösse
Den Hörer unterhält, und still sich freuend
Ans Ende dieser schönen Reihe sich
Geschlossen sieht.

भद्रो नरो यश्चरितं पितॄणाम्
अनुस्मरन् सम्परितोषमेति।
परम्पराया रमते च पश्य-
न्नात्मानमन्तावयवं शुभायाः।।

114

Derselbe

Wohl kann die Brust den Schmerz verborgen halten;
Doch stummes Glück erträgt die Seele nicht.

शोकशल्यं समर्थोऽहमन्तरात्मनि गूहितुम्।
न तु शक्नोमि मौनेन हृदि संवरितुं सुखम्।।

115

Goethe

Wohl unglückselig ist der Mann,
Der unterlässt das was er kann,
Und unterfängt sich was er nicht versteht:
Kein Wunder, dass er zu Grunde geht.

धिक् तं नरं यो विजहाति कर्तुं
जानाति यद् यस्य तु नास्त्यभिज्ञः।
यत्नेन तत् प्रारभते विधातुं
किमद्भुतं गच्छति यद् विनाशम्।।

116

Schiller

Wüsst' ich mein Herz an zeitlich Gut gefesselt,
Den Brand würf ich hinein mit eigner Hand.

असक्तं यदि जानीयां वित्तेषु हृदयं मम।
आनीय निजहस्ताभ्यां दहेयं तानि वह्निना।

117

Derselbe

Theophanle

Zeigt sich der Glückliche mir, ich vergesse die Götter des Himmels;
Aber sie stehen vor mir, wenn ich den Leidenden seh.

सुखिनं यदि पश्यामि विस्मरामि दिवौकसः।
ते पुरो मे स्थिताः साक्षाद् दुःखिनं पश्यतो नरम्।।

118

Goethe

Zierlich Denken und süss Erinnern
Ist das Leben im tiefsten Innern.

भवनं वर्तमानानां चिन्तनं च सुपेलवम्।
स्मृतिसौख्यं च वृत्तानां तदन्तर्हृदि जीवनम्।

119

Brentano

Zum Hassen oder Lieben
Ist alle Welt getrieben,
Es bleibet keine Wahl,
Der Teufel ist neutral.

कर्तव्यौ सर्वलोकेन रागद्वेषौ ब्रवीम्यहम्।
प्रसक्ते पक्षपातित्वम् उदासीनो नपुंसकः।।

120

Goethe

Zwischen heut und morgen
Liegt eine lange Frist.
Lerne schnell besorgen,
Da du noch munter bist.

अद्य श्वश्चैतयोर्मध्ये दूरमत्यन्तमन्तरम्।
यावत् स्वस्थशरीरोऽसि कुरु यत्कार्यमस्ति ते॥

Now, some specimens of the longer Sanskrit writings of European Sanskrit scholars. Of these the first one is an Address by the eminent Polish scholar Maria Krzysztof Byrski of Poland at the Kalidāsa Samāroha at Ujjain in 2005; the second one is a detailed account by the well known Sanskrit scholar of France Pierre-Sylvain Filliozat of Sanskrit Studies in France from the beginning to the present period; the third one is a speech by Miquel Peralta of Barcelona, Spain, the founder of the Sanskrit institution, the Devavāṇī, after winning a Sanskrit speech contest organized by the Indian Council for Cultural Relations of India and the University of Heidelberg of Germany on the utility of Sanskrit for present day society; the fourth one is a *stotra*, an eulogy, in the form of an Aṣṭaka, an octavo, by Måns Broo, a Vaiṣṇava devotee of Finland with a detailed commentary in the style of the Bhāṣyas of old on his own verses and the fifth one is an exposition (only in part) of the thirty six principles of Śaivism by the young scholar Filip Rucinski of Warsaw, Poland. The reproduction of these hereunder will enable the reader to savour the different literary styles of the present day litterateurs of Sanskrit of Europe.

Maria Krzysztof Byrski, reference to whom has already been made in the context of the Sanskrit verse by Gawroński (p.8), is the senior-most Indologist of Poland. He has made significant contribution to the study of Sanskrit drama and dramaturgy. With his education in Varanasi, where he spent long years, he has picked up Sanskrit and Hindi, particularly the latter, very well. He chose to address the scholarly gathering at the Kālidāsa Samāroha at Ujjain both in Sanskrit and Hindi. The Sanskrit part of his Address that he made available to the writer of these lines is being reproduced below :

भो भो अत्रेमां नगरीमुज्जयिनीं समागता मम सनातनधर्मे ज्येष्ठा भ्रातरः!

अहं गुरुभिःकृतख्रीस्तम्भरनामधेयो यूरोपमहाद्वीपमध्यस्थपोल्स्कानाम-देशनिवास्यस्मि। तत्र वर्षावानाम्नी राजधान्यस्ति। तस्मिन्नगरे विद्यास्थानं भवति। तत्र भारतीयविद्याविभागाचार्यकार्यभारं निर्वहामि। अत्राहं शशिप्रभानामविदुष्या

भारतवर्षमामंत्रितोऽत्रेमां नगरीमुज्जयिनीं सर्वप्रथमं महाकविकालिदासेन ततस्ततः भरतमुनिना तथा तस्य मुनेर्वर्तमानकाले सुप्रियशिष्येण कमलेशदत्तत्रिपाठिनाम्नाचार्येण त्रिभिरेवाभिविनीतोऽहम्। तेभ्यः(=तान्) प्रत्यतिगम्भीरां कृतज्ञतामभिव्यक्तुकामोऽस्मि। अत्र मया सार्धमागता सहधर्मचारिणी बर्बरानाम्नी। आवामत्रभवतोऽभिवन्दावहे।

मन्मुखादभिवादनक्रमे भवन्तः सनातनधर्मे ज्येष्ठा भ्रातरः सन्तीति श्रुत्वाश्चर्यपूर्णप्रश्न उत्पद्यते—कस्मात्तथाहि तेनोक्तमिति चेत्। यदि तस्य नाम ख्रीस्तम्भरोऽस्ति तेन हि ख्रीस्तीयसम्प्रदायानुयायिना भवितव्यमनेनेति। सुष्ठु भवद्भिस्तर्कितम्। तत्किमर्थं पुनर्मयैवमुक्तं स्यात्? प्रथमं निर्देष्टव्यं मया—एकं सद्विप्रा बहुधा वदन्तीति श्रुतिः। यदि सदेकमस्ति तदैकेन तस्य स्वभावेनापि भवितव्यम्। कार्त्तिकेयानुप्रेक्षानाम-जैनग्रन्थानुसारेण 'वस्तुस्वभाव इति धर्म' एषा धर्मस्य परिभाषेति। लोको वस्तुविशेषो वर्तते तस्य स्वभावः सनातनधर्मो मन्यते। अतो यदीयं परिभाषा स्वीकरणीया तदा प्रत्यक्षरूपेण विदितं यदेकस्यास्माकं लोकस्य धर्मेणैकेन हि भवितव्यम्। ततः प्रष्टव्यं को नाम लोकस्य स्वभाव इति। तस्य स्वरूपं कीदृशम्। सर्वमेतद्यज्ञश्चैक एव यज्ञश्चेति बहुधोक्तं शतपथब्राह्मणे। यज्ञस्य कः स्वभावः केन निर्धारितश्च?

प्रजातिकामस्य पुरुषस्य प्रजापतेर्यज्ञ आत्मसमर्पणात्सृष्टिराविरभूत्। यथोक्तं श्रुतौ—"स्वयं यज्ञस्य तनूं वृधानः" (ऋग् मं. 10 सू. 72)। एवमपि निर्दिष्टं पुरुषसूक्ते। यज्ञे समर्पणस्यार्थः कः? श्रूयतां भवद्भिः यज्ञस्य परिभाषा। अथ यस्माद्यज्ञो नाम। घ्नन्ति वा एनमेतद्यदभिषुण्वन्ति तदेनं तन्वते तदेनं जनयन्ति स तायमानो जायते स यज्जायते तस्माद्यञ्जो, यञ्जो ह वै नामैतद्यद्यज्ञ इति शतपथब्राह्मणे। हन्यमानस्य हि ध्रुवो मृत्युर्वेदनाव्यथे च। पुरुषस्य प्रजापतेस्तपो नाम सृष्टिवेदनारूपम्। तेन तपसा यज्ञे पीडितः सोमरूपधारी प्रजापतिर्द्वयमनुभवति मृत्युञ्च पुनर्जीवनञ्चेति श्रुतिर्भारतानां, "शब्दस्तदग्र आसीत्। स सर्वस्रष्टुरासीत्सर्वस्रष्टा वै शब्द" इति बैबिलनाम्नि प्रसिद्धे ग्रन्थे ख्रीस्तीयसम्प्रदायस्य। अथ किमप्याश्चर्यं न भवति यत्सर्वस्रष्टृरूपः शब्दः सम्पूर्णे विश्व ऋषिभिः श्रूयते। तस्मात् प्रत्येकं श्रुतिः सार्वभौमिकी भवति। अतो भवतां श्रुतिर्मे श्रुतिस्तथा मे श्रुतिर्भवतां श्रुतिरस्ति।

अस्माकं काले पुरुषप्रजापतिर्मानवेतिहासप्रविष्टः ख्रीस्तरूपधारी संवृत्तोऽभूदिति मन्ये। यद्येवं स्यात् तर्हि कश्चिदपि सन्देहो न भवति धर्मैक्यविषये। अतः श्रुत्या प्रेरितोऽहं एकं धर्मं विप्रा बहुसम्प्रदायं वदन्तीति तात्पर्यम्। सम्प्रति युष्माभिर्ज्ञातं केन कारणेनाहं भवतः सम्बोधयामि सनातनधर्मे मम ज्येष्ठा भ्रातर इति।

भवतोऽवधानवतः प्रत्यतिगम्भीरमाभारं प्रकटीकरोमि। धन्यवादः॥

अहं हि संस्कृतभाषायां स्वाभिप्रायं पूर्णरूपेण स्वच्छन्दतया च स्वातन्त्र्येण च प्रतिपादितुं (=प्रतिपादयितुं) न समर्थोऽस्मि, तस्मात् संस्कृतस्य हिन्दीनामपौत्रीभाषायां शेषमर्थं वक्ष्ये॥

Pierre-Sylvain Filliozat, the author of the write-up in Sanskrit on 'Sanskrit in Francé' reproduced below, is one of the senior Sanskrit scholars of France[1]. A Sanskrit grammarian of note who has devoted himself to the study of the *Mahābhāsya* of Patañjali for years, he divides his time between India and France. He is the President of the Vishva Sanskrit Pratishthan of Pondicherry. The write-up being reproduced below was published in the Sanskrit magazine *Viśvabhāṣā*.[1]

1. I am indebted to Prof. Hari Dutt Sharma of Allahabad for supplying me a copy of it.

फ्राँसदेशे संस्कृतम्

संस्कृतभाषायां व्युत्पत्तिः भारतीयसंस्कृतिज्ञानस्य मूलं भवति इत्यत्र न कोऽपि विवदते। अतः भारतीयतत्त्वं संस्कृतज्ञैरेव सम्यक् ज्ञातुं शक्यते। यदा कैश्चित् यूरोपीयैः विद्वद्भिः संस्कृतभाषा अधीता प्रतिपन्ना च आसीत् तदैव यूरोपीयदेशेषु भारतीयतत्त्वस्य वैज्ञानिकदृष्ट्या आलोचना प्रारभ्यते स्म। न केवलम् ऐतिहासिकविषयेषु संस्कृतभाषाज्ञानम् आवश्यकम् अस्ति, अपितु आधुनिकतत्त्वानां यथार्थविज्ञानार्थमपि अत्यन्तोपयुक्तं भवति। न केवलम् आधुनिकसीमावच्छिन्नस्य भारतदेशस्य ज्ञानाय भवति, किंतु बृहद्भारतस्य ज्ञानाय अपि। अन्ततः अद्यतनभारतीयभाषामातृभूतायाः संस्कृतभाषायाः ज्ञानं तद्भाषाणां प्रागितिहासज्ञानार्थम् उपयुज्यते, किं च संस्कृतभाषायाः यूरोपीयभाषास्वसृतया तज्ज्ञानं भारतीययूरोपीय-सामान्यभाषायाः पुनःकल्पनार्थम् आदिमूलं भवति। अत एव भारतीयसंस्कृतेः वैपुल्येन अनर्घगुणैः च आकर्षितमनसः कुतूहलस्वभावाः केचन यूरोपदेशीयाः औत्सुक्येन संस्कृतभाषायाः अध्ययनं कुर्वन्ति।

फ्रांसदेशे संस्कृतभाषाध्ययनस्य मार्गदेशिकाः

संस्कृतभाषा इदम्प्रथमतया अष्टादशशतकप्रथमार्धे केनापि ख्रीस्तमतानुयायिना पर्याप्तम् अधीता। तस्य संस्कृतव्युत्पत्तिः कतिपयैः स्वविरचितग्रन्थैः प्रदर्श्यते। तत्समये फ्राँसदेशे वेदानां नाम श्रूयते स्म, पुस्तकानि तु न कदापि दृष्टानि आसन्। 1719 तमात् संवत्सरात् प्रभृति राजमहापुस्तकालयाध्यक्षेण "बिञों" (Bignon) इत्यभिधेन तत्पुस्तकानाम् अन्वेषणं संप्रेषणं च आज्ञापितम्। तदाज्ञां निर्वाह्य केचित् ख्रीस्तधर्मप्रचारकाः भारतदेशे निवसन्तः पुराणसंस्कृतमातृकाः लब्ध्वा आदर्शानां प्रतिरूपाणि वा अवाप्य फ्राँसदेशं तानि प्रेषयामासुः। एतानि सर्वाणि राजपुस्तकालये निधापितानि। 1739 तमे वर्षे तेषां सूचिपत्रं प्रकाशितमासीत्। इदम्प्रथमतया यूरोपीयदेशेषु संस्कृतपुस्तकानि विद्वत्सु पठनार्थम् अवेक्षणार्थं च सुलभानि आसन्। तेषु कानिचित् तेलुगुलिप्यां लिखितानि आन्ध्रदेशात् कर्णाटदेशाद् वा कल्मेतनाम्ना (Calmette) ख्रीस्तमतप्रचारकेण संगृहीतानि, कानिचित् ग्रन्थलिप्यां लिखितानि द्राविडदेशाद् अन्येन लगकनाम्ना (Legac), कानिचिद् वाङ्गीयलिप्यां लिखितानि वङ्गदेशाद् अन्येनापि पोंस्नाम्ना (Pons)। सः पोंसभिधः कुशाग्रबुद्धिः आदौ वङ्गदेशे कलिकाताराजधानीसमीपे चन्द्रनगर्यां निवसन् न पुस्तकसङ्ग्रहमात्रेण चरितार्थः,

किंतु अनल्पप्रयत्नेन संस्कृतभाषायाः अध्ययनमकरोत्। तत्समये वङ्गेषु वोपदेवकृतमुग्धबोधाख्यं क्रमदीश्वरकृतसंक्षिप्तसाराभिधं च व्याकरणं प्रचलितमासीत्। तद्देशीयात् तद्व्याकरणविदुषः कस्माच्चित् पण्डितात् संस्कृतम् अधीत्य सम्यक् प्रतिपद्य च तद् ग्रन्थद्वयम् आश्रित्य (Latin) लातिनभाषामाध्यमेन सः संस्कृतव्याकरणग्रन्थं व्यरचयत्। तस्मिन् ग्रन्थे वाङ्गीयलिपिः, संधिः, सुबन्तप्रक्रिया, तिङन्तप्रक्रिया इति विषयाः सुविशदप्रकारेण प्रतिपादिताः। सर्वाणि उदाहरणानि वाङ्गीयलिप्यां लिखितानि। ततः धातुपाठः लातिनभाषायां धातूनाम् अर्थाः च प्रतिपाद्यन्ते। ततः तस्मिन्नेव पुस्तके शतकत्रयरूपेण चाणक्यसारसंग्रहः लिख्यते। ततः अमरकोशः तस्य च लातिनभाषायाम् अनुवादः उपलभ्यते। अन्ततः वोपदेवविरचिता स्वकविकल्पद्रुमस्य टीका काव्यकामधेन्वाख्या लिख्यते। अयं ग्रन्थः 1738 वर्षे फ्राँसदेशं प्रेषितः आसीत्। 1740 तमे संवत्सरे स एव पोंसुनामा ख्रीस्तधर्मप्रचारकः दक्षिणभारतं स्वधर्मप्रचारार्थं जगाम। तत्र कारैकाळाख्यग्रामे निवसन् सः संस्कृतसाहित्यविषये संक्षिप्तरूपेण अनतिदीर्घं प्रकरणं फ्राँसीयभाषायां व्यरचयत्। अयं ग्रन्थः प्रथमं संस्कृतसाहित्यस्य यथार्थनिरूपणम् अस्ति। ततः पश्चात् सः कारकचक्रादिविषये पाणिनीयमतम् आश्रित्य प्रकरणम् स्वकृतव्याकरणस्य परिशिष्टरूपेण अकरोत्। तत् प्रकरणं फ्राँसीयभाषायां विरचितम्, संस्कृतोदाहरणानि तेलुगुलिप्यां लिखितानि। द्राविडेष्वपि तेलुगुलिपिः प्राचुर्येण प्रयुज्यते स्म। अनेन तद्देशीयपण्डितस्य साहाय्येन संस्कृताध्ययनं कृतम् इति सूच्यते। 1772 तमे संवत्सरे अयं परिशिष्टः फ्राँसदेशं प्रेषितः आसीत्। अतः अष्टादशशतकस्य द्वितीयार्धे ऋग्वेदादिरामायणमहाभारत-पुराणधर्मशास्त्रकाव्यनाटकादीनि संस्कृतपुस्तकानि तथा व्याकरणकोशादिरूपा संस्कृतभाषाशिक्षणसाधनसामग्री फ्राँसदेशे उपलभ्यन्ते स्म।

भारतीय-यूरोपीय-भाषाणां तुलनाश्रयविमर्शारम्भः

अष्टादशशतकस्य मध्यमभागे अन्यः फ्राँसीय-ख्रीस्तधर्मप्रचारकः संस्कृताध्ययनम् अकरोत्। सः कर्दुनामा (Coeurdoux) द्राविडेषु पुदुच्चेरिनगर्यां निवसन् स्वधर्मप्रचारकार्यं निरवहत्। तथापि कुतूहलवशाद् स भारतीयसंस्कृतिविषये विशेषतः भारतीयसनातनधर्मे संस्कृत-भाषातत्त्वे च विमर्शं करोति स्म। तेन संस्कृतलातिनभाषयोः कतिपयानां पदानां सादृश्यम् आलोचितम् आसीत्। एतादृशं सादृश्यं प्रथमतः षोडशशतके इतालीययात्रिकेन ससेत्तिनाम्ना (Sassetti), ततः अन्यैः यात्रिकैः अवेक्षितम्। कर्दुमहाशयेन अग्रतरम् उत्क्रममाणेन भारतीय-यूरोपीयप्रागैतिहासिका सामान्यभाषा अनुमीयते स्म। न केवलं संस्कृत-ग्रीक-लातिनपदानां, किंतु तासां भाषाणां व्याकरणानाम् अपि सादृश्यम् अस्ति। संस्कृतग्रीकयोः एकवचनद्विवचनबहुवचनविभक्तयः विद्यन्ते, संस्कृतलातिनयोः सदृशाः प्रत्ययाः त्वतलादयः विद्यन्ते, ग्रीकभाषायां संस्कृते इव लुङि अडागमः विद्यते इत्यादि सादृश्यं दरीदृश्यते। कस्मात् कारणात् तत् सादृश्यम्? संस्कृतग्रीकलातिनभाषाणाम् अन्यासां च यूरोप-एशियाद्वीपयोः संभाषितानां समानप्रकृतिः अभवद् इत्युत्तरम्। यथा

संस्कृतभाषा परस्परसादृश्यवतीनां हिन्दीमराठ्यादिभाषाणां माता भवति, तथा काचित् प्रकृतिभूता भाषा सर्वासां परस्परसादृश्यविशिष्टानां भारतीय-यूरोपीयभाषाणां माता स्याद् इत्यनुमानम्। एतत् कर्दुमहाशयेन 1767 तमे संवत्सरे लिखितम् आसीत्। 1786 तमे वर्षे तदेवानुमानं विल्यम् जोन्स (William Jones) महाविदुषा अपि प्रकाशितम्। एकोनविंशशतके जर्मनीयेन भाषातत्त्वविदुषा बोपनाम्ना (Bopp) भारतीययूरोपीयभाषाणां सादृश्यनिरूपणं कात्स्न्र्येन निर्वर्तितम्।

भारतीयेतिहासारम्भः

एते फ्राँसीया विद्वांसः न संस्कृतभाषायां स्वयं शिक्षिताः। ते भारतीयपण्डितान् अभिगम्य तेभ्यः विद्यां लभन्ते स्म। ते संस्कृतपण्डिताः के इति दौर्भाग्यवशात् न जानीमः। तथापि द्राविडभाषाविषये ज्यौतिषशास्त्रविषये च फ्राँसीयविदुषाम् एकः उपाध्यायः स्मर्यते। तस्य नाम मरीदास पिळळै। सः द्राविडेषु 1721 तमे संवत्सरे जातः पुदुच्चेरिनगर्यां निवसन् ख्रीस्तमतग्रहीता द्राविडी—फ्राँसीय—लातिनभाषासु विशारदः फ्राँसीयविदुषां परिचयं कृत्वा द्राविडीभाषां तान् अशिक्षयत्, द्राविडीलेखानां च अनुवादं तेषां कृते अकरोत्। विशेषतः भागवतमहापुराणस्य द्राविडीभाषान्तरं तेन फ्राँसीयभाषायां कृतम् आसीत्। तद्ग्रन्थस्य फ्राँसदेशे काचित् प्रतिकृतिः दगिञनाम्नः (Deguignes) इतिहासविदुषः हस्तम् आगता। तत्रस्थं राजवंशानुवर्णनं पठित्वा चन्द्रगुप्तनाम उपलभ्य ग्रीकपुरातनग्रन्थेषु उपात्तं "सन्द्रकोत्तस्" इति नाम स्मृत्वा (Seleucos Nicator) प्रथमसेलकस् निकतोर् ग्रीकसम्राट्समकालिकतया तत्रोपात्तं तन्नाम अवेक्ष्य ग्रीकसम्राजः कालं ज्ञात्वा सः दगिञ् इतिहासज्ञः मौर्यवंशोद्भवचन्द्रगुप्तसम्राजः शासनकालं ख्रीस्तपूर्वीयचतुर्थशतकान्त-भागत्वेन निरधारयत्। एतां समकालीनताम् आश्रित्य भारतस्य पुरातनेतिहासस्य कालनिरूपणम् ऐतिहासिकैः प्रतिष्ठापितम्। सर्वमेतद् दगिञ् महाशयेन 1772 तमे संवत्सरे परीस्नगरे (Paris) फ्राँसीयप्रमुखविद्याप्रतिष्ठाने प्रकाशितम् आसीत्। तदवसरे सः मरीदासपिळळैमहाशयेन दत्तमंशं प्रत्यभिज्ञाय तं भारतीयविद्वांसं संमानयामास। तद्भागवतपुराणस्य फ्राँसीयभाषान्तरं 1788 तमे वत्सरे परीस्नगरे प्रकाशितम्।

तत्समकालिकताप्रकटीकरणं महत्वपूर्णम्। तेन भारतस्य इतिहासः पाश्चात्य-देशीयानाम् इतिहासेन सह संवध्यते स्म। ततः परं तत्प्रकटीकरणमाश्रित्य इतिहासविषये तादृशनवीनविमर्शप्रणाली प्रचलिता अभवत्। किं च भारतस्य इतिहासः पाश्चात्यदेशानाम् इतिहासश्च एकीक्रियेते स्म। तद् विश्वेतिहासस्य प्रारम्भः आसीत्। एवं 1772 तमः संवत्सरः भारतवैज्ञानिकेतिहासस्य जन्मसमयः, पुदुच्चेरीपरीस्-नगरीद्वयं जन्मस्थानम्। अष्टादशशतकीयाः (Dupleix) दुप्लेक्सादिफ्राँसीयशासकविजयाः अद्य स्मरणमात्रं गताः। वैज्ञानिकतत्त्वप्रकटीकरणं तु न कालक्रमेण परिवर्तनीयम्। तस्य प्रथमसंस्कारः पुदुच्चेरीनगर्यां भारतीयपण्डितेन निष्पादितः, तन्निवृत्तिस्तु परीसनगर्यां फ्राँसीयविदुषः कार्यम् आसीत्। अतः तस्य उद्भवनिमित्तं तयोः सहोद्योग एव, आ च भारतीयतत्त्वविमर्शारम्भकालात् भारतीयफ्राँसीयविदुषां सहकारिता आसीत्।

अष्टादशशतके केषांचित् फ्राँसीयानां ज्योतिर्विदां भारतीयज्यौतिषशास्त्रे महानादर उदभूत्। तस्यैव मरीदासपिळळैविदुषः उपदेशेन ते तच्छास्त्रस्य परिचयं लब्धवन्तः। तेषु लजँतिनामा (Legentil) (1725-1792) फ्राँसदेशराजेन सूर्यशुक्रयोगपरिलोचने नियुक्तः सन्, तदनुकूलत्वेन दशमस्याक्षांशस्य परिसरे तत्कार्यं निर्वर्तयितुमिच्छुः 1760 तमे संवत्सरे पुदुच्चेरीपुरीं प्रति प्रास्थित। सूर्यशुक्रयोगः 1761 तमे वत्सरे अवर्तत किन्तु युद्धप्रयुक्तसंक्षोभवशात् तत्समयात् पश्चादेव प्राप्तवान्। स एव योगः 1768 तमे वत्सरे पुनरागच्छति स्म। तत्समये स ज्योतिर्विद् अनुरूपस्थाने सज्जीकृतः आसीत्। दैववशात् अम्बरस्य मेघाच्छन्नत्वात् स तद्योगं परिलोचयितुं नाशकत्। तथापि तस्य स्वल्पैव हानिरासीत्। वर्षसप्तकं यावत् सः कुतूहलवान् वैज्ञानिकदृष्टिशक्तिसमन्वितः विद्वान् प्रायेण पुदुच्चेरीपुर्यां निवसन् न केवलं ज्योतिर्विद्याक्षेत्रे परिलोचनानि अकरोत्, किन्तु अन्येष्वपि क्षेत्रेषु भारतीयसमाजे भारतीयधर्मे तत्रानुष्ठितोत्सवादिकर्मसु देवमन्दिरेषु देवदासीनर्तनादिकलासु चापि। विशेषतः भारतीयज्यौतिषशास्त्रम् अधीतवान् सः। संस्कृतद्राविडीभाषयोः अध्ययनम् स न अकरोद् इति भाति। तथापि मरीदासपिळळै-मलैयप्पनामभ्यां विद्वद्भ्यां पञ्चाङ्गादिज्यौतिषिकविषयाणां यथार्थज्ञानं प्राप्तवान्। फ्राँसदेशं प्रत्यागत्य 1779 तमे संवत्सरे 'भारतीयसमुद्रेषु सूर्य-शुक्रयोगसमये कृता यात्रा' इत्याख्यं स्वकृतालोचनसङ्ग्रहभूतं महत्परिमाणं पुस्तकं फ्राँसीयभाषायां स प्राकाशयत्।

मरीदासपिळळैपण्डितः ज्यौतिषसंग्रहरूपं ग्रन्थं फ्राँसीयभाषायां स्वयमेव व्यरचयत्। दैववशात् स ग्रन्थः न कदापि मुद्रितरूपेण प्रकाशितः अभूत्। स फ्राँसीयराजपुस्तकालये रक्षितः सन् काले काले कतिपयैः विद्वद्भिः अवेक्षितः पठितश्च आसीत्। एवं नवीनं यथार्थं च भारतीयज्यौतिषशास्त्रस्य निरूपणम् अष्टादशशतके एव फ्राँसीयज्यौतिर्विदाम् उपलभ्यते स्म। तस्मिन् काले बयीनामा (Bailly) (1736-1793) ज्योतिर्विद्यायां विशारदः महाशयः महायशाः विद्वान् परीसनगर्यां निवसन् तन्निरूपणमाश्रित्य भारतीयज्यौतिष-शास्त्रविषये 1787 तमे वर्षे 'भारतीयस्य पूर्वीयस्य च ज्यौतिषशास्त्रस्य इतिहासः' इत्याख्यं ग्रन्थश्रेष्ठं प्राकाशयत्। स एव महाविद्वान् धैर्यादिगुणसंयुक्तः फ्राँसीयमहाक्रान्तिसमये 1793 तमे वत्सरे क्रूरैः शासकैः शिरश्छेददण्डाय आदिष्टः आसीत्।

एवं संस्कृतशास्त्रेषु ज्यौतिषं प्रथमतः यूरोपखण्डे फ्राँसद्वारा प्रसिद्धिमाप। संस्कृतभाषा तु द्वित्रिविदुषामेव ज्ञाता। केषांचित् संस्कृताध्ययनेच्छा तीव्रतमा। प्रतिकूलनिमित्तवशाद् धैर्यहीनतावशाद्वा मानवीयदुर्बलतावशाद्वा ते न चरितार्था आसन्। कश्चित् ख्रीस्तमतप्रचारकः संस्कृतोपाध्यायम् उपगम्य भारतीयपारम्परिकप्रणाल्या संस्कृताध्ययनं प्रारब्धवान्। तत्काले काचित् तद्भिन्नप्रणाली नाश्रयितुं नापि परिकल्पयितुं वा शक्या। तात्कालिकप्रणाल्यनुसारेण शिष्येण भूमौ उपवेशनं कर्तव्यम्। किन्तु तस्य फ्राँसीयशिष्यस्य जानुसंध्योरशिथिलत्ववशाद् भूम्युपवेशनेन जङ्घयोः महती वेदना आसीत्। तदेव तस्य संस्कृताध्ययनविच्छेदस्य कारणम्।

कश्चित् फ्राँसीयः पूर्वीयभाषाविद्वान्

कश्चित् युवकः अँक्तील्दपेरोंनामा (Anquetil-Duperron) (1739-1804) कुशाग्रबुद्धिः महाधैर्यगुण-समन्वितः पूर्वीयभाषाणाम् अध्ययने तीव्रेच्छयाविष्टः विंशतिवर्षवयस्कः लातीन-ग्रीक-हेब्राईक-अरबीक-पारसीक-भाषासु विशारदः अभवत्। ततः 'जेन्द' नाम्न्याः (Zend) पुरातनपारसीकभाषायाः संस्कृतभाषायाश्च अध्ययनार्थम् अवेस्तानाम्नः (Avesta) पुराणपारसीकधर्मग्रन्थस्य वेदानां च साक्षात्करणार्थं तत्काले यूरोपीयदेशेषु तेषां ग्रन्थानां नाममात्रस्य श्रुतत्वात् स भारतदेशं प्रति गन्तुमैच्छत्। तत्कालिकराजशासनसकाशाद् राजादेशं पाथेयादियात्रासाधनं च स प्रार्थयते स्म। तस्य प्रार्थनापत्रस्य न किमपि उत्तरं तेन प्रतिगृहीतम्। औत्सुक्यवशात् स राजादेशं बिना सहायरहितः निर्धनः प्रस्थातुं निरणैषीत्। पुदुच्चेरीप्रेषितां सेनां समुपागम्य प्राकृतसैनिकत्वेन दैवमात्रे आत्मसमर्पणं कृत्वा नवीनविज्ञानलाभेच्छामात्रेण प्रेरितः रहसि 1754 तमे संवत्सरे स प्रास्थित। तस्य हेब्राईकादिभाषोपाध्यायः प्रकीर्तितविद्वान् प्रभावगौरवोपेतः बर्थेलमीनामा (Barthélemy) तस्य साहसप्रस्थानं विदित्वा राजशासनम् उपगम्य तत्कृते सैनिककर्मविमुक्तिं धनरूपसाहाय्यं च प्राप्तवान्। अँक्तील्दपेरों 1755 तमे वर्षे पुदुच्चेरीपुरीम् आसादितवान्। आधुनिकपारसीकभाषाम् अधीत्य स वङ्गेषु चन्द्रनगरं जगाम। तत्र संस्कृताध्ययनं प्रारब्धवान्। किन्तु फ्राँस-इंग्लण्ड-देशयोः युद्धमुदभूत्। चन्द्रनगरं इंग्लण्डदेशीयैः निरुद्धम् आक्रमितं च। स युवकः विद्वान् पलायनं कृत्वा, दिनशतं यावत् पादयात्रां कृत्वा, महासंकटेष्वपि देशान् अवेक्ष्य, देवालयानां दर्शनं लब्ध्वा, तच्चित्राणि लिखित्वा च नानाविधानि वस्तूनि संप्रेक्ष्य व्याधिसंपीडितः पुदुच्चेरीपुरीं प्रत्यगच्छत्। ततः केरलराज्यं गत्वा कर्णाटकमहाराष्ट्रराज्याभ्याम् निष्क्रम्य एलफाण्टा-एल्लोरा-इत्यादिगुहा-रूपविहारदेवमन्दिराणि दृष्ट्वा तत्स्थानानां केषांचिद् देवविग्रहाणां च यथार्थानि आलेख्यानि कृत्वा, शिलाशासनानि अवेक्ष्य पुराणलिपिज्ञानाभावात् पठनेऽसमर्थः सन् तेषां यथार्थप्रतिकृतीः लिखित्वा, अन्ततः सूरतनगरं प्राप। तत्र निवसन् दस्तूराख्येभ्यः अवेस्टाभाषापण्डितेभ्यः तद्भाषाध्ययनम् अकरोत्। 1762 तमे वर्षे स फ्राँसदेशं प्रत्यावर्तत। तत्र आयुःशेषं यावत्अवेस्टाध्ययनतत्परोऽभूत्। प्रथमतः स्वयात्रानिरूपणम् आत्मदृष्टानां नानाविधदेशमन्दिरवस्तूनां निरूपणं च अवेस्टाधर्मग्रन्थस्य फ्राँसीयभाषायाम् अनुवादं च 1771 तमे वर्षे स प्राकाशयत्। ततः धर्मशास्त्रेतिहास-वणिक्व्यापारविषयेषु स पुस्तकानि व्यरचयत्। अन्ततः स उपनिषदां लातीनभाषायाम् अनुवादम् अकरोत्। भारतदेशे अल्पकालं निवसता तेन संस्कृतमध्येतुं न शक्यते स्म। तदनन्तरमेव फ्राँसदेशे संस्कृताध्ययने स प्रयासम् अकरोत्। तथापि उपनिषदां संस्कृतग्रन्थः न तेन अधीतः, पारसीकभाषान्तरात् तु तेन लातीनभाषायाम् अनुवादः कृतः। तत्पारसीकभाषान्तरं सप्तदशशतके भारतदेशे एव दाराशिकोहाभिधेन (1617-1659) तुरुष्कराजकुमारेण तदादेशेन वा कृतम् आसीत्। तद्भाषान्तरं नाक्षरशः मूलग्रन्थम् अनुवदति, किन्तु अनतिविस्तरेण वृत्तिरूपेण उपनिषद्विषयान्

निरूपयति। तस्यां वृत्तौ अद्वैतवेदान्तमीमांसा प्रायेण अवलम्ब्यते। अँक्तील्दपेरोंविदुषः लातीनानुवादः 1804 तमे वत्सरे प्रकाशितः अभूत्। एवं तत्समये भारतीयतत्त्वज्ञानसारः यूरोपखण्डे कतिपयतत्त्वविमर्शकानां ग्राह्यः अभवत्। अयं ग्रन्थः गाम्भीर्याद् दुर्ग्राह्यः भवति। सौष्ठवाद् भारतीयतत्त्वविद्यायाः यथार्थनिरूपणं कृत्वा तस्याः औन्नत्यं सम्यग् दर्शयति। अँक्तील्दपेरों महापाण्डित्यसंयुक्तः भारतीयसंन्यासीव धैर्यवैराग्यादिगुणसमन्वितश्च आसीत्। अन्येषां समकालिकानां भारततत्त्वविमर्शकानां (Indologists) खीस्तधर्मप्रचारः ज्यौतिषादिवैज्ञानिकविषये विमर्शो वा प्रधानव्यापार एव। तेषां भारततत्त्वविमर्शः (Indology) उपसर्जनवृत्तिः आसीत्। अँक्तील्दपेरोंविद्वान् तु अवेस्टीकसंस्कृतादिभाषाध्ययने भारतीयतत्त्वविद्याप्रतिपत्तौ भारतीयसमाजविज्ञाने च तत्पर एव। तस्य न किमपि व्यापारान्तरम् अभवत्। तस्य एकैव वृत्तिः आसीत्-भारततत्त्वविमर्शः। तस्य वैज्ञानिकदृष्टिः प्रशंसार्हा। स स्वविमर्शप्रकारं स्वयमेव न्यरूपयत्। विमर्शविषयः मानव एव। ज्योतिषां स्थानानि परिमापितानि, समुद्रगभीरता आकलिता, विश्वभूगोलः परिक्रमितः, तस्याकृतिः निरूपिता, प्रकृतेः तत्कार्याणां च रहस्यानि प्रकटीकृतानि, तस्याः परिणामनियमाः विज्ञाताः। सर्वमेतद्विज्ञानं मानवस्य कृते उदभूत्। किन्तु स एव मानवः अद्यापि अज्ञातः भवति। तस्मात् मानव एव प्रमेयं भवितुमर्हति। केन प्रमाणेन, केन परीक्षाप्रकारेण स आलोचितव्यः। द्वे परीक्षे विद्येते। एका तस्य स्वभावस्य परीक्षा—मानवः परमार्थतः किं भवितुमीहते। द्वितीया तद्व्यापाराणां परीक्षा—मानवः इह संसारे कः। तत्त्वज्ञानं (Philosophy) प्रथममार्गम् अनुसृत्य मानवसंस्थानं प्रतिपादयति, तस्य शक्तीः सामर्थ्यं च निरूपयति, ताः व्यष्टिसमष्टितया आलोच्य ताभिः प्रयोज्यानि कार्याणि संगणयति। एवं परिकल्पितो मानवः कृत्रिमः, स्वयंप्रेरितः पुरुषविग्रह इव अल्पसंख्यानां चेष्टानाम् अनुष्ठाने समर्थः, न तु स्वाभाविकजीवनोपेतमनुष्य इव विचित्रकार्यसमर्थः। द्वितीयमार्गम् अनुसृत्य ऐतिहासिकदृष्ट्यवलम्बिनी परीक्षा अन्यप्रकारेण व्याप्रियते। तया मानवस्य वास्तविकव्यवहारः निरूप्यते। सा मानवस्य परिणामान् व्यापारान् च कालक्रमेण दर्शयति। ऐतिहासिकविमर्शः द्विविषयः—वृत्तान्तविषयः मतविषयश्च। वृत्तान्ताः विचित्राः प्रायेण रागमोहप्रयुक्ताः। तद्गतलेख्यप्रमाणान्यपि तत्कालरागैः प्रभावितानि। स्वैरेण संबद्धानां तादृशघटनानाम् इतिहासः न मानवस्वभावविषये किमपि बोधयति। मानवकल्पितानां मतानाम् इतिहासस्तु मानवतत्त्वं स्थिररूपतया प्रतिपादयति। यत् मानवेन स्वकल्पिताय धर्माय व्याप्रियते, तत् स्थिरतरं भवति। तद्विषये इतिहासविमर्शकः असंदिग्धपारम्परिकानि मतादीनि संगृह्य मानवस्य पारमार्थिकस्वरूपम् अवगन्तुं शक्नोति। किंच वाचनिकविज्ञापनं क्वचित् क्वचित् न विश्वासार्हम्। अत एव प्रायेण लिखितग्रन्थानवलम्ब्य असंदिग्धतत्त्वम् अवगन्तव्यम्। पुस्तकसंग्रहः, भाषाध्ययनं, व्याकरणकोषविरचनं, ग्रन्थकालनिर्णयः, ग्रन्थविकाराणां कालनिर्णयः, पुराणमन्दिराणाम् अवेक्षणं तेषां च कालनिर्णयः तत्तन्मतानुयायिनां जनानां तन्निवासदेशानां च ज्ञानं, तच्चेष्टायात्रानिवासपरिवर्तनानां ज्ञानम् इत्यादयः इतिहासविमर्शकस्य व्यापाराः। तादृशनानाविधव्यापारार्थं भारतीयजनानां

सङ्गः आवश्यक एव। यूरोपीयविमर्शकेन भारतदेश एव गन्तव्यः तत्र निवसन् देशान् जनान् च अवेक्ष्य पण्डितान् उपगम्य तेभ्य एव भाषा, साहित्यं, तत्त्वज्ञानं, वर्णाश्रमधर्मः इत्यादिविषयान् अधीत्य वैज्ञानिकदृष्ट्या नवीनज्ञानं लब्धुं शक्नोति सः।

भारतदेशे फ्राँसीयविमर्शकेन्द्रम्

सर्वमेतत् स्वकृत-'अवेस्टा'-अनुवादप्रस्तावनायाम् अँक्तील्दपेरोंविदुषा प्रतिपादितम् 1771 तमे वत्सरे च प्रकाशितम्। एवं स विद्वान् सर्वेषां यूरोपीयानां भारततत्वविमर्शकानाम् आदर्श एव। तथापि एकोनविंशशतके स प्रायेण विस्मृतः। केचिद्विद्वांसः बर्नुफ्- बेर्गेञ्ञ्आदयः (Burnouf, Bergaigne) संस्कृताध्ययनं कृत्वा प्रायेण बौद्धसाहित्यादिविषये वेदक्षेत्रे च विमर्शम् अकुर्वन्। किन्तु ते न भारतदेशं नापि फ्राँसीयशासनाधीनां पुदुच्चेरीपुरीं गतवन्तः। भारतीयसंस्कृतपण्डितैः न तेषां सङ्गतिः आसीत्। विंशशतके वर्षशतविच्छेदादनन्तरं तैः सङ्गः पुनरुज्जीवितः। पूर्वीयदेशे स्थायिनः विमर्शकेन्द्रस्य प्रतिष्ठापनेन स सङ्गः सुकरीकृतः। तथाहि 1901 तमे संवत्सरे व्येतनम् देशे (Vietnam) ह्नोय् नगरे (Hanoi) फ्राँसीयः दूरपूर्वीयदेशविमर्शालयः (Ecole Française d' Extrême-Orient) प्रतिष्ठापितः। तत्समये व्येत्नम्-लोस्-कम्बोजदेशाः फ्राँसीयशासनाधीनाः। अत एव तत्केन्द्रं तत्र प्रतिष्ठापितम्। किंच कम्बोजदेशे पुरा बहवो बृहत्परिमाणाः शिवविष्ण्वादिदेवालयाः प्रभविष्णुभिः कम्बोजराजैः निर्मापिताः, संस्कृतकाव्यमयानि शिलाशासनानि लिखितानि च। तस्य केन्द्रस्य प्रधानं प्रयोजनं बृहद्भारतसंस्कृतेः अध्ययनमेव। तथापि तस्मात् केन्द्रात् केचिद् विमर्शकाः संस्कृताध्ययनार्थं भारतं जग्मुः। तेषु फुषेनामा (Foucher) विद्वान् (1865-1952) अफ्घनिस्तानदेशे भारतस्य वायवीयभागे नैकाः अन्वेषणयात्राः अकरोत्। पुराकलाविद्याक्षेत्रे (Archaeology) स 'गान्धारेषु ग्रीक-बौद्ध-शिल्पकला'—इत्यादिग्रन्थप्रकाशनेन भारतीयशिल्पेतिहासप्रारम्भकालस्य तात्कालिकबौद्धशिल्पवैशिष्ट्यस्य ज्ञानं प्रागमयत्। तस्य संस्कृतभाषायां प्रबला व्युत्पत्तिः। बौद्धदर्शनविषये संस्कृतसाहित्ये संस्कृतशास्त्रेष्वपि बुद्धचरित-तर्कसङ्ग्रहानुवादादिग्रन्थश्रेष्ठान् स व्यरचयत्। भारतदेशे संस्कृतपण्डितान् उपगम्य तेभ्य एव शास्त्राणि अधीत्य पश्चात् परीस्नगरीविश्वविद्यालये संस्कृतोपाध्यायः भूत्वा भारतीयपण्डितरीत्या लघुकौमुदी-तर्कसङ्ग्रहादिग्रन्थविवरणेन संस्कृतशिक्षणं शास्त्राध्ययनं च सोऽकरोत्। पुराशिल्पकलाविद्या-संस्कृतशास्त्राध्ययनयोः विशारदीभूतः स विद्वान् एतत् प्रादर्शयद् यत् संस्कृतभाषायाः संस्कृतशास्त्राणां च ज्ञानं शिल्पमन्दिरादि-सांस्कृतिकाखिलविभूतिविज्ञानस्य मूलभूतमेव।

अन्यदपि तत्त्वं तेन व्यञ्जितम्। संस्कृतभाषा शिष्टप्रयुक्ता भाषा। शिष्टश्च शास्त्रज्ञः। संस्कृतशब्दाः पाणिनीयादिव्याकरणव्युत्पादितत्वात् संस्कृतत्वविशिष्टाः। प्रधानानि शास्त्राणि त्रीणि—व्याकरण-मीमांसा-न्यायाः। वैद्यज्यौतिषसांख्ययोगतन्त्रादिशास्त्राणि अन्यान्यपि बहूनि सन्ति। सर्वेषां तेषां प्रतिपादनमाध्यमं प्रधानतः संस्कृतभाषा। शास्त्रिकतत्त्वप्रतिपादनार्थम् अनन्तसंख्याः पारिभाषिकशब्दाः नवीनाः नवीनाः

वाक्यरचनरीतयश्च काले काले संस्कृतभाषायां निवेशिताः। शास्त्रमाध्यमत्वात् संस्कृतभाषायाः संस्थानं शैली च विशिष्टा भवति। अत एव पाणिनीयादि-पारम्परिकव्याकरणज्ञानं विना नानाविधशास्त्रज्ञानं विना च संस्कृतभाषाव्युत्पत्तिः नास्ति।

फ्राँसदेशे संस्कृताध्ययनकेन्द्राणि

अधुना सर्वं तत् मनसि धृत्वा केचित् फ्राँसीयाः भारततत्त्वविमर्शकाः भारतीयसंस्कृतिज्ञानप्रगतिं, मानवबुद्धेः तत्कार्यागतानां ज्ञानसंवर्धनं स्वमतिकुशलतावृद्धिं च प्रयोजनीकृत्य प्रायेण संस्कृतपण्डितेभ्यः संस्कृतभाषायाः कस्यचित् शास्त्रस्य अध्ययने प्रयासं कुर्वन्ति। फ्राँसदेशे तदध्ययनार्थम् एतानि केन्द्राणि वर्तन्ते—

अध्यापनकेन्द्राणि—विश्वविद्यालयाः 'Universités de Paris III, Paris IV, Aix, Lyon, Strasbourg, Lille'। तत्र प्राथमिकसंस्कृतशिक्षणम्।

उत्तमकक्षविमर्शाभ्यासकेन्द्रम् 'Ecole pratique des hautes études'। तत्र न कोऽपि पदवी-वयो-राष्ट्रीयतारूपेण शिष्याणां प्रवेशनियमः। इतिहास-भाषाज्ञानग्रन्थालोचन-पुराकलातत्त्वान्वेषणादिक्षेत्रेषु प्रायेण अनधीतविषयेषु नवीनप्रकटीकृतार्थानां प्रदर्शनं क्रियते, विशेषतश्च विमर्शशैली शिक्ष्यते। संस्कृते किंचिद् व्युत्पन्नानां विद्यार्थिनां कृते पाणिनीयव्याकरणादिशास्त्रविषयाः शिलाशासन-हस्तलिखितमातृका-पठनप्रक्रिया वेदादिग्रन्थविवरणं भारतीय-यूरोपीयभाषातुलनावलम्बिभाषाविज्ञानं च शिक्ष्यन्ते।

फ्राँसीयप्रधानविद्यालयः 'Collège de France'। एष फ्राँसदेशे सर्वेभ्योऽन्येभ्यः उत्तमकक्षः विमर्शालयः। तत्र संस्कृतोपाध्यायपदं 1814 तमे वर्षे प्रतिष्ठापितम्। तत्र दगीञ-बर्नुफ्-सिल्वेंलेवि-नामानः (Deguignes, Burnouf, Sylvain Lévi) महाविद्वांसः पूर्वदेशीयानां संस्कृतीनां विज्ञानस्य प्रगत्यै स्वं स्वम् अंशं महिमपूर्णं दत्तवन्तः उपदिष्टवन्तश्च।

विमर्शमात्रकेन्द्राणि—दूरपूर्वीयदेश-फ्राँसीयविमर्शालयः 'Ecole française d' Extrême-Orient'। तस्य बह्व्यः शाखाः पुदुच्चेरीपुर्यां पुण्यपत्तने थय्लण्ड-कम्बोज-इन्दोनेसिया-जापानादिदेशेषु वर्तन्ते।

फ्राँसीय-भारततत्त्व-विमर्शकेन्द्रम् 'Institut français d' Indologie'। एतत् 1955 तमे वर्षे जँ फिलियोजनाम्ना (Jean Filliozat) अस्मत्पितृमहाशयेन प्रतिष्ठापितम्। तत्र व्याकरणशास्त्र-शैवसिद्धान्तविषये प्रायेण भारतीयपण्डिताः विमर्शं कुर्वन्ति।

विमर्शक्षेत्रादन्यत्र संस्कृतस्य नाममात्रं ज्ञातम्। तथापि फ्राँसदेशे बहूनां व्युत्पन्नजनानां भारतीयसंस्कृतौ महानादरः अस्ति। भारतीयनाट्यसंगीतादिकलासु बहूनां रुचिः अस्ति। बहुभिः आयुर्वेदीयौषधानि प्रयुज्यन्ते, योगासनाभ्यासः क्रियते च। तेषु केचित् कुतूहलवशात् प्राथमिकसंस्कृतप्रतिपत्तये किंचित् प्रयतन्ते। फ्राँसदेशे संस्कृताध्ययनं प्रायेण भारतपुरातनसंस्कृतिविमर्शमनुसरति। भारतीयाधुनिकसंस्कृतिविषये संस्कृतपुस्तकानि विरलानि। येषाम् आधुनिकसंस्कृतिमात्रे कौतुकम्, ते संस्कृतम् उपेक्षन्ते। सा परिस्थितिः

परिवर्तनीया। यदि आधुनिकविषयान् विशेषतः वैज्ञानिकविषयान् अधिकृत्य संस्कृतभाषा साधारणतः प्रयुज्यते, तस्याम् आदरातिशयः भविष्यति। पुरा शास्त्रप्रतिपादनमाध्यमत्वेन संस्कृतं स्ववैशिष्ट्यं प्राप। अधुना आधुनिकविज्ञानप्रतिपादनमाध्यमीकरणेन तद्वैशिष्ट्यं रक्षितुं शक्यते।

आधुनिकसमाजे संभाषणसंस्कृतस्य उपयोगिता

It was in 2002 that Kasa Asia, the Asia House, at Barcelona, an institution started by the Federal Govt. of Spain and its Catalunya Provincial Govt. had appointed the well-known Sanskrit scholar Oscar Pujol as the Director of its Educational Programme, a post he occupied till 2007 after which he moved over to Delhi to take up his new assignment of Director of Instituto Cervantes Neuva, Delhi, the Spanish Cultural Centre, Delhi. Since Pujol is a Sanskritist, he started a Sanskrit teaching programme in the institution (Asia House). A gentleman of the name of Miquel Peralta joined this programme in 2004 and studied Sanskrit with him for three years—up to 2007. After that, with Oscar Pujol having moved out of Barcelona, he started his own Sanskrit teaching programme under the banner Devavāṇī Institute of Sanskrit Studies. He is exceptionally good in Sanskrit and is committed to its spread and promotion in his country, though making his living by following a different profession. It is his love for Sanskrit that is driving him to go deeper and deeper into it.

In 2008 the Indian Council for Cultural Relations (ICCR) conferred on him the Sarasvati Award for his contribution to spoken Sanskrit. The Award is jointly organized by the ICCR (through the Embassy of India in Germany) and the Classical Indology Department of the University of Heidelberg and is conferred every two years. It was in 2008 that it was organized the first time and the first time itself it went to Miquel Peralta. The focus of the Award is on spoken Sanskrit. The candidates for it are supposed to speak in front of an audience for 10 to 15 minutes on a topic given a month in advance. In 2008 the topic given was "The Usefulness of Spoken Sanskrit for Modern Society." The event was organized in two rounds. First ten selected participants gave their speeches of whom three were selected. These three in the second round gave their speeches. Out of these three, one, Miquel Peralta, was selected for the Award, which comprises a ten-day visit to India, a Citation and a Silver Plaque.

The speech that Miquel Peralta gave impromptu he later put down in writing. That is being reproduced here to enable the readers to guage the grasp of the Sanskrit composition of the Spanish Sanskrit devotee :

यदि कश्चित् जनः संस्कृतविषये किंचित् ज्ञातुम् इच्छति तदा एषः जनः सर्वेषु ग्रन्थेषु सर्वदा समानानि उचितानि मतानि पठिष्यति। अस्माभिः सर्वैः सम्भवतः एतद् अपि कदाचिद् अनुभूतम्। यदा यदा वयं किंचित् संस्कृतपुस्तकम् उद्घाटयामः, तदा तदा सर्वे लेखकाः अस्मान् स्मारयन्ति यद् संस्कृतभाषा अतीव पुरातनी भाषा अस्ति इति। वयं बहुवारं पठामः यद् जीवलोके संस्कृतभाषा वस्तुतः अन्याभ्यः भाषाभ्यः पुरातनतरी अस्ति। बहुवारम् अपि इतस्ततः पठामः यत् संस्कृतभाषा देववाणी इति उच्यते। अनेके ऋषयः हि मनुष्यतायाः पुरातनतमान् आध्यात्मिकग्रन्थान् संस्कृतेन रचयन्ति स्म। पुनः, संस्कृतेन विविधानि शास्त्राणि काव्यानि नाटकानि विविधान् ग्रन्थान् वेदान् विविधाः कथाः च पठितुं शक्नुमः। संस्कृतमाध्यमेन वयं सर्वविद्यां प्राप्तुं शक्नुमः। तस्मात् कारणात् संस्कृतभाषा अन्याभिः भाषाभिः सह तोलयितुं न शक्यते, संस्कृतभाषा सर्वाः अन्याः भाषाः च "नैव तुल्यं कदाचन" इत्यपि वक्तुं शक्यते।

ततः अस्मभ्यं स्पष्टम् अस्ति यत् सर्वेषाम् लेखकानां संस्कृतभाषाविषये एकमतम् अस्ति। संस्कृतभाषा एका कुञ्चिका इव अस्ति इति ते लेखकाः अवश्यं मन्यन्ते। किमर्थं मया एवम् उक्तम्? कीदृशी कुञ्चिका? संस्कृतभाषा एकस्य विद्यानिधेः कुञ्चिका अस्ति। यदि वयं संस्कृतं जानीमः तदा अस्माकं समीपे ईदृशी कुञ्चिका भवति। किन्तु, एतस्मिन् क्षणे, अस्माभिः एकः महत्त्वपूर्णः प्रश्नः प्रष्टव्यः। आधुनिकसमाजे कः ईदृशीं कुञ्चिकां प्राप्तुम् अर्हति?। केन तं विद्यानिधिं प्रति गन्तुं शक्यते?। पुरातनकाले, संस्कृतभाषा लोकानां भाषा आसीत्। जनाः स्वभावात् संस्कृतेन आलापं कृतवन्तः। किन्तु, कालक्रमेण संस्कृतभाषा लुप्ता भाषा अभवत्। एतस्मात् क्षणाद् आरभ्य, संस्कृतेन न कश्चित् संभाषणम् अकरोत्, केवलं पण्डिताः तां भाषा जानन्ति स्म वदन्ति स्म च। ततः प्रभृति, चिरं कालं जनाः अचिन्तयन् यद् संस्कृतभाषा मृतभाषा एव। ततः परं चिरात् समान्यजनेभ्यः संस्कृतभाषानिधिः पिहितः आसीत्। तेभ्यः संस्कृतभाषानिधेः कुञ्चिका विलुप्ता अभवत्।

मम देशे एका लघुकथा भवति या सम्प्रति मम मानसम् आगच्छति। एषा कथा, "धनिककथा" नाम इति, इदानीम् एव मम साहाय्यं करिष्यति। शीतकालस्य दीर्घरात्रिषु मम मातामह्या बह्व्यः कथाः अग्नेः समीपे तस्याः पौत्रेभ्यः कथिताः। एतासां कथानां मध्ये "धनिककथा" मह्यं विशेषतः रोचते स्म। यदा मम मातामही अधुना कथा समाप्ता अस्ति इति अवदत्, तदा मया शिशुत्वात् सहसा उक्तं "पुनः तां कथां अस्मभ्यं कथयतु कृपया" इति। किन्तु भवन्तः मा त्रसन्तु! अद्य अहं तां कथां केवलम् एकवारं कथयिष्यामि।

कस्मिंश्चिन् नगरे एकः धनिकः नरः आसीत्। तस्य गृहं प्रासादः इव शोभते स्म। तस्य गृहे विविधानि भवनानि विविधाः शोभनप्रकोष्ठाः च अभवन्। पुनः, एतस्य

धनिकस्य बहवः भृत्याः आसन्। सः धनिकः सुन्दराणि वस्त्राणि अङ्गुलीयकानि च अधारयत्। तस्य कोशः रत्नपूर्णः रूप्यकपूर्णः च आसीत्। यद् यद् सः ऐच्छत्, तत् तत् सः प्राप्नोत्। किन्तु, तस्य एका महती हानिः अभवत्। यद्यपि सः अतीव धनिकः अभवत्, तथापि सः स्वगृहाद् बहिः गन्तुं न शक्तवान्। सः मार्गेषु चलितुं, नगरे भ्रमितुं, नगरस्य जनैः सह संभाषणं कर्तुं न शक्तवान्। एतस्मात् कारणात्, तस्य नगरस्य महद् धनं केवलं स्वगृहस्य अन्तः अतिष्ठत्। तथा, स्वल्पाः जनाः एतेन धनेन अतुष्यन्। केवलं तस्य धनिकस्य प्रियसुहृदः, ये तेन सह गृहस्य अन्तः वसन्ति स्म, ते एतन् महद् द्रविणं द्रष्टुं शक्तवन्तः। ततः यद्यपि तस्य धनिकस्य एकः महान् निधिः आसीत्, तथापि सः सुखेन न जीवति स्म। तत् एकस्मिन् दिने, सः धनिकः अहं दुःखेन जीवामि इति चिन्तयन् देवान् पृच्छति स्म मया किं करणीयम् इति। परम् एकः पक्षी वातायने तिष्ठन् तम् अवदत्—

"व्यये कृते वर्धत एव नित्यं
विद्याधनं सर्वधनप्रधानम्"

तेन धनिकेन सहसा अवगतम्। तस्य भृत्यान् च आदेशम् अकरोत्। मम द्रविणं सर्वेभ्यः ग्रामस्य नरेभ्यः प्रयच्छन्तु इति। ततः किं जातम्?। यावत् तस्य सेवकाः निधिना सह ग्रामम् अगच्छन् तावत् सः धनिकः स्वगृहाद् बहिः गन्तुम् अशक्नोत्। अपरं च यदा सः तस्य शून्यकोषं द्रष्टुम् अगच्छत् तदा सः आश्चर्येण अवालोकयत् यत् तस्य कोषः रत्नपूर्णः आसीत्। सः धनिकतरः अपि अभवत्! तस्मात् प्रभृति ग्रामस्य प्रत्येकं नरः तस्य धनिकस्य निधौ रमते स्म। न केवलं सः धनिकः अन्ततः गन्तुम् अशक्नोत् अपितु तस्य निधिः प्रतिदिनं अवर्धत।

एषा कथा मया कथिता यतः संस्कृतभाषा एषः धनिकः नरः इव आसीत्। यतो हि संस्कृतभाषया चिरं केवलं केचित् जनाः अतुष्यन्। दीर्घकालेन केवलं केचित् जनाः तस्याः निधिं प्राप्तुं शक्तवन्तः। कीदृशाः जनाः संस्कृते रमन्ते? ये जनाः संस्कृतस्य शास्त्रीयरूपं ज्ञातवन्तः, ते एव संस्कृतेन संतुष्यन्ति स्म। अन्ये नराः संस्कृतस्य द्रविणं ज्ञातुम् अपि न शक्तवन्तः।

तां स्थितिं परिवर्तयितुं भारते चत्वारिंशद्वर्षेभ्यः पूर्वं केचन जनाः एकम् उपायं चिन्तितवन्तः येन संस्कृतस्य व्यावहारिकं रूपं पुनः प्रचलति। ते सर्वेषाम् उपयोगाय एकं सरलम् उपायम् अन्विच्छन्ति स्म। ते च संस्कृतस्य सरलरूपं सर्वेभ्यः दत्तवन्तः। एतेन उपायेन कीदृशः परिणामः आसीत्? अधुना अस्माभिः, स्वकीयेन अनुभवेन, ज्ञातम् अस्ति यद् एषः उपायः अत्यन्तं सफलः भवति। सम्प्रति हि संस्कृतभाषायाः व्यावहारिकस्य रूपस्य निश्चितम् उन्नतिः भवति। अनेकेषु विश्वविद्यालयेषु संभाषणसंस्कृतं पठ्यते च। एतस्मात् कारणाद् आधुनिकसमाजे बहवः जनाः संभाषणसंस्कृतं पठन्ति, संस्कृतेन च वक्तुं शक्नुवन्ति।

एतादृश्याः स्थितेः वयम् अवश्यं सुखम् अनुभवामः। परन्तु आधुनिकसमाजे

संभाषणसंस्कृतस्य का उपयोगिता? यदि वयं सत्यं वक्तुम् इच्छामः, तर्हि अस्माभिः वक्तव्यं यत् कस्यचित् संभाषणसंस्कृतेन प्रयोजनं नास्ति। अस्मिन् जीवलोके न कोऽपि जनः केवलं संस्कृतेन वदति। यदा यदा वयं केनचन जनेन सह संस्कृतेन आलापं कुर्मः, तदा तदा अन्याभिः भाषाभिः अपि आलापं कर्तुं शक्नुमः। अतः अन्यान् जनान् अवगन्तुं संस्कृतस्य आवश्यकता नास्ति।

अन्यद् उदहारणम् एतस्मिन् विषये ददामि। अद्य यावत् संस्कृतेन केवलम् एकं चलच्चित्रम् अस्ति। अतः यदि अस्मभ्यं चलच्चित्राणि रोचन्ते, तर्हि तानि चलच्चित्राणि अवगन्तुं संस्कृतं न आवश्यकम्। अपरं च संभाषणसंस्कृतम् उद्योगार्थम् अपि न आवश्यकम्। सम्भवतः आंग्लीभाषा आवश्यकी, अथवा जेर्मन्भाषा आवश्यकी। किन्तु यदि एकः नरः संस्कृतेन संभाषणं कर्तुं शक्नोति तर्हि एतस्मात् कारणात् सः महद्धनं न उपार्जयति।

एवं सति अस्माभिः पुनः प्रष्टव्यं आधुनिकसमाजे संभाषण-संस्कृतस्य का उपयोगिता?

साम्प्रतिक-समाजस्य मनसि केवलम् एकः संकल्पः अस्ति। एषः संकल्पः विकासः इत्युच्यते। किन्तु कीदृशः विकासः सम्भवति? वयं प्रतिदिनं पश्यामः यत् प्रायः सर्वदा यदि आधुनिक-नरैः विकासः इत्युक्तं तदा ते विज्ञानस्य विकासं चिन्तयन्ति अथवा प्रौद्योगिक्याः विकासम् अपि चिन्तयन्ति। ईदृशाय विकासाय अस्माभिः अङ्गीकृतं यत् संभाषणसंस्कृतस्य अथवा शास्त्रीयसंस्कृतस्य आवश्यकता नास्ति।

किन्तु, अन्यः विकासः अपि वर्तते। कः एषः अपरः विकासः? सदाचारस्य विकासः अस्ति। नैतिकशिक्षायाः विकासः अस्ति। आत्मनः चरित्रस्य विकासः अस्ति। यावद् एषः अपरः विकासः न भविष्यति, तावद् अस्माकं समाजः दरिद्र-समाजः स्थास्यति। परन्तु, एतस्य अपरस्य विकासस्य विद्यया प्रयोजनम्। कुत्र एषा विद्या? मम संदेहः नास्ति यद् एषा विद्या संस्कृतभाषायां वर्तते। अतः आधुनिक-समाजाय एव संभाषणसंस्कृतस्य एषा उपयोगिता। संभाषणसंस्कृतं तस्य धनिक-नरस्य गृहस्य द्वारम् उद्घाटयति, तस्य निधिं सर्वेभ्यः प्रयच्छति येन सर्वे संस्कृतस्य द्रविणेन तुष्यन्ति, येन सर्वे तत्त्वतः विकासं प्राप्नुवन्ति। एतस्मै अपराय विकासाय संस्कृतभाषा महत्त्वपूर्णकुञ्चिका अस्ति, बहुभ्यः नरेभ्यः भविष्यकालस्य कुञ्चिका अपि भविष्यति।

मम आशा अस्ति यद् मम वचनाद् एकः संकल्पः अखिलेन स्पष्टो भवति। यदा वयं संभाषणसंस्कृतं पठामः तदा अस्माकं महान् लाभः भवति। अस्माकं श्रमः सार्थकः खलु भविष्यति। तत्त्वतः विकासस्य निधयः अस्माकं प्रतीक्षां कुर्वन्ति। संस्कृतभाषा तेषां सर्वेषां निधीनां कुञ्चिका भवति।

समकालिके समाजे अहिंसायाः प्रासंगिकता

In continuation with the activity that the ICCR started, a competition in spoken Sanskrit, the second of its kind, was organized at the University of Heidelberg, Germany in 2010. In this competition it was Gianni Pellegrini, a young Sanskrit scholar of Italy who won the Sarasvati Award. After obtaining Laurea (corresponding to Post-Graduation) in Oriental Language and Literature from the University of Venice, Italy in 2000 he joined the Sampurnananda Sanskrit University, Varanasi from where he first did the Certificate course in Sanskrit and later proceeded to pursue studies for the Shastri and the Acharya courses in Śāṅkara Vedānta which he successfully cleared. His long stay in Varanasi made him pick up Hindi so well that he can converse in it with the fluency of a native speaker. This was one side of his acquisition. The other side was his deep insight into the ancient Sanskrit texts, particularly those related to Vedānta; he has authored a number of books on it; that led him to practise speaking in Sanskrit due as much to his innate urge for it as also to the need to interact with the Sanskrit community of the University. The extempore speech that he delivered at the competition he later put in writing which is being reproduced below to acquaint the readers with the felicity of its expression.

अनादिकालप्राप्तां परम्परां तथा प्रचलिताश्चिरन्तनोक्तीश्च आदृत्य, चिकीर्षितायाः चेष्टायाः निर्विघ्नपरिसमाप्त्यर्थम् अत्र शिखरिणीवृत्तबद्धं भगवत्पादीयं वाग्देविस्मरणरूपं मंगलं आचर्यम्—

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो
हरेः पत्नीं पद्मां हरसहचरीम् अद्रितनयाम्।
तुरीया कापि त्वं दुरधिगमनिस्सीममहिमा
महामाया विश्वं भ्रमयसि परब्रह्ममहिषि॥

इति सौन्दर्यलहर्याम्।

अत्र किं वक्तव्यम्? किं च लेख्यम्? येषु निगूढविषयेषु विदुषामपि मतिः परिभ्रमति किमुत तत्र मम बालकस्य शेमुषी? भवतु नाम दुर्जनानां परिहासः, मया तु "ममापि एष स्तोत्रे हर निरपवादः परिकरः" इति महिम्नोवाक्यं मनसि निधाय, अस्मिंश्च निबन्धे लघुकाये सत्यपि "अहिंसा तस्याः समकालिके समाजे प्रासंगिकता" चेति विषयोऽधिकृतः। तत्र किञ्चित् विमृश्यते।

सर्वप्रथमं शाब्दिकविचारः प्रस्तूयते। शास्त्रपद्धतिम् अनतिक्रम्य यदा नकारात्मकपदार्थः परिगण्यते, तथा प्राथम्येन तस्य सकारात्मकरूपं चिन्तनीयम्, तद्वैपरीत्येन वा भावपदार्थाद् अभावात्मकविमर्शः। "अथातो धर्मजिज्ञासा" इति शाबरभाष्यप्रसंगे अधर्मविचारपूर्वकं धर्मचिन्तनमितिवत्। अत्र तु अहिंसाया उपात्तविषयस्य विपरीतं पदं हिंसैव वर्तते।

हिंस्-धातोः अङिति प्रत्यये संप्राप्ते, स्त्रीत्वविवक्षायाम् अजन्तादीनां टाप्प्रत्ययात् हिंसेति शब्दो निष्पद्यते। हिंसनं हिंसा। हिंस्यते, हन्यते, अपभाष्यते अनया इति हिंसा। प्राणिनां शारीरं मानसं वा परिपीडनं हिंसेति। इयं च हिंसा मुख्यतया त्रिधा विभज्यते— मनसा वाचा कर्मणा चेति। यत् तु सामान्यतः हिंसाविषये मनुते जनः "प्राणिवध एव हिंसा" इति, नैषा मान्यता पूर्णरूपेण सत्यतां भजते, सा च केवलं कायिकी हिंसा। किंबहुना, विविधानां भूतानां येन केनापि प्रकारेण क्लेशप्रापणं हिंसेति भवितुमर्हति। तस्मात् मनसा हिंसा परापकारचिन्तनम्, अन्यान् प्रति असूया, तेषां च अपकर्षदिदृक्षा। वाचिकी च हिंसा कटुवाक्यप्रयोगो येन परेषामभ्यन्तरदुःखोत्पादनं स्यात्।

नञ्पूर्वको यदि हिंस्धातुः भवेत्तर्हि "न विद्यते हिंसा यत्र सा अहिंसा" इत्यर्थो भवेत्।

ननु शास्त्रेषु नञोऽव्ययस्य षडेव अर्थाः प्रसिद्धाः। यथा—

तत्सादृश्यम् अभावश्च तदन्यत्वं तदल्पता।
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥

इति वाक्यपदीये। तेषु चाभिधेयेषु कतमोऽहिंसेति पदे प्रयुक्तो नञभिप्रायः? इति शंकायां सत्याम् उच्यते हिंसाया अत्यन्ताभावोऽहिंसा। सा च द्विधा बाह्या आभ्यन्तरा चेति। तत्र आद्या जन्तून् प्रति मानसवाचिकदैहिकसर्वविधहिंसापरित्यागः। अन्या च स्वहृदि हिंसाभावनानुदये निरन्तरंप्रयत्नः।

विशेषतः भारतदेशे प्राचीनकालादेव संन्यासिनः श्रमणाश्च ये परिव्राजकाः, तेषां कृतेऽहिंसा विहिता एव भवति स्म, यतः सर्वभूतेभ्यः कारुण्यरूपा यतीनां साधना। अहिंसा च पातञ्जलयोगशास्त्रे यमेषु स्मृतास्ति "अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः" इति।

न तु भिक्षाटनानामेव धर्मसाधनमहिंसा, किञ्च विविधवादविवादप्रधानेऽपि लोके अस्या अहिंसायाः महत्त्वविषये निगमागमानाम् ऐकमत्यं भवति। अत एव महर्षिणा मनुना चातुर्वर्ण्यार्थम् अहिंसामहिमा उपस्थाप्यते—

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः॥

नैषा चतुर्णां वर्णानामेव संपत्तिः, तेन तस्याः व्यापकत्वं न स्यात्। अहिंसाया सार्वभौमत्वमेव परिकीर्त्यते। इयमहिंसा न केवलं भारतीयसभ्यतायां परमो धर्म आख्यायते, अपितु यत्र कुत्रापि योग्यसंस्कृतिप्राप्तिर्भवति तत्रापि दृश्यते। सा च विश्वस्मिन् जगति शान्तिप्रदात्री, सच्चरित्रमूला अभ्युदयसहचारिणी, निःश्रेयसपथाभिवृद्धिहेतुश्च।

अहिंसाया जीवनोपयोगित्वम् आश्रित्यैव प्राचीनैः ऋषिभिः शास्त्रकारैश्च तस्याः प्रासंगिकता उद्घोष्यते। अहिंसाया अपराभिधानं प्रेमेति अपि कथ्यते। अनया प्रेमभावनया स्वेस्वराष्ट्रहितं संपादयितुं शक्यते। भगवान् मनुः अहिंसायाः प्रासंगिकत्वं वर्णयन् निगदितवान् यदहिंसया मानवैः सर्वमपि कार्यं साधितं भवति। मधुरया वाचा यथा कार्यसिद्धिः संभवति, न तथा प्रकारान्तरेण।

अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम्।
वाक् चैव मधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता॥

इति मनुस्मृतेः। अहिंसा स गुणो येन विश्वबन्धुत्वं विश्वप्रेम विश्वहितसाधनं च संभाव्यते। अहिंसा एव सदाचारः। तस्याः परिपालनार्थम् अनेके महानुभावा अस्मिन् धरित्रीतले अवतीर्य, तयैव अहिंसया संरक्षिताः सन्तः लोकसंग्रहाय परोपकाराय च यावज्जीवनं व्यतियापितवन्तः। कथमद्यापि ईदृशो व्यवहार ईदृशी च भावना आत्मसान् न चिकीर्ष्यते? मन्येऽहं संभवत्येव, यतो यो हि प्राणिनां स्वभावः पूर्वेषां विदुषां प्रतिपादित आसीत्, तस्मात् स्वभावाद् अद्यतनानां स्वभावोऽपि न व्यभिचरति। अहिंसायाः दृढेन शस्त्रेण महात्मा गांधीः पराधीनतापाशं संछिद्य भारतीयेभ्यः स्वतन्त्रतां प्रापयामास।

एवं मम ध्रुवा मतिरस्ति यत् यथा सर्वेषु कालेषु अभूत् तथा अस्मिन्नत्याधुनिके समाजेऽपि, यस्मिन् समे जन्तवः नैसर्गिकमृदुतां विहाय औपाधिकीं कठोरतां प्रपद्यन्ते। अधुनापि अहिंसायाः कृतेऽवकाशो विद्यते।

कस्य न तुष्टये कोमलता? शान्तिः कस्मै न रोचते? इति विमुग्धोऽहं पृच्छामि। न च कदापि कथमपि चाहिंसामन्तरेण संतोषसत्याक्रोधदयादीन् उत्कृष्टान गुणान् अधिगच्छति मानवः। यदा केनापि जनेन धैर्यम् आत्मनियन्त्रित्वम् च उत्सृज्य प्रवृत्यते हिंसिकायाः क्रियाया अनुरूपं तदा सा हिंसा क्रूरतरत्वात् क्रूरतमत्वम् आपद्यते। अन्ततो गत्वा ध्रुव एव विनाशः। तस्मान्न हिंसया प्रेयः श्रेयश्च लब्धुं शक्ष्यति कोऽपि, अतोऽहं ब्रवीमि अहिंसा आश्रयणीया बुधैः। अवलोक्यते यद् आक्रान्तोऽपि अहिंसाश्रितो मनुष्यः कथमपि न प्रतिकरोति। अत्र तु नैव नैव विस्मरणीयं यत् यदि स न विरुणद्धि, न भयात्, न च दौर्बल्यात्, नैव क्लैब्याच्च एवं व्यवहरति, अपितु स्वस्वभावम् अनुसृत्य। स हि प्रबलः, स विजयी, स एव वीरः। अस्मिन् प्रसंगे कदापि उपदेशिकां कथां पठितवान् अहम्, या सर्वैरपि अन्वेष्टव्या।

नदीतीरे महारण्ये गुहान्तरे साधनातत्परः एकः साधुः प्रत्यवसत्। स सूर्योदयात् प्राक् प्रतिदिनं स्नानार्थं नदीं गच्छति स्म। एकदा स्नात्वा जलाद् बहिरागच्छन् उदकात् निर्गन्तुं यतमानम् एकं वृश्चिकं दृष्टवान्। स भिक्षुः दयाभिभूतः सन् कीटम् उद्दिधृक्षुः स्वकरेण तं गृहीतवान्। वृश्चिकेन च इतोऽपि भयभीतेन सता स साधुर्दष्टः। तीव्रदुःखकृतकम्पनात्, परिव्राजकहस्तात् स वृश्चिकः जलेऽपतत्। एवं च साधुः तं पुनः उद्धृतवान्, अथ पुनरपि वृश्चिकदंशः। एवं त्रिधा, चतुर्धा च कुर्वन्तं तं संन्यासिनं दृष्ट्वा किञ्चिद् दूरमुपविष्टोऽन्यो जनोऽवदत्—"हे मूढ! किं नाधिगच्छसि यत् दंशो वृश्चिकस्य स्वभावः? यदा यदा तं त्वम् उद्धरिष्यसि, तदा तदा स त्वां दंक्ष्यति।" एतत् श्रुत्वा साधुः मधुरस्वरेण प्रत्युवाच—"सत्यं त्वं वक्षि वत्स! तथापि नाहमन्यथा कर्तुं समर्थोऽस्मि। यथा अस्य स्वभावो दंशनं तथैव दयाभावेन मम स्वभाव एतत्समुद्धरणमिति।"

अस्तु तावत् अहिंसा धर्ममार्ग इति वर्तते सर्वसाधारणी धृतिः, परन्तु न सा सदैव न्यायमार्गः। अहिंसाया अपि अस्ति सीमा।

इदं मम तात्पर्यम्—यदा क्रूरान्यायाचारः केनापि क्रियते, यदा च निरपराधाः प्राणिनः परिपीड्यन्ते, तस्मिन्नवसारे यदि कोऽपि अहिंसाम् आश्रित्य न रुणद्धि भ्रष्टचारिणं, तदा तदौदासीन्यं नाहिंसा, किन्तु हिंसा। ततः स पापभागी भवति। बलादपि हिंसाविरोधे कृते तु, न तत् हिंसनं यत एकदृष्ट्या प्राणिसंरक्षणं तत्, अन्यदृष्ट्या च दुराचारिणः हिंसाकरणात् प्रतिबन्धः।

सत्यमेतत् यत् अस्माकं समकालिके समाजे येन केन प्रकारेण हिंसात्यन्ताभावो न परिकल्पितुं शक्यते। वस्तुतस्तु अद्य तात्त्विकीं बुद्धिपूर्विकाम् अहिंसाम् आश्रितो मानवः हीरक इव प्रकाशते। क इह रागतः प्राप्तोत्तेजनं विरोद्धुं शक्तः? क एवंविधः शूरः? कोऽयं बलवत्तमः?

यदि लक्षाणां मध्ये एको निर्भयोऽहिंसको भवेत् तर्हि अस्मत्समाजेऽपि भविष्यति नूतन उषःकालः, नूतनं च ज्योतिरिति शम्।

Måns Broo, a young Sanskritist of Helsinki, Finland, who is such a devout Vaiṣṇavite as to have adopted a Vaiṣṇava name Bhṛgupādadāsa, has written in Sanskrit a detailed commentary on the Aṣṭakastotra, an eulogy composed by him in eight stanzas followed by the ninth one as the Phalaśruti, the mention of the benefit/s accruing to devotees reciting it, of Caitanyadeva who is credited with six arms, *ṣaḍbhuja*. Each and every word of the stanzas he (Måns Broo, Bhṛgupādadāsa) has explained meticulously with profuse quotations from the Vaiṣṇavite texts of old showing thereby his acquaintance with the vast corpus of the Vaiṣṇavite literature. His way of explanation is very much reminiscent of the commentaries of old. Being a unique work, it is being reproduced here in full to show as to how even a present-day European Sanskrit scholar can write a commentary that perfectly matches the old ones in content and style.

श्रीश्रीगुरुगौराङ्गो विजयताम्।

श्रीश्रीषड्भुजाष्टकम्[1]

मोन्स्ब्रूनाम्ना भृगुपाददासाधिकरिणा विरचितया

गौरचन्द्रिकाख्यटीकया समन्वितम्

गौराब्दाः ५२३। खिस्ताब्दाः २००६

1. I am indebted to Dr. Chandra Bhushan Jha for supplying me its copy.

प्रस्तावना

एतस्य ग्रन्थकस्य प्रकाशनं चिरकालाभिलाषं मे संपूरयति। प्रायोऽर्धजीवनं श्रीषड्भुजचैतन्यदेवस्य श्रीमूतिर्मया संपूजिताऽस्ति, किन्तु सर्वत्रैवान्वेषणं कृत्वा, न कुत्रचित् तत्स्तोत्रमहमध्यगमम्! मूर्खोऽहं भक्तप्रायोऽहं किन्तु सर्वेषां श्रीषड्भुजसेवकानामष्टकस्तोत्रस्य प्रयुक्तिरस्तीति मत्वा पुनः पुनराश्वास्य श्रीश्रीगुरुगौराङ्गकृपां प्रार्थ्य ग्रन्थं लिखितुमारब्धवानहम्। संस्कृतविद्यार्थिनां श्रीचैतन्यसंप्रदायमतजिज्ञासूनाञ्चानुकूल्यार्थं मयापि प्रायोऽनेकशास्त्रवचनावतरणेन गौरचन्द्रिकाख्यातिसरलसंस्कृतटीका विरचितास्ति। औद्धत्यं मे क्षम्यतामित्याकाङ्क्षन्सार्वभौमिकसंस्कृतिवृन्दाय ग्रन्थमिमं नम्रचेतसा निवेदयामि।

ग्रन्थस्यास्य संशोधनकार्ये श्रीश्रीमद्रामानुजदासेन विशेषतः पण्डितशिरोमणिना महामहोपाध्यायेन श्रीश्रीमज्जगदानन्ददासेन च बहूपकारः कृत इति तौ मम कृतज्ञताभाजनम्। सम्पादनकार्ये श्रीकमलाक्षदासाधिकारिणापकृतमिति तं प्रीतिपूर्णहृदयेन स्मरामि। ग्रन्थस्य धनाधिकारिणः सन्ति फिन्लन्ददेशे स्वार्गिकसंस्कृतिकोषः, परतत्त्वप्रकाशनः, योगाचार्यः श्री पेत्रि रैसनेनः, योगिनीशिरोमणिः श्रीमती अन्ने नुयोतियो, श्री श्रीनिवास लक्ष्मीकुमार ताताचार्य शर्मा, योगविद्वान् श्रीगोकुलचन्द्रदासश्च। तान्सर्वान्सविनयं धन्यान् वदामि।

हेल्सिन्कि, फ़िन्लन्द
आषाढकृष्णदशमी
523 गौराब्द, 2009 खिस्ताब्द

—वैष्णवकृपाप्रार्थी
श्रीभृगुपाददासः

प्रथमश्लोकः

गौरचन्द्रिका

वन्देऽहं श्रीगुरोः श्रीयुतपदकमलं श्रीगुरून्वैष्णवांश्च
श्रीरूपं साग्रजातं सहगणरघुनाथान्वितं तं सजीवम्।
साद्वैतं सावधूतं परिजनसहितं कृष्णचैतन्यदेवं
श्रीराधाकृष्णपादान्सहगणललिताश्रीविशाखान्वितांश्च ॥

भक्तानां परमं वन्दे वनवासिनमीश्वरम्।
सच्छास्त्रनिपुणं शान्तं त्रिपुरारिं सदाशिवम्॥

रमणीयनिवासं श्रीराधागोविन्दयोः सदा।
पोष्टारं भक्तिवल्लीनां गोपानन्दवनं भजे ॥

अथ गौरचन्द्रिकाटीकारम्भे प्रथमं श्रीचैतन्यचरितामृताख्यश्रीकृष्णचैतन्यदेवजीवन-चरितग्रन्थकारश्रीकृष्णदासकविराजपादकृतसुपद्येन श्रीश्रीगुरुगौराङ्गराधाकृष्ण-सपरिवारान्प्रणमामि। किमर्थम्? सर्वविघ्नोपशान्तये सर्वमङ्गलोत्पत्तये च। यथोक्तं विष्णुपुराणे—यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये। विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय॥ इति। अमलपुराणस्य श्रीमद्भागवतस्य षष्ठस्कन्धे ऽजामिलोक्तौ च—क्व चाहं कितवः पापो ब्रह्मघ्नो निरपत्रपः। क्वच नारायणेत्येतद्भगवन्नाम मङ्गलम् ॥ इति।

प्रथमं सामान्यतः श्रीगुरुं शरणत्वेनाश्रयामि वन्दे इति। यथोक्तं—प्रथमं तु गुरुं पूज्य ततश्चैव ममार्चनम्। कुर्वन्सिद्धिमवाप्नोति ह्यन्यथा निष्फलं भवेत् ॥ इति। तत्र गुरुर्द्विविधः—दीक्षागुरुः शिक्षागुरुश्च। दीक्षागुरुरेक एवेत्याह एकादश- स्कन्धे—लब्धानुग्रह आचार्यत्तेन सन्दर्शितागमः। महापुरुषमभ्यर्चेन्मूर्त्याभिमतयात्मनः ॥ इति। अनुग्रहो मन्त्रदीक्षारूप आगमो मन्त्रविधिशास्त्रमस्यैकत्वमेकवचनेन बोध्यते। तथा हि, दिव्यं ज्ञानं यतो दद्यात्कुर्यात्पापस्य संक्षयम्। तस्माद्दीक्षेति सा प्रोक्ता देशिकैस्तत्त्वकोविदैः। इति विष्णुयामलातन्त्रवचनाद्दिव्यज्ञानसंपादकत्वं दीक्षायाः मुख्यलक्षणम्। ज्ञानं विशुद्धं परमार्थमेकम् इत्यादि पञ्चस्कन्धवचनानुसारेण दिव्यज्ञानमेकम्। तत्र तु गुरूनिति शिक्षागुरूणां बहुत्वं भक्तिप्रकारस्यानवधेः। अत एव श्रीगुरोरिति दीक्षागुरोरेव श्रीयुतपदकमलं लक्ष्मीदेवीसमर्चितं पद्ममिव शुद्धमभिरामं च पदमहं वन्दे। अथ श्रीगुरूनखिलशिक्षागुरून्स्वपरम्परागतान्परमगुरुपरात्परगुर्वादीन्वा वैष्णवान्गृहीत-विष्णुदीक्षाविष्णुसेवापरजनांश्च वन्दे।

अथ सपरिकरं भक्तिरसामृतसिन्ध्वादिग्रन्थकारमभिधेयाचार्यं परमभागवतं श्रीरूपगोस्वामिप्रभुपादं प्रणमति—श्रीरूपमिति। साग्रजातमिति, अग्रजः तेनाग्रजेन

रूपस्याग्रिमभ्रात्रा वैष्णवतोषण्यादिग्रन्थकारेण सह वर्तमानं तं श्रीरूपं वन्दे। यद्यपि सनातनगोस्वाम्यग्रजस्तथाप्यग्रे रूपस्य नामग्रहणं तद्भक्तिवैशिष्ट्यात्। यथोक्तं श्रीलनरोत्तमठाकुरेण—श्रीचैतन्यमनोऽभीष्टं स्थापितं येन भूतले। स्वयं रूपः कदा मह्यं ददाति स्वपदान्तिकम् ॥ इति। घोरकलियुगमध्ये भूतले श्रीचैतन्यदेवस्य मनोऽभीष्टं श्रीश्रीराधागोविन्दयोरुन्नतोज्ज्वलरसं यस्य स्वलिखितसैद्धान्तिकग्रन्थैः स्थापितं स रूपः कदा मह्यं स्वपदान्तिकमाश्रयं ददाति। कदा मां रूपानुगं करोतीति भावः। चैतन्यसंप्रदाये सिद्धसाधकरूपेण रूपस्यानुगत्या सर्वोत्तमः सयूथः श्रीरूपानुग इह भवानिति श्रीरघुनाथदासगोस्वाम्युक्तेः।

सहगणरघुनाथान्वितमिति गौडकायस्थकुल-भास्करेण श्रीविलाप-कुसुमाञ्जल्यादिग्रन्थकारेण प्रयोजनाचार्येण श्रीरघुनाथदासगोस्वामिप्रभुपादेनान्वितं सहितं सजीवमिति तद्भ्रात्रीयेण श्रीभागवतसन्दर्भादिग्रन्थकारेण श्रीजीवगोस्वामिप्रभुपादेन सह वर्तमानं श्रीरूपं वन्दे। रघुनाथदासस्य सहगणौ कौ? श्रीहरिभक्तिविलासग्रन्थकारः श्रीगोपालभट्टगोस्वामिप्रभुपादः काशीधामभक्तकुलशेखरतपनमिश्रपुत्रः श्रीरघुनाथ-गोस्वामिप्रभुपादश्च।

विश्वविश्रुतवृन्दावनधामेयषड्गोस्वामिपादानां शरणं कृत्वा साद्वैतमिति महाविष्ण्ववतारेण श्रीलाद्वैताचार्येण सह सावधूतमिति निर्धूतलोकाचारपुरुषेण वलदेवावतारेण श्रीनित्यानन्देन सह च कलियुगपावनावतारं भगवन्तं श्रीश्रीकृष्णचैतन्यदेवं वन्दे।

ननु श्रीचैतन्यदेवस्य भगवच्छ्रीकृष्णावतारे प्रमाणं किम्? सप्तमस्कन्धे प्रह्लादोक्तौ—इत्थं नृतिर्यगृषिदेवझषावतारैर्लोकान्विभावयसि हंसि जगत्प्रतीपान्। धर्मं महापुरुष पासि युगानुवृत्तं छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ॥ इति। कलियुगे छन्नोऽसि श्यामगोपस्वरूपवरणेन सर्वेषामगोचरत्वात् ॥ पाषण्डमोहनार्थं कल्मषकवलितकलियुगे छन्नावतारं करोषीति भावः। यद्यपि तद्धेतोः श्रीमद्भागवते श्रीचैतन्यदेवस्यावतारकथायाः स्पष्टनिर्देशो नास्ति, तथापि दशमैकादशस्कन्धस्थितेन गर्गकरभाजनमुन्योः महावाक्यद्वयेन स एव सूचितः। गर्गोक्तौ—आसन्वर्णास्त्रयो ह्यस्य गृह्णतो ऽनुयुगं तनूः। शुक्लो रक्तस्तथा पीत इदानीं कृष्णतां गतः ॥ इति। इदानीं द्वापरयुगे कृष्णतां गतोऽसि। कृष्णोऽसीति भावः। कृते शुक्लश्चतुर्बाहुः इति त्रेतायां रक्तवर्णो ऽसाविति एकादशस्कन्धवचनानुसारेण कलियुगे पीतवर्णोऽसि। यथा करभाजनोक्तौ—कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदम्। यज्ञैः सङ्कीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥ इति। नानाकलियुगपक्षे कृष्णवर्णदिहम्। रूक्षत्वं व्यावर्तयति त्विषा कान्त्या अकृष्णमिन्द्रनीलमणिवदुज्ज्वलमित्यर्थः। एकतः कलियुगपक्षे कृष्णवर्णं किन्तु त्विषा बहिः स्फुरन्त्या कान्त्या अकृष्णं शुक्लरक्तश्यामाना-मुक्तत्वात्पारिशेष्येण पीतमन्तः कृष्णं बहिर्गौरमित्यर्थः। इति श्रीविश्वनाथचक्रवर्तिचरणाः। साङ्गोपाङ्गास्त्रपार्षदमङ्गान्येव परममनोहरत्वादुपाङ्गानि भूषणादीनि महाप्रभावत्वात्तान्येवास्त्राणि सर्वदैकान्तवासित्वात्तान्येव पार्षदाः श्रीमदद्वैताचार्यमहानुभाव-चरणप्रभृतयस्तैः सह

वर्तमानमिति चार्थान्तरेण व्यक्तम्। तदेवंभूतं कैर्यजन्ति यज्ञैः पूजासम्भारैः न यत्र यज्ञेशमखमहोत्सवा इत्युक्तेः। तत्र च विशेषेण तमेवाभिधेयं व्यनक्ति सङ्कीर्तनं बहुभिर्मिलित्वा तद्गानसुखं श्रीकृष्णगानं तत्प्रधानैः। तथा सङ्कीर्तनप्राधान्यस्य तदाश्रितेष्वेव दर्शनात्स एवात्राभिधेय इति स्पष्टम्। इति जीवगोस्वामिचरणाः।

महाभारते च विष्णुसहस्रनामस्तोत्रे—सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी। संन्यासकृच्छमः शान्त इत्यादि। पाद्मे च—कलेः प्रथमसन्ध्यायां गौराङ्गोऽहं महीतले। भागीरथीतटे रम्ये भविष्यामि शचीसुतः॥ ब्रह्मयामले—अथवाहं धराधाम्नि भूत्वा मद्भक्तरूपधृक्। मायायां च भविष्यामि कलौ सङ्कीर्तनागमे॥ गौराङ्गगौरदीप्ताङ्गं पठेत्स्तोत्रं कृताञ्जलिः। नन्दगोपसुतं चैव नमस्यामि गदाग्रजम्॥ इति। कृष्णयामले—अहं पूर्णो भविष्यामि युगसन्धौ विशेषतः। मायापूरे नवद्वीपे वरमेकं शचीसुतः॥ इति। अन्यपुराणेषु तन्त्रेषु चानेकचैतन्यदेवावतारप्रमाणानि सन्ति, किन्तु तानि ग्रन्थविस्तारभयादत्र न लिखितानि।

सपरिवारचैतन्यदेवं प्रणम्य सपार्षदं श्रीकृष्णं वन्दे। श्रीराधाकृष्णपादान्परदेवतायाः श्रीमदनमोहनमोहिन्या ह्लादिनीशक्तिरूपिण्या महाभावस्वरूपिण्याः श्रीराधायाः च स्वयं भगवतः कृष्णस्तु भगवान्स्वयमिति भागवतोक्तेः रसिकशेखरस्य श्रीकृष्णस्य शोभनपदारविन्दान्वन्दे पुनः पुनः। महाभावस्वरूपिणीति रसिकशेखर इति चाग्रे व्यक्तौ भाविनौ। सहगणललिताश्रीविशाखान्वितांश्चेति प्रियगणसहितन्तद्युगलमूर्तिचरणं वन्दे। सर्वेभ्यो पार्षदेभ्यो गोपीकन्या उत्तमाः। गोपीनां मध्येऽष्टसख्यः वरिष्ठाः। ललिता व विशाखा च चित्रा चम्पकमल्लिका। तुङ्गविद्योन्दुलेखा च रङ्गदेवी सुदेविका॥ इति राधाकृष्णगणोद्देशदीपिका। तयोरेव प्राधान्यादत्र केवलं ललिता विशाखाचाभिशब्दिते।

इत्थं श्रीकृष्णदासकविराजचरणैरेकश्लोकेन प्रत्येकं गुरुवैष्णवनित्यानन्द-गौरराधाकृष्णतत्त्वानि दर्शितानि वन्दितानि च।

अथ स्वलिखितश्लोकेन श्रीगोपीश्वरशिवमाश्रयामि—भक्तानामिति। भक्तानां परमं वैष्णवानां यथा शम्भुः इत्यादिद्वादशस्कन्धोक्तेः परमभागवतं वनवासिनं कैलासशिखरे रम्ये इत्यादिमहानिर्वाणतन्त्रोक्तेः निर्जनस्थानैकपरं सच्छास्त्रनिपुणं श्रीमद्भागवतादि-वैष्णवसन्मतानुसारं शास्त्रे निपुणं स्वाधीतमीश्वरं सर्वभूतयक्षदेवताद्यधीशं शान्तं धैर्यैकरूपं सदाशिवं महादेवप्रसिद्धं पार्वतीपतिं त्रिपुरारिं त्रिपुरासुरो हतो यस्मात्तं वन्दे ऽतिगौरवेण भजामि।

यद्वा, सामान्यतः दीक्षागुरुं प्रणम्य, अत्र विशेषेण स्वदीक्षागुरुमाश्रयामि। भक्तानां परमं वैष्णवश्रेष्ठं वनवासिनमौदार्याख्यारण्यमध्यस्थाश्रमनिवासिनं सच्छास्त्रनिपुणं श्रीमद्भगवद्गीतागोपालतापनीयश्रुत्यादिसच्छास्त्राणां नूतनभाष्यकारिणं शान्तं कामक्रोधादिरिपुविहीनं सदाशिवं सदा सर्वत्रैव कल्याणमूर्तिं त्रिपुरारिं श्रीश्रीमद्भक्तिवेदान्त-त्रिपुरारिनामकयतिराजं वन्दे प्रीतिपूर्णहृदयेण दण्डवत्प्रणामं करोमि।

अथ मङ्गलाचरणान्ते द्वितीयस्वलिखितश्लोकेन सर्वोत्तमधामानं श्रीश्रीराधागोविन्दयो-

र्माधुर्यरसपरिपूर्णनित्यलीलास्थानं श्रीवृन्दावनमाश्रयामि— रमणीयनिवासमिति। वराहपुराणे मथुरामाहात्म्ये वराहं प्रति श्रीभूमिदेव्युवाच—तीर्थं तद्वद कल्याणं तीर्थानामुत्तमोत्तमम्। वराह उवाच—न विद्यते च पाताले नान्तरिक्षे न मानुषे। समानं मथुराया हि प्रियं मम वसुन्धरे ॥ वृन्दावनं द्वादशमं वृन्दया परिरक्षितम्। मम चैव प्रियं भूमिमहापातकनाशनम्। इत्यादि। वृन्दावनं सखि भुवो वितनोति कीर्तिमित्यादिदशमस्कन्धवचनाच्च श्रीवृन्दावनधाम्नः सर्वश्रेष्ठत्वं सिद्धम्। गोपानन्दवनं श्रीवृन्दावनाख्यं गोपगोप्यादिगणानामानन्दकारकारण्यं भक्तिवल्लीनां साधकानां भक्तिलतानां पोष्टारं स्वप्रभावात्पुष्टिकारकं श्रीराधागोविन्दयो-र्युगलकिशोरयो रमणीयनिवासमतिमनोरमनिलयं भजे वन्दे। रमणीयनिवासं सदा सर्वदेति लीलायाः नित्यत्वं सूचितम्। यद्वाहं सदा तादृशं श्रीवृन्दावनमेव भजे।

अथवा, सामान्यतः शिक्षागुरुं प्रणम्य, अत्र विशेषेण स्वशिक्षागुरुमाश्रयामि। साधूनां हृदयमहमित्याद्युक्तेः श्रीगुरुदेवस्य शुद्धहृदयं सदा श्रीराधाकृष्णयो रमणीयनिवासम्। यश्च शिष्याणां भक्तिवल्लीनां स्वशिक्षया पोषितारं तं गोपानन्दवनं ओं विष्णुपादवाग्मिप्रवरनित्यलीलाप्रविष्टभक्तिहृदयवनमहाराजस्य प्रधानशिष्यं वर्तमानाचार्यञ्च श्रीश्रीमद्गोपानन्दवनमहारजं भजे सहस्रकोटिदण्डवत्प्रणामादिभिर्वन्दे। इति मङ्गलाचरणम्।

ननु षड्भुजः कः? षड्भुजाः यस्य सः षड्भुजः, रामकृष्णबाहुविशिष्टस्य श्रीचैतन्यदेवस्य रूपविशेषः। तद्रूपं रामकृष्णाद्वितीयत्वदर्शनार्थमेकदा स्वशिष्य-श्रीवासुदेवसार्वभौमनिकटे श्रीपुरुषोत्तमक्षेत्रे श्रीचैतन्यदेवैः प्रदर्शितम्। तद्रूपे महावदान्यावतारः श्रीचैतन्यः स्वपारमैश्वर्यं दर्शयति। उत्तरमध्याधरहस्तेषु श्रीरामचन्द्रस्य बाणधनुषी श्रीकृष्णचन्द्रस्य वेणुः श्रीचैतन्यचन्द्रस्य सन्यासदण्डकमण्डलू च यथाक्रमं स्थिताः। अस्मिन्नष्टके षट्श्लोकेषु ते षड्भुजाः क्रमशो वर्णिताः। सः षड्भुजविशिष्टश्रीचैतन्यदेवो ऽष्टकस्य देवता।

श्रीचैतन्यदेवस्य षड्भुजमूर्तिः शास्त्रे ऽग्रकथिताऽस्ति। एकादशस्कन्धे करभाजनमुन्युक्ते—ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम्। भृत्यार्तिहं प्रणतपाल भवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम् ॥ त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीं धर्मिष्ठ आर्यवचसा यदगादरण्यम्। मायामृगं दयितयेप्सितमन्वधावद्वन्दे महापुरुष ते चरणारविन्दम् ॥ अयं श्रीचैतन्यावतारः कलियुगवर्तिनो जनान्प्रायः कृष्णरामयोर्भजनमार्गमुपदिशत्यतस्तयोः स्तुतिनती आह द्वाभ्याम्। ध्येयं ध्यातुमर्हं सदेति नात्र कालदेशनियम इति भावः। इन्द्रियकुटुम्बादिभिर्यः परिभवस्तिरस्कारस्तं हन्तीत्यननुसंहितं फलमभीष्टदोहमित्यनुसंहितम्। तीर्थास्पदमिति ध्यानमात्रेण गङ्गादिसर्वतीर्थस्नानसिद्धेः कलौ द्रव्यदेशक्रियादिजनितं दुर्वारमपावित्र्यमपि नाशङ्कनीयमिति भावः। तत्र सदाचारमाह शिवविरिञ्चीति। सुखसेव्यत्वमाह—शरण्यमिति। भक्तवात्सल्यमाह—भृत्यार्तिहमिति। न च भृत्यानां परिचर्यादिकमप्यपेक्ष इत्याह हे प्रणतपालेति। भृत्याभिमानवन्त्तं प्रणतिमात्रेणैव पालयतीति भावः। भवाब्धिपोतमिति

त्वत्पादपोतेन महत्कृतेन कुर्वन्ति गोवत्सपदं भवाब्धिमिति ब्रह्माद्युक्तेर्भवाब्धिः कदा नस्तीर्ण इत्यपि त्वद्भृत्यो न जानातीति भावः।

श्लेषेण तस्याप्यवतारस्याप्यनेनैव स्तुतिनती यथा हे महापुरुष हे परमहंस महामुनीन्द्र शिवविरिञ्चिनुतमाचार्यहरिदासाभ्यां स्तुतम्। अन्यत्समानम्।

अन्यैः सुदुस्त्यजा या सुरेप्सिता राज्यलक्ष्मीस्तां त्यक्त्वा यदिति य इत्यर्थः। अरण्यमगात्किं राज्यवैकल्यदर्शनेन, न, धर्मिष्ठः आर्यस्य गुरोर्दशरथस्य वचसा अनेन पितृभक्तत्वमुक्तम्। प्रेयसीप्रेमवशत्वं चाह—दयितया सीतया ईप्सितं मायामृगं स्वर्णाकारं मृगं यः—अन्वधावत्तं वन्दे। श्लेषपक्षे—असुभ्यः प्राणेभ्योऽपि दुस्त्यजा च सुरैरपीप्सितं राज्यं स्वकान्तेन विराजमानत्वं यस्याः सा च या लक्ष्मीस्तां त्यक्त्वा धन्यः अरण्यमगात्। तत्र हेतुः—आर्यस्य विप्रस्य वचसा तव सर्वमपि गार्हस्थ्यसुखं ध्वस्तं भवतीति यज्ञोपवीतत्रोटनपूर्वकं यच्छापवचस्तेन धर्मिष्ठः धर्मवतां मध्ये अतिशयेन श्रेष्ठः विप्रवाक्यं मान्यथा भवत्विति कृतशापस्वीकार इत्यर्थः। गत्वा किमकरोदित्यत आह—मायां कलत्रपुत्रविप्रादिरूपां मृग्यति अन्वेषयतीति मायामृगः संसाराविष्टो जनस्तमन्वधावत्। कीदृशं? दयातिशयेनास्तीति दयी तस्य भावो दयिता तया हेतुना ईप्सितं स्वाभीप्सितमालिङ्गनमिषेण स्पर्शनं दत्त्वा संसाराब्धिपतितमपि तं प्रेमाब्धौ पातयितुमिति निरुपधिमहाकारुण्यं द्योतितम्। इति श्रीविश्वनाथचक्रवर्तिचरणाः।

अतः रामकृष्णचैतन्यमिलिततनुः श्रीमद्भागवते परोक्षवादे सूचितो ऽस्ति। परोक्षप्रिय इव हि देव इति श्रुतेः।

षड्भुजाष्टकस्य छन्दो वसन्ततिलका। यदुक्तं वृत्तरत्नाकरे—उक्ता वसन्ततिलका तभजा जगौ गः। अयमर्थः—गुरुगुरुलघुस्तः, गुरुलघुलघुर्भः, लघुगुरुलघुर्जः, गुरुर्गः।

अथ श्रीमन्महाप्रभोः षड्भुजमूर्तेरन्तर्वर्तिनः श्रीदाशरथिरामस्य स्वरूपगतयोर्द्विभुजयोर्वामहस्ते स्थितस्य असुरदलनोपकरणविशेषस्य बाणस्यानुवर्णनार्थं स्तोत्रस्येदं प्रथमपद्यमवतारयति—

प्रथमश्लोकः

श्रीकाश्यपेयकरतुल्यसुशोभबाणै-
र्दुर्वारिदान्तरितरावणभृङ्गभेदम्।
यस्माद्बिभेति मदमत्सरमोहवृन्दम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम्॥1॥

कश्यपर्षिपुण्यतमपुत्रसूर्यदेवस्य कराः सूर्यांशव इव ज्वलन्तः ये शराः, तैर्दुर्वारिदान्तरितस्य मायाकृते दुष्टमेघे राक्षसादिदुर्जनसमूहे वा स्थितस्य रावणस्य विश्रवर्षिपुत्रस्य सर्वराक्षसाधिपतेः भृङ्गभेदं हृदयविभिन्नकारम्। सूर्यस्य मेघविजयेन ऋतस्यानृतपराभवः सुसिद्ध एव।

ननु, स विसृष्टो महावेगः शरीरान्तकरः परः। बिभेद हृदयं तस्य रावणस्य दुरात्मनः ॥ इति श्रीवाल्मीकिरामायणीययुद्धकाण्डोक्ते राम एकबाणेनैव रावणं जघान, किं त्वत्र बाणैरिति बहुवचनमुपयुक्तमिति चेत्, सत्यम्। अत्र बहुवचनप्रयोगो मानकृते तद्बाणस्य। अथवा, श्रीरामस्यैकेन बाणविशेषेण रावणः पञ्चत्वं गतः, किं तु तत्पूर्वमेवानेकरामबाणै रावणो निःशक्तित्वमासादित आसीत्। यदुक्तं तत्रैव प्रहसन्निव काकुत्स्थः संदधे निशिताञ्छरान्। स मुमोच ततो बाणाञ्छतशोऽथ सहस्रशः ॥ इति। काकुत्स्थो राम एव। स बाणविशेषो ब्रह्मास्त्रमेव। स बाणविशेष इन्द्रार्थं चतुर्मुखेन निर्मितं ब्रह्मास्त्रमेव, यत्समरमध्ये ऽगस्त्येनर्षिणा श्रीरामाय दत्तम्।

तद्ब्रह्मास्त्रं युद्धकाण्डान्ते वर्णितम् एव—ततः संस्मारितो रामस्तेन वाक्येन मातलेः। जग्राह स शरं दीप्तं निःश्वसन्तमिवोरगम् ॥ यस्य वाजेषु पवनः फले पावकभास्करौ शरीरमाकाशमयं गौरवे मेरुमन्दरौ ॥ जाज्वल्यमानं वपुषा सुपुङ्खं हेमभूषितम्। तेजसा सर्वभूतानां कृतं भास्करवर्चसम् ॥ सधूममिव कालाग्निं दीप्तमाशीविषोपमम्। नरनागाश्ववृन्दानां भेदनं क्षिप्रकारिणम् ॥ द्वाराणां परिघाणां च गिरीणां चापि भेदनम्। नानारुधिरदिग्धाङ्गं मेदोदिग्धं सुदारुणम् ॥ वज्रसारं महानादं नानासमितिदारणम्। सर्ववित्रासनं भीमं श्वसन्तमिव पन्नगम् ॥ कङ्कगृध्रबकानां च गोमायुगणरक्षसाम्। नित्यभक्षप्रदं युद्धे यमरूपं भयावहम्॥ नन्दनं वानरेन्द्राणां रक्षसामवसादनम्। वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः ॥ इत्यादि।

यस्माद्बिभेति भयाद्विकम्पयति **मदमत्सरमोहवृन्दं** मदादिनाम दैत्यसङ्घः। मददैत्यश्च्यवनर्ष्यनुकृष्टो महाभारतस्य वनपर्वोक्तेः। अथवा, कामलोभक्रोधमदमोहमात्सर्याः षड्रिपवः। तैर्विहीनस्य श्रीचैतन्यदेवस्य दृढनिश्चयात्मकभजनात्षड्रिपुवर्गो नष्टो भवतीति भावः। **तमनन्तगुणगणात्मदेवं** भक्तवात्सल्यरूपलावण्यैश्वर्याद्यसंख्यसद्गुणपूर्णं देवं सर्वभूतेश्वरं षड्भुजं श्रीचैतन्यदेवस्य पूर्वोक्तषट्करसमलङ्कृतमूर्तिमर्चयामि मनोवचनेहितार्थप्राणैर्भजामि ॥1॥

द्वितीयश्लोकः

अथ श्रीरघुनाथस्य धनुषोऽनुवर्णनार्थं स्तोत्रस्य द्वितीयश्लोकं निर्णयति—

आलोक्य दिव्यधनुधाररघूद्वहार्यं
मौर्वीमहाकलकलान्निपतन्ति दैत्याः।
सत्त्वस्थितो मुनिगणो रमते गुहायाम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम् ॥2॥

दिव्यधनुर्धरं दिव्यो देवकारिणा विश्वकर्मणा निर्मितम् अतिमानुषं धनुश्चापो यस्य तम्। स एवैष चापो अगस्त्यमुनिनारण्यकाण्डे वर्णित एव—इदं दिव्यं महच्चापं

हेमवज्रविभूषितम् । वैष्णवं पुरुषव्याघ्र निर्मितं विश्वकर्मणा ॥ अनेन धनुषा राम हत्वा संख्ये महासुरान् । आजहार श्रियं दीप्तां पुरा विष्णुर्दिवौकसाम् ॥ इति । रघूद्वहं रघुवंशजं श्रीरामम् । श्रीरामो दशरथात् । दशरथो ऽजात् । अजो रघोः । रघुः ककुस्थात् । ककुत्स्थो सशादात् । सशाद इक्ष्वाकोः । इक्ष्वाकुर्वैवस्वतमनोः । मनुर्ब्रह्मणः । ब्रह्म स्वयम्भूः । इति सूर्यवंशः ।

आर्यमार्जवैकमूर्तिम् । एवंभूतं श्रीराममालोक्याभिवीक्ष्य दैत्याः दण्डकारण्य ऋषिकृतयज्ञभङ्गकारिणो राक्षसा मौर्वीमहाकलकलाच्छ्रीरामस्य मौर्व्याः ज्यायाः कलकलान्महातुमुलाद्रणान्निपतन्ति भयान्म्रियन्ते । यथोक्तमारण्यकाण्डे—जग्राह परमक्रुद्धश्चतुर्दश शिलाशितान् । गृहीत्वा धनुरायम्य लक्ष्यानुद्दिश्य राक्षसान् ॥ मुमोच राघवो बाणान्वज्रानिव शतक्रतुः । ते भित्त्वा रक्षसां वेगाद्वक्षांसि रुधिरप्लुताः ॥ विनिष्पेतुस्तदा भूमौ वल्मीकादिव पन्नगाः । तैर्भग्नहृदया भूमौ भिन्नमूला इव द्रुमाः ॥ निपेतुः शोणितस्नाता विवृता विगतासवः । तान्भूमौ पतितान्दृष्ट्वा राक्षसी क्रोधमूर्छिता ॥ उपगम्य खरं सा तु किंचित्संशुष्कशोणिता । पपात पुनरेवार्ता सनिर्यासेव वल्लरी ॥ इति । श्रीभगवत्समीपे किमप्यकुशलं नावशिष्यत इति भावः ।

तथा, एवंभूताच्छ्रीरामदर्शनाद्दैत्या निपतन्त्येव । साधवः किं कुर्वन्ति ? तत्राह—सत्त्वेति । मुनिगणः साधुसमूहस्तं दृष्ट्वा रमत्यानन्दमनुभवति । किंलक्षणो मुनिगणः । तत्राह-सत्त्वस्थित इति । सत्त्वे सत्त्वगुणे, शुद्धसत्त्वे वा, शुद्धसत्त्वमयस्य स्वरूपविशिष्टस्य भगवतोऽन्यैर्यथार्थदर्शनासम्भवात् । मुनयो मननशीलाः, तेषामन्तर्मुखीनत्वात् । बहिर्मुखत्वं रजस्तमोगुणविशिष्टानामसुरराक्षसादीनामेव लक्षणं, येषामवतारकाले भगद्वत्साक्षाद्दर्शनभानेऽपि तत्स्वरूपस्यानन्दमयत्वानुभवोऽसम्भाव्यः । तस्माद् यथार्थभगवद्दर्शनं चित्तशुद्ध्यपेक्ष्यम् । शुद्धसत्त्वविशिष्टो मुनिः स्वरूपावस्थानात्सर्वदा रमते, भगवद्दर्शने तु तस्यानन्दानुभवः प्रेमोद्भूतसात्त्विकभावादुच्चलितो भवति, चरमप्रेमोद्दीपकत्वात् ।

यद्वा, अत्र सत्त्वशब्दस्यार्थो भावाक्रान्तं चित्तम्, यथा श्रीरूपपादानां भक्तिरसामृतसिन्धौ—कृष्णसंबन्धिभिः साक्षात्किञ्चिद्वा व्यवधानतः । भावैश्चित्तमिहाक्रान्तं सत्त्वमित्युच्यते बुधैः ॥ इति । अत्रेदं चिन्त्यं—रामायणादिग्रन्थेषु रामभक्तिविशिष्टानां दण्डकारण्यमुनीनां तस्मिन्प्रायशः शमशुद्धरतिमया भावाः ।

भगवद्रतिः पञ्चधा । तत्रैव—शुद्धा प्रीतिस्तथा सख्यं वात्सल्यं प्रियतेत्यसौ । स्वपरार्थैव सा मुख्या पुनः पञ्चविधा भवेत् ॥ वैशिष्ट्यं पात्रवैशिष्ट्याद्रतिरेषोपगच्छति । यथार्कः प्रतिबिम्बात्मा स्फटिकादिषु वस्तुषु ॥ सामान्यासौ तथा स्वच्छा शान्तिश्चेत्यादिमा त्रिधा । एषाङ्गकम्पतानेत्रामीलनोन्मीलनादिकृत् । मनसो निर्विकल्पत्वं शम इत्यभिधीयते ॥ इति । तथापि राममालोक्य केचिन्मुनयो भगवति प्रियतारतिमिच्छन्ति । तत्रैव पद्मपुराणवचनम्—पुरा महर्षयः सर्वे दण्डकारण्यवासिनः । दृष्ट्वा रामं हरिं तत्र भोक्तुमिच्छन्सुविग्रहम् ॥ ते सर्वे स्त्रीत्वमापन्नाः समुद्भूताश्च गोकुले । हरिं सम्प्राप्य कामेन ततो मुक्ता भवार्णवात् ॥ इति । टीकायाञ्च श्रीजीवपादैः—महर्षयोऽत्र श्रीगोकुलस्थश्रीकृष्णप्रेयस्यनुगतवासनाः त एव सर्व इत्यर्थः, ते च रामं दृष्ट्वा ततोऽपि सुन्दरविग्रहं हरिं श्रीकृष्णं भाव्यवतारमपि

तत्प्रतिपाकशास्त्रे विद्वत्प्रसिद्धं गोकुले प्रेयस्यो भूत्वोपभोक्तुमैच्छन्मनसा वरं वृण्वते स्म। ते च सर्वे कल्पवृक्षादिव तस्मादवचनेनैव वरं लब्ध्वा देशान्तरगोपीनां गर्भे स्त्रीत्वमापन्नाः सर्वत्र गोकुलनाम्नाऽतिविख्याते श्रीमन्नन्दगोकुले कथंचित्ताभ्य एवागताभ्यः सम्यगुत्पन्ना हरिं ततोऽपि मनोहरं श्रीकृष्णमेव कामेन सङ्कल्पमात्रेण सम्प्राप्य ततस्तदनन्तरमेव मुक्ता भवार्णवादिति। अन्तर्गृहगताः काश्चिदित्यादिरीत्या ज्ञेयम्। इति। सिद्धास्तु त्रिप्रकाराः— साधनसिद्धः कृपासिद्धो नित्यसिद्धश्च। ता एषा दण्डकारण्यगोप्यः साधनसिद्धाः।

कथं रमते? गुहायां रहसि हृदये। श्रीरामदर्शनानन्दस्य बाह्यलक्षणं न प्रकटयतीत्यर्थः। अर्चामीत्यादि पूर्ववत् ॥2॥

तृतीयश्लोकः

इदानीं पूर्वश्लोकद्वये स्वयं भगवतः श्रीचैतन्यदेवस्य रघुनाथमूर्तेः धनुर्बाणौ श्रीषड्भुजचैतन्यदेवस्योर्ध्वहस्तद्वयं वर्णयित्वा श्रीकृष्णस्य वेणुं श्रीषड्भुजस्य मध्यमहस्तयोः वर्णितार्थं प्रस्तुतश्लोकयुगलं निर्णयति—

गोविन्द माधव मुकुन्द जनार्दनेति
गायन्ति गोपतनया व्रजकाननेषु।
स्मृत्वा मुखं गिरिधरेरनुवेणुजुष्टम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम् ॥3॥

गिरिधरेर्गोवर्धनाख्यगिरिराजस्य व्रजगोगोपगोपीरक्षणार्थाय वामहस्तीय-कनिष्ठाङ्गुलेनोच्छ्रायकस्य श्रीकृष्णस्य मुखं वदनम्। कथंभूतं मुखम्? अनुवेणुजुष्टम्, अनु निरन्तरं वेणुना जुष्टं सेवितमिति, अनुरूपेण वेणुना जुष्टमिति वा। श्रीकृष्णवेणुर्यथा, श्रीभक्तिरसामृतसिन्धौ—एष त्रिधा भवेद्वेणुमुरलीवंशिकेत्यपि। पारिकाख्यो भवेद्वेणुर्द्वादशाङ्गुलदैर्घ्यभाक्। स्थौल्येऽङ्गुष्ठमितः षड्भिरेष रन्ध्रैः समन्वितः ॥ हस्तद्वयमितायामा मुखरन्ध्रसमन्विता। चतुःस्वरच्छिद्रयुक्ता मुरली चारुनादिनी ॥ अर्धाङ्गुलान्तरोन्मानं तारादिविवराष्टकम्। ततः सार्धाङ्गुलवाद्यत्र मुखरन्ध्रं तथाङ्गुलम् ॥ शिरो वेदाङ्गुलम् ॥ शिरो वेदाङ्गुलं पुच्छं त्र्यङ्गुलं सा तु वंशिका। नवरन्ध्रा स्मृता सप्तदशाङ्गुलमिता बुधैः ॥ दशाङ्गुलान्तरा स्याच्चेत्सा तारामुखरन्ध्रयोः। महानन्देति विख्याता तथा सम्मोहिनीति च ॥ भवेत्सूर्यान्तरा सा चेत्तत आकर्षिणी मता। आनन्दिनी तदा वंशी भवेदिन्द्रान्तरा यदि ॥ गोपानां वल्लभा सेयं वंशुलीति च विश्रुता। क्रमान्मणिमयी हैमी वैणवीति त्रिधा च सा ॥ इति।

तन्मुखं स्मृत्वा स्मरन्तः गोपतनया गोपकुमाराः श्रीकृष्णनामानि गायन्ति कीर्तयन्ति। श्रीकृष्णस्य व्रजवयस्याः चतुर्विधाः। तत्रैव—सुहृदश्च सखायश्च तथा प्रियसखाः परे। प्रियनर्मवयस्याश्चेत्युक्ता गोष्ठे चतुर्विधाः॥ वात्सल्यगन्धिसख्यास्तु किञ्चित्ते वयसाधिकाः। सायुधास्तस्य दुष्टेभ्यः सदा रक्षापरायणाः ॥ सुहृत्तु मण्डलीभद्रबलभद्रौ किलोत्तमौ॥

कनिष्ठकल्पाः सख्येन सम्बद्धाः प्रीतिगन्धिना। विशालवृषभौजस्विदेवप्रस्थवरूथपाः। इत्याद्याः सखयो ह्यस्य सेवासौख्यैकरागिणः ॥ सर्वेषु सखिषु श्रेष्ठो देवप्रस्थोऽयमीरितः ॥ वयस्तुल्याः प्रियसखाः सख्यं केवलमाश्रिताः। श्रीदामा च सुदामा च दामा च वसुदामकः ॥ रमन्ति प्रियसखाः केलिभिर्विविधैः सदा। नियुद्धदण्डयुद्धादिकौतुकैरपि केशवम् ॥ एषु प्रियवयस्येषु श्रीदामा प्रवरो मतः ॥ प्रियनर्मवयस्यास्तु पूर्वतो ऽप्यभितो वराः। आत्यन्तिकरहस्येषु युक्ता भावविशेषिणः। सुबालार्जुनगन्धर्वास्ते वसन्तोज्ज्वलादयः ॥ प्रियनर्मवयस्येषु प्रबलौ सुबलोज्ज्वलौ ॥ इति।

ननु, किमर्थं गोपतनया श्रीकृष्णस्य नामानि गायन्ति? भगवद्भक्तिरसोद्दीपनविभावरूपं श्रीकृष्णमुखमेव स्मृत्वा भक्तिरसपात्रेषु सख्यस्थायिभावस्थितेषु गोपतनयेषु भक्तिरसस्यानुभावा अप्यभिलक्ष्यन्ते। तदनुभावास्तत्रैव व्याख्याताः—अनुभावास्तु चित्तस्थभावानामवबोधकाः। ते बहिर्विक्रियाप्रायाः प्रोक्ता उद्भास्वराख्यया॥ नृत्यं विलुठितं गीतं क्रोशनं तनुमोटनम्। हुङ्कारो जृम्भणं श्वासभूमा लोकानपेक्षिता। लालास्रवो ऽट्टहासश्च घूर्णा हिक्कादयोऽपि च ॥ इति। एतेषामनुभावानां मध्ये गानं सर्ववयस्यसाधारणमस्ति। तत्रैव नियुद्धकन्दुकद्यूतवाह्यवाहादिकेलिभिः। लगुलालगुडीक्रीडासङ्गरैश्चास्य तोषणम् ॥ पल्यङ्कासनदोलासु सहस्वापोपवेशनम्। चारुचित्रपरीहासो विहारः सलिलाशये ॥ युग्मत्वे लास्यगानाद्याः सर्वसाधारणाः क्रियाः॥ इति। स्थायिभावविभावानुभावसात्त्विक-भावव्यभिचारिभावसमुदयाद्भक्तिरस उद्भाति। यदुक्तं भरतीयनाट्यशास्त्रे—विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति।

इदानीं कानि श्रीभगवतो नामानि गोपतनया गायन्ति? ते स्वस्वस्थायिभावोद्दीपकानि नामानि गायन्ति। तत्प्रदर्शयितुमाह **गोविन्देत्यादि**। गां विन्दतीति गोविन्दः। गोविन्दनामग्रहणेन श्रीकृष्णस्य गोष्ठलीलाऽभिव्यक्ता भवति। गोष्ठलीलायाः शुद्धसख्यरसोद्दीपकत्वे, तद्रसरसिकैः श्रीदामाद्यैः प्रियसखिभिः गोविन्देति नाम सङ्कीर्तितम्।

ततश्च माधवेति। मधुवंशजात इति माधवः। यद्वा, मंध्वृत्वनुबद्ध इति माधवः। अथवा, मायाः लक्ष्म्याः धवः पतिरिति माधवः। सर्वलक्ष्मीमूर्तीनां मध्ये श्रीराधा परमश्रेयसी। बृहद्गौतमीयतन्त्रवचनमत्रैव प्रमाणं—देवी कृष्णमयी प्रोक्ता राधिका परदेवता। सर्वलक्ष्मीमयी सर्वकान्तिः सम्मोहिनी परा ॥ इति। माधवनामग्रहणेन श्रीश्रीराधाकृष्णस्य रहस्यलीला सूच्यते। रहस्यलीलायाः माधुर्यमिश्रितसख्यरसोद्दीपकत्वे, तद्रसरसिकैः सुबालाद्यैः प्रियनर्मसखैः माधवेति नाम परिगीतम्।

ततश्च मुकुन्देति। मुक्तिं ददातीति मुकुन्दः। कस्मान्मुक्तिः? आर्तेः, भक्तानाम् आर्तिरिकैव तत्सेवान्यूनता। तद्धेतोः मुकुन्दनामग्रहणेन देवप्रस्थादीनां श्रीकृष्णस्य व्यजनाङ्गसंवाहनादिसेवालीला सूच्यते। व्यजनादिसेवालीलाया दास्यमिश्रितसख्यरसोद्दीपकत्वे, तद्रसरसिकैः देवप्रस्थाद्यैः सखिभिः मुकुन्देति नाम सङ्कीर्तितम्।

ततश्च जनार्दनेति। जनान् पूतनाद्यसुरानर्दति हन्तीति जनार्दनः। श्रीभगवतो योगमायाशक्तिबलाद् गोपाः श्रीकृष्णस्य परमभगवत्तां प्रायो न जानन्ति। तद्धेतोः

श्रीकृष्णस्यासुरनियुद्धे सुहृत्सखाः स्वदण्डाद्यायुधैः श्रीकृष्णमुपचरन्ति। जनार्दननामग्रहणेन श्रीकृष्णस्य असुरयुद्धलीला ध्वन्यते। असुरयुद्धलीलाया वात्सल्यमिश्रितसख्यरसोद्दीपकत्वे, तद्रसरसिकैः सुभद्राद्यैः सुहृत्सखिभिः जनार्दनेति नाम सङ्कीर्तितम्।

अत एवैकश्लोकेन सर्वे व्रजवयस्याः दर्शिताः। अस्मिञ्श्लोकेऽपि दास्यसख्यवात्सल्यरतयः सूचिताः।

व्रजकाननेषु व्रजधाम्नो द्वादशेषु वनोपवनप्रतिवनाधिवनेषु। द्वादशवनानां नामानि श्रीगोपालोत्तरतापिन्या लिखितानि— बृहद्बृहद्वनं मधोर्मधुवनं तालस्तालवनं काम्यं काम्यवनं बहुला बहुलवनं कुमुदं कुमुदवनं खदिरः खदिरवनं भद्रो भद्रवनं भाण्डीर इति भाण्डीरवनं श्रीवनं लोहवनं वृन्दाया वृन्दावनमेतैरावृता पुरी भवति। इति। महावनं बृहद्वनम्। बिल्ववनं श्रीवनम्। उपवनानि, श्रीरानायणभट्टकृतव्रजभक्तिविलास आम्नाते वराहपुराणे—आदौ ब्रह्मवनं नाम द्वितीयं त्वप्सरावनम्। तृतीयं विह्वलं नाम कदम्बाख्यं चतुर्थकम्॥ नाम्ना स्वरावनं श्रेष्ठं पञ्चमं परिकीर्तितम्। सुरभिवननामानं षष्ठ-माह्लादवर्धनम्॥ श्रेष्ठं प्रेमवनं नाम सप्तमं शुभदं नृणाम्। मयूरवननामानमष्टमं परिकीर्तितम्॥ मानेङ्गितवनं श्रेष्ठं नवमं मानवर्धनम्। शेषशायिवनं श्रेष्ठं दशमं पापनाशनम्॥ एकादशं समाख्यातं नारदाख्यं शुभोदितम्। द्वादशं परमानन्दवनं सर्वार्थदायकम्॥ इति।

प्रतिवनानि, तत्रैव भविष्ये—आदौ रङ्कवनं श्रेष्ठं पुरसंज्ञाविराजितम्। वार्त्तावनं द्वितीयञ्च करहाख्यं तृतीयकम्॥ चतुर्थं काम्यनामानं वनं कामप्रदं नृणाम्। वनमञ्जन-नामानं पञ्चमं श्रीशुभप्रदम्॥ नाम्ना कर्णवनं श्रेष्ठं षष्ठं स्वप्नवरप्रदम्। कृष्णाक्षिपननामानं वनं नन्दनमष्टमम्॥ नन्दप्रेक्षणकृष्णाख्यं वनं सप्तममीरितम्। वनमिन्द्रवनं नाम नवमं कृष्णपूजितम्॥ शिक्षावनं शुभं प्रोक्तं दशमं नन्दभाणितम्॥ चन्द्रावलीवनं श्रेष्ठमेकादशमुदाहृतम्। नाम्ना लोहवनं श्रेष्ठं द्वादशं शुभदं नृणाम्॥ इति।

अधिवनानि, तत्रैव वैष्णवे—मथुरा प्रथमं नाम राधाकुण्डं द्वितीयकम्। नन्दग्रामं तृतीयञ्च गढ़स्थानं चतुर्थकम्॥ पञ्चमं ललिताग्रामं वृषभानुपुरं च षट्। सप्तमं गोकुलं स्थानमष्टमं बलदेवकम्। गोवर्धनवनं श्रेष्ठं नवमं कमनाप्रदम्। वनं जाववटं नाम दशमं परिकीर्तितम्॥ मुख्यं वृन्दावनं श्रेष्ठमेकादशं प्रकीर्त्तितम्। सङ्केतवटकं स्थानं वनं द्वादश कीर्त्तितम्॥ इति ॥3॥

चतुर्थश्लोकः

तृतीयश्लोके श्रीषड्भुजस्य मध्यमकरद्वयेन धृतं वंशं श्रीकृष्णसखिसम्बन्धित्वेन वर्णयित्वा इदानीं तमेव वंशं श्रीराधादिगोपनायिकासम्बन्धित्वेन वर्णयति—

आकर्ण्य वेणुरणितं शुभगोपिकास्तु
यत्नेन सर्वकुलधर्ममतीस्त्यजन्ति।

राधाप्रियं रसिकराजमनङ्गसारम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम् ॥4॥

वेणुरणितं वंशस्य स्वरमाकर्ण्यादरेण श्रुत्वा शुभगोपिकाः परमसुन्दररूपिण्यो नवकिशोर्यः श्रीगोपीनाथैकाश्रिताः पूर्वोक्ता गोपकन्याः यत्नेनात्यभिलाषेण सर्वकुलधर्ममतीः समस्ताः कुलादिलौकिकधर्मं प्रति मतीः चिन्ताः त्यजन्ति विसृजन्ति। स्त्रीधर्मविरुद्धं जारसङ्गमिच्छन्तीति भावः। संक्षेपात्स्त्रीधर्मो विष्णुस्मृतौ व्याख्यातः—भर्तुः समानव्रतचारित्वम्। श्वश्रूश्वसुरगुरुदेवतातिथिपूजनम्। सुसंस्कृतोपस्करता। अमुक्तहस्तता। सुगुप्तभाण्डता। मूलक्रियास्वनभिरतिः। मङ्गलाचारतत्परता। भर्तरि प्रवासिते ऽप्रतिकर्मक्रिया। परगृहेष्वनभिगमनम्। द्वारदेशगवाक्षकेषु नावस्थानम्। सर्वकर्मस्वस्वतन्त्रता। बाल्ययौवनवार्धकेष्वपि पितृभर्तृपुत्राधीनतेति।

ननु पूर्वं सर्वेभ्यः पार्षदेभ्यो गोपकन्या उत्तमा इति लिखितम्। किंभूता उत्तमाः? सर्वेषु लोकेषु धर्मविरोधिन्यः स्त्रियोऽधमाः। तदा किमर्थं परमधार्मिकः श्रीभगवांस्तद्योषितः प्रति स्वसङ्गमददात्? स एव संशयः दशमस्कन्धे श्रीपरीक्षितोक्तः—संस्थापनाय धर्मस्य प्रशमायेतरस्य च। अवतीर्णो हि भगवानंशेन जगदीश्वरः ॥ स कथं धर्मसेतूनां वक्ता कर्ताभिरक्षिता। प्रतीपमाचरद् ब्रह्मन् परदाराभिमर्शनम् ॥ इति। प्रतीपं धर्मव्यतिक्रमकर्म। ब्रह्मन् हे शुकदेव।

तत्र श्रीशुकस्योत्तरम्—धर्मव्यतिक्रमोऽदृष्ट ईश्वराणाञ्च साहसम्। तेजीयसां न दोषाय वह्नेः सर्वभुजो यथा ॥ इति। ईश्वराणां धर्मव्यतिक्रमो ऽदृष्ट एव, कुत्रापि न दृष्ट एव। एवं साहसं सहसा कृतञ्च, ईश्वरैः कदाप्यधर्माचरणं न क्रियते, तथापि यदि दृश्यते, तदा तेजीयसां कर्तुमकर्तुमन्यथाकर्तुं सामर्थ्यं तेजस्तज्जुषां धर्मव्यतिक्रमो न दोषाय, गुणायैव, तैस्तु यत्क्रियते तत्र निमित्तमेष्टव्यम् न तु रागप्राप्तं तत्। अतो धर्मव्यतिक्रम इवासौ दृश्यते, न तु वस्तुतो धर्मव्यतिक्रमः। अत्र दृष्टान्तः—वह्नेरित्यादि। वह्नेरनलस्य यथा सर्वभुजः सर्वभोगाः, क्वचिन्ते बहुवचनम्। तस्य सर्वभुक्त्वं यथा न रागप्राप्तमपि तु सहजम्, तथेदमपि तेनानुमन्तव्यम्। ईस्वरस्येयं लीला न धर्मव्यतिक्रमः —ईश्वरस्य तत्करणासम्भवात्। ईश्वराणामिति बहुवचनं सर्वेश्वरत्वे तात्पर्यम् ॥ इति बृहत्क्रमसन्दर्भे श्रीजीवगोस्वामिचरणाः।

तर्हि यद्यदाचरति श्रेष्ठ इति भगवदुक्तन्यायेनान्योऽपि तत्कुर्यादित्याशङ्क्याह शुकदेवः—नैतत्समाचरेज्जातु मनसापि ह्यनीश्वरः। विनश्यत्याचरन्मौढ्याद्यथा रुद्रो ऽब्धिजं विषम् ॥ इति। अनीश्वरो देहादिपरतन्त्रः। यथा रुद्रव्यतिरिक्तो विषमाचरन्भक्षयन्विनश्यति, तथापि श्रीकृष्णव्यतिरिक्तो रासक्रीडानुकारी विनश्यत्येव।

जुगुप्सितं किमभिप्रायं कृतवानिति द्वितीयप्रश्नस्योत्तरमाह शुकः—अनुग्रहाय भक्तानां मानुषं देहमाश्रितः। भजते तादृशीः क्रीडा याः श्रुत्वा तत्परो भवेत् ॥ इति। भगवद्गीतायां परित्राणाय साधूनां विनाशाय च दुष्कृताम्। धर्मसंस्थापनार्थाय संभवामि युगे युगे ॥ इति श्रीभगवतो ऽवताराणां सामान्यार्थाः सूचिताः, किंत्वत्र स्वयं भगवतः श्रीकृष्णस्यावतारस्य

विशेषार्थः श्रीशुकदेवेनोक्तः। भक्तानामनुग्रहाय तादृशीः क्रीडाः भजते याः श्रुत्वा मानुषं देहमाश्रितो जीवः तत्परस् तद्विषयकश्रद्धावान्भवेदिति। क्रीडान्तरतो वैलक्षण्येन मधुररसमयेऽस्याः क्रीडायास्तादृशी मणिमन्त्रमहौषधानामिव काचिदतर्क्या शक्तिरस्तीत्यवगम्यते। तथैव मानुषदेहवत एव तद्भक्तावधिकारित्वं मुख्यमित्यभिप्रेतम् ॥ इति विश्वनाथचक्रवर्तिचरणाः।

बाह्यतो गोपीनां श्रीकृष्णं प्रति रागः व्यभिचारिणीनां लौकिकस्त्रीणां काम इव प्रतिभाति, किंतु स रागः कामो नास्त्येव, आत्मेन्द्रियप्रीतिवाञ्छाविहीनत्वात्। केवलं श्रीकृष्णेन्द्रियप्रीतिवाञ्छातो गोपीनां रागः शुद्धप्रेमेति कथित एव। यद्वा, सर्वथा ध्वंसरहितं सत्यपि ध्वंसकारणे। यद्भावबन्धनं यूनोः स प्रेमा परिकीर्तितः ॥ इति। श्रीकृष्णार्थं गोप्यः स्त्र्यादिधर्मान्त्यजन्ति, न कदाचन स्वपरमार्थम्। तत्रैव सर्वधर्मान्परित्यज्य मामेकं शरणं व्रजेति भगवद्गीतावचनं परिपूर्णत्वमापन्नम्।

ततो गोप्यः सर्वभक्तानां श्रेष्ठाः। यथोक्तं दशमस्कन्धे – एताः परं तनुभृतो भुवि गोपवध्वो गोविन्द एवमखिलात्मनि रूढभावाः। वाञ्छन्ति यद् भवभियो मुनयो वयञ्च किं ब्रह्मजन्मभिरनन्तकथारसस्य ॥ इति। रूढभावाः परमप्रेमवत्यः। वयमुद्धवः। बृहद्वामणपुराणे च श्रीब्रह्मवाक्यम् – न स्त्रियो व्रजसुन्दर्यः पुत्र श्रेष्ठाः श्रियोऽपि ताः। नाहं शिवश्च शेषश्च श्रीश्च ताभिः समाः क्वचित् ॥ इति। आदिपुराणे च श्रीकृष्णं प्रति श्रीमदर्जुनवाक्यम्—त्रैलोक्ये भगवद्भक्ताः के त्वां जानन्ति मर्मणि। केषु वा त्वं सदा तुष्टः केषु प्रेम तवातुलम् ॥ श्रीभगवानुवाच ॥ न तथा मे प्रियतमो ब्रह्मा रुद्रश्च पार्थिव। न च लक्ष्मीर्न चात्मा मे यथा गोपीजनो मम ॥ भक्ता ममानुरक्ताश्च कति सन्ति न भूतले। किंतु गोपीजनः प्राणाधिकप्रियतमो मम ॥ न मां जानन्ति मुनयो योगिनश्च परन्तप। न च रुद्रादयो देवा यथा गोप्यो विदन्ति माम् ॥ न तपोभिर्न वेदैश्च नाचारैर्न च विद्यया। वशोऽस्मि केवलं प्रेम्णा प्रमाणं तत्र गोपिकाः ॥ मन्माहात्म्यं मत्सापर्यं मच्छ्रद्धां मन्मनोगतम्। जानन्ति गोपिकाः पार्थ नान्ये जानन्ति मर्मणि ॥ इत्यादि।

द्वितीयश्लोके दण्डकारण्यर्षिजा गोप्योऽभिशब्दिताः। गोप्यस्तु श्रुतयो ज्ञेया ऋषिजा गोपकन्यकाः। देवकन्याश्च राजेन्द्र न मानुष्यः कथञ्चन ॥ इति पाद्मवचनानुसारेण गोप्यश्चतुर्विधाः। गोपीत्वेनैव मानुषत्वे लब्धेऽपि न मानुष्य इति निषेधस्तासां प्राकृतमानुषत्वाभावं ज्ञापयति गोपीत्वस्य सिद्धत्वादेवेति तत्प्रसङ्ग एव प्रपञ्चितः। तासां नित्यसिद्धत्वं तु आनन्दचिन्मयरसप्रतिभाविताभिरिति ब्रह्मसंहितोक्त्या तासां ह्लादिनीशक्तित्वप्रतिपादनात्। ह्लादिनी या महाशक्तिरिति बृहद्गौतमीयाच्च। ताभिः सह श्रीकृष्णस्य रमणस्यानादित्वाच्च दशाष्टदशाक्षरादिमन्त्रेषु तासां निर्देशात् ॥ इति विश्वनाथचक्रवर्तिचरणाः। अत एव चतुर्थश्लोकस्य गोपिकाः नित्यसिद्धा एव।

श्रीकृष्णस्य वेणुरणितं गोपीनां प्रियतारतेरुद्दीपनमेव। यथोक्तं भक्तिरसामृतसिन्धौ— उद्दीपना इह प्रोक्ता मुरलीनिःस्वनादयः। इति। अथानुभावाः— अनुभावास्तु कथिता दृगन्तेक्षास्मितादयः। इति

सैव मधुरभक्तिरसो विप्रलम्भसम्भोगभेदेन द्विविधः। विप्रलम्भः, तत्रैव—स पूर्वरागो मानश्च प्रवासादिमयस्तथा। विप्रलम्भो बहुविधो विद्वद्भिरिह कथ्यते ॥ इति। सम्भोगश्च तत्रैव द्वयोर्मिलितयोर्भोगः सम्भोग इति कीर्त्यते। इति। अत्रैवाष्टकस्य चतुर्थश्लोके माधुर्यभक्तिरसपात्राणां प्रवासविप्रलब्धगोपीनां सम्भोगेच्छाभिलक्षिता।

गोपीनां मध्ये श्रीराधिका श्रेष्ठा। यथा पाद्मे—यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा। सर्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा ॥ इति। आदिपुराणे च—त्रैलोक्ये पृथिवी धन्या यत्र वृन्दावनं पुरी। तत्रापि गोपिकाः पार्थ तत्र राधाभिधा मम ॥ इति। अत एव श्रीकृष्णं राधाप्रियमिति तच्छ्लोके कथितम्। राधायाः प्रिय इति राधाप्रियः, राधा प्रिया यस्य स इति वा।

राधारतिः समा नास्ति कुत्रचिद् भुवनत्रये। मदनाख्यमहाभावः कथ्यते सा तु कोविदैः ॥ अयमर्थः। भक्तिरसामृतसिन्धौ भक्तिमार्गे साधनस्य साध्ये परिणतिक्रमो विव्रियते, यथा—आदौ श्रद्धा ततः साधुसङ्गोऽथ भजनक्रिया। ततो ऽनर्थनिवृत्तिः स्यात्ततो निष्ठा रुचिस्ततः। अथासक्तिस्ततो भावस्ततः प्रेमाभ्युदञ्चति ॥ इति। तदुपरि सिद्धावस्थायां प्रेमाद्यूर्ध्वभूमयः नित्यपार्षदानामनुभूयन्ते। ते तु साधकदेहे नानुस्वाद्यन्ते। व्रजदेवीनां भक्तिर्महाभाव उच्यते। यथोक्तमुज्ज्वलनीलमणौ — मुकुन्दमहिषीवृन्दैरप्यसावतिदुर्लभः। व्रजदेव्येकसंवेद्यो महाभावाख्ययोच्यते ॥ महाभावप्रकारणां मध्ये मादनः सर्वथोत्तमः। तत्रैव, सर्वभावोद्गमोल्लासी मादनोऽयं परात्परः। राजते ह्लादिनीसारो राधायामेव यः सदा ॥ अत्रेर्ष्याया अयोग्येऽपि प्रबलेर्ष्याविधायिता। सदा भोगेऽपि तद्गन्धमात्राधारस्तवादयः ॥ इति। आदिशब्दाच्छ्रीकृष्णावलोकनालिङ्गनसंप्रयोगादिसुखानां युगपदेव कोटिशोऽनुभवः। यथा कर्मी जनः कोटिकल्पगतभोग्यानि सुखदुःखानि एकस्यामेव घटिकायां कदाचिद्भुङ्क्ते ॥ इति विश्वनाथचक्रवर्तिचरणाः। तत्र च—योग एव भवेदेष विचित्रः कोऽपि मादनः। यद्विलासा विराजन्ते नित्यलीलाः सहस्रधा ॥ मादनस्य गतिः सुष्ठु मदनस्येव दुर्गमा। न निर्वक्तुं भवेच्छक्या तेनासौ मुनिनाप्यलम् ॥ इति। अत एव श्रीराधिका मादनाख्यमहाभावस्वरूपिण्युक्ता।

श्रीराधायाः प्रेमास्वादकत्वं श्रीचैतन्यदेवावतारस्य गूढहेतुरेव। यथोक्तं श्रीस्वरूपदामोदरचरणैः—श्रीराधायाः प्रणयमहिमा कीदृशो वानयैवास्वाद्यो येनाद्भुतमधुरिमा कीदृशो वा मदीयः। सौख्यं चास्या मदनुभवतः कीदृशं वेति लोभात्तद्भावाढ्यः समजनि शचीगर्भसिन्धौ हरीन्दुः ॥ इति। अपि च श्रीरूपगोस्वामिचरणैः—अपारं कस्यापि प्रणयिजनवृन्दस्य कुतुकी रसस्तोमं हृत्वा मधुरमुपभोक्तुं कमपि यः। रुचं स्वामावव्रे द्युतिमिह तदीयां प्रकटयन्स देवश्चैतन्याकृतिरतितरां नः कृपयतु ॥ इति।

रसिकराजं रसाभिज्ञानां श्रेष्ठम्, श्रीकृष्णस्य रसस्वरूपत्वात्, रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवतीति श्रुतेः, सर्वरसाश्रयत्वाच्च। यथा दशमस्कन्धे—मल्लानामशनिर्नृणां नरवरः स्त्रीणां स्मरो मूर्तिमान्गोपानां स्वजनोऽसतां क्षितिभुजां शास्ता स्वपित्रोः शिशुः। मृत्युर्भोजपतेर्विराडविदुषां तत्त्वं परं योगिनां वृष्णीनां परदेवतेति विदितो

रङ्गं गतः साग्रजः ॥ इति। साग्रजोऽग्रजेन श्रीबलदेवेन सह श्रीकृष्णः। अत एव श्रीकृष्णो रसराज उक्तः।

अनङ्गसारं कामदेवात्सारं परमम्। यद्वा, प्रेमैव गोपरामाणां काम इत्यगमत्प्रथामित्याद्यनुसारेणानङ्गस्य कामस्य तद्विषयकप्रेमविशेषस्य योऽवतारः प्राकट्यं तस्य सारो गर्भो यस्मात्तम्। अलौकिकधीरललितनायकमिति भावः। यथा भक्तिरसामृतसिन्धौ—विदग्धो नवतारुण्यः परिहासविशारदः। निश्चिन्तो धीरललितः स्यात्प्रायः प्रेयसीवशः। गोविन्दे प्रकटं धीरललितत्वं प्रदृश्यते ॥ इति। श्रीकृष्णस्य धीरललितत्वं ललितमाधवगोविन्दलीलामृतादिग्रन्थेषु महानुभावरसिकवरैस्तत्तद्ग्रन्थकारैः सविस्तरं प्रकटीकृतम् ॥4॥

पंचमश्लोकः

पूर्वश्लोकद्वये श्रीकृष्णस्य करस्थितमुरलीं वर्णयित्वाथ पञ्चमषष्ठश्लोकयोः श्रीचैतन्यदेवस्य करद्वयं वर्णयति। प्रथमं दक्षिणहस्तस्थितो यतिदण्डः —

सन्यासधर्मशरणं यतिदण्डहस्तं
शान्तं सुधीरमतिगौरवपारहंसम्।
पाषण्डबौद्धजिनपावनमप्रमेयम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम् ॥5॥

यद्यपि गौडीयसंप्रदाये श्रीचैतन्यदेवः प्रायो गृहस्थरूपेण पूजितोऽस्ति, तन्माधुर्यातिशयात्, तथापि श्रीषड्भुजमूर्तौ स एव श्रीचैतन्यदेवः सन्न्यासिस्वरूपेण पूजित एव, स्वैश्वर्यविशेषात्। श्रीचैतन्यदेवस्य सन्न्यासग्रहणोद्देश्यं द्विविधम्— श्रीहरिनामसङ्कीर्तनेन पतितजनोद्धारार्थं श्रीराधाप्रेमास्वादनार्थञ्च च। कृष्णभक्तिप्रचारसमये स्वशिष्याणां निन्दामालोक्य यदि ते दुर्जना मां प्रणमन्ति देवताप्रतिमां दृष्ट्वा यतिं चैव त्रिदण्डिनम्। नमस्कारं न कुर्याद्यः प्रायश्चित्तीयते नर इतिवचनानुसारेण तदा तत्पापानि क्षयिष्यन्तीति सोऽचिन्तयत्। ततः कण्टकनगरे श्रीकेशवभारतीयतिवरसकाशात्सन्न्यासमन्त्रमगृह्णात्। स तु व्याजेनैव। यथोक्तं श्रीमुरारिगुप्तचरणैः —ततः समीपं स गुरोर्हितार्थी गत्वावदत्कर्णसमीपमीशः। स्वप्ने मया मन्त्रवरो हि लब्धः शृणुष्व तत् किं तव सम्मतं स्यात् ॥ वरत्रयं तच्छ्रवणान्तिकं स प्रोवाच न्यासोक्ततनुं विशुद्धम्। श्रुत्वावदत् सो ऽपि हरेरिदं स्यात् सन्न्यासमन्त्रं परमं पवित्रम् ॥ व्याजेन दीक्षां गुरवे स दत्त्वा लोकैकनाथो गुरुरव्ययात्मा गुरो ददस्वाद्य मनीषितं मे सन्न्यासमित्याह पुटाञ्जलिः प्रभुः ॥ ततः शुभे सङ्क्रमणे रवेः क्षणे कुम्भं प्रयाति मकरान्मनीषी। सन्न्यासमन्त्रं प्रददौ महात्मा श्रीकेशवाख्यो हरये विधानवित् ॥ इति।

तत्र गूढार्थः— स्वविरहेण निजभक्तानां प्रेमवर्धनाय। यथोक्तं श्रीमुरारिगुप्तचरणैः श्रीचैतन्यचरिते - ततः प्रोवाच भगवान् श्रीवासं द्विजपुङ्गवम्। भवतामेव प्रेमार्थे गमिष्यामि

दिगन्तरम् ॥ साधुभिर्नावमारुह्य यथा गत्वा दिगन्तरम्। अर्थमानीय बन्धुभ्यो दीयते तदहं पुनः ॥ दिगन्तरात्समानीय दास्यामि प्रेमसन्ततिम्। यया सर्वसुराराध्यं श्रीकृष्णं परिपश्यसि ॥ इति।

सन्न्यासग्रहणात्पूर्वं श्रीचैतन्यदेवोऽतिविलासवानासीत्, किंतु सन्न्यासग्रहणानन्तरं स सुधीरोऽभवत्। सन्न्यासधर्मशरणं चतुर्थाश्रमीयधर्मस्य शरणं रक्षकम्। संक्षेपेण सन्न्यासधर्मः लघुहारीत उक्तः—अतः परं प्रवक्ष्यामि चतुर्थाश्रममुत्तमम्। श्रद्धया तदनुष्ठाय तिष्ठन्मुच्येत बन्धनात् ॥ एवं वानाश्रमे तिष्ठन्पातयञ्चैव किल्बिषम्। चतुर्थमाश्रमं गच्छेत्संन्यासविधिना द्विजः ॥ दत्त्वा पितृभ्यो देवेभ्यो मानुषेभ्यश्च यत्नतः। दत्त्वा श्राद्धं पितृभ्यश्च मानुषेभ्यस्तथात्मनः ॥ इष्टिं वैश्वानरीं कृत्वा प्राङ्मुखोदङ्मुखोऽपि वा। अग्निं स्वात्मनि संरोप्य मन्त्रवित्प्रव्रजेत्पुनः ॥ ततः प्रभृति पुत्रादौ स्नेहालापादि वर्जयेत्। बन्धूनामभयं दद्यात्सर्वभूताभयं तथा ॥ त्रिदण्डं वैणवं सम्यक्सन्ततं समपर्वकम्। वेष्टितं कृष्णगोवालरज्जुमच्चतुरङ्गुलम् ॥ शौचार्थं मानसार्थञ्च मुनिभिः समुदाहृतम्। कौपीनाच्छादनं वासः कन्थां शीतनिवारिणीम् ॥ पादुके चापि गृह्णीयात्कुर्यान्नान्यस्य संग्रहम्। एतानि तस्य लिङ्गानि यतेः प्रोक्तानि सर्वदा ॥ संगृह्य कृतसंन्यासो गत्वा तीर्थमनुत्तमम्। स्नात्वाचम्य च विधिवद्वस्त्रपूतेन वारिणा ॥ तर्पयित्वा तु देवांश्च मन्त्रवद्भास्करं नमेत्। आत्मनः प्राङ्मुखो मौनी प्राणायामत्रयं चरेत् ॥ गायत्रीञ्च यथाशक्ति जप्त्वा ध्यायेत्परं पदम्। स्थित्यर्थमात्मनो नित्यं भिक्षाटनमथाचरेत् ॥ सायंकाले तु विप्राणां गृहाण्यभ्यवपद्य तु। सम्यग्याचेच्च कवलं दक्षिणेन करेण वै ॥ पात्रे वामकरे स्थाप्य दक्षिणेन तु शेषयेत्। यावतान्नेन तृप्तिः स्यात्तावद् भैक्षं समाचरेत् ॥ ततो निवृत्य तत्पात्रं संस्थाप्यान्यत्र संयमी। चतुर्भिरङ्गुलैश्छाद्य ग्रासमात्रं समाहितः ॥ सर्वव्यञ्जनसंयुक्तं पृथक्पात्रे नियोजयेत्। सूर्यादिभूतदेवेभ्यो दत्त्वा संप्रोक्ष्य वारिणा ॥ भुञ्जीत पात्रपुटके पात्रे वा वाग्यतो यतिः। वटकाश्वत्थपर्णेषु कुम्भीतैन्दुकपात्रके ॥ कोविदारकदम्बेषु न भुञ्जीयात्कदाचन। मलाक्ताः सर्व उच्यन्ते यतयः कांस्यभोजिनः ॥ कांस्यभाण्डेषु यत्पाको गृहस्थस्य तथैव च। कांस्ये भोजयतः सर्वं किल्बिषं प्राप्नुयात्तयोः ॥ भुक्त्वा पात्रे यतिर्नित्यं क्षालयेन्मन्त्रपूर्वकम्। न दूष्यते च तत्पात्रं यज्ञेषु चमसा इव ॥ अथाचम्य निदिध्यास्य उपतिष्ठेत भास्करम्। जपध्यानेतिहासैश्च दिनशेषं नयेद् बुधः ॥ कृतसंध्यस्ततो रात्रिं नयेद्देवगृहादिषु। हृत्पुण्डरीकनिलये ध्यायेदात्मानमव्ययम् ॥ यतिर्धर्मरतिः शान्तः सर्वभूतसमो वशी। प्राप्नोति परमं स्थानं यत्प्राप्य न निवर्तते ॥ इति।

यतिदण्डहस्तं सन्न्यासिनां दण्डो वैणवकाष्ठं हस्ते करे यस्य तम्। यतिदण्डः द्विविधः—श्रीवैष्णवसन्न्यासिनां त्रिदण्डो स्मार्तानामेकदण्डश्च। श्रीचैतन्यदेवो वैष्णवोत्तमः, किंतु केशवभारत्या अद्वैतसंप्रदायस्थितत्वादेकदण्डं स वहति। श्रीमद्भक्तिसिद्धान्त-सरस्वतीप्रभुपादैः प्रतिष्ठितसन्न्यासधर्मोऽभिनवरूपतां धृतवान्। तत्तु त्यागात्मकमपि एकान्तस्मरणप्रधानहरिभजनस्य परिवर्ते श्रीमन्महाप्रभोरभीष्टं दुःखिभ्यः कलिकवलितजीवेभ्यः कृष्णनामवितरणात्मकं प्रेमभक्तिप्रचारणप्रसारणसङ्कीर्तनप्रधानमेव। तेषामुत्तराधिकारिणां सर्वे सन्न्यासिनस्तदादर्शानुसारिणः, तेषां मध्ये केचिदधिकानि केचित्तन्न्यूनानि प्रेमफलानि

वितरन्ति स्म, सर्वाद्भुतसाफल्यं तेषां प्रवराः श्रीमद्भक्तिवेदान्तस्वामिपादाः प्राप्तवन्तः, येषां प्रचेष्टया गौडीयवैष्णवसम्प्रदायः सार्वभौमः संवृत्तः।

शान्तं क्रोधरागादिरहितम्। सुधीरमत्यन्तमनीषिणम्। अति गौरवपारहंसं सुगम्भीरं परमहंसं यतीनां परमम्। यतिभेदाश्चतुर्विधाः — कुटीचको बहूदको हंसः परमहंसश्च। तेषां मध्ये परमहंस उत्तमः।

पाषण्डबौद्धजिनपावनं बौद्धजैनवामाचारतान्त्रिकादिपाषण्डिजनानां पावनमुद्धारकम्। पाषण्डभावात्तेन श्रीचैतन्यदेवेन शुद्धवैष्णवत्वमानीतास्त इत्यर्थः। तत्र श्रीचैतन्यचरितामृतादिग्रन्थेषु दाक्षिणात्यबौद्धाचार्यनवद्वीपवासिजगदानन्दमाधवानन्दादय उदाहरणानि।

अप्रमेयमचिन्त्यम्। यदुक्तम्—वज्रादपि कठोराणि मृदूनि कुसुमादपि। लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ॥ इति। तत्र लघुहरिदासपरिहारो गोपीनाथपट्टनायकरक्षणञ्चोदाहरणे ॥5॥

षष्ठश्लोकः

यद्भावपूर्णहृदयात्स्रवति स्वरागो
गङ्गाम्बुपूरितकमण्डलुकाद्यथैव।
कृष्णेतिमन्त्रमनुकीर्त्य हि सर्वकालम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम्॥6॥

यद्भावपूर्णहृदयाद् यस्य श्रीराधाया मादनाख्यमहाभावपूर्णचित्तात्स्वरागः श्रीचैतन्यदेवादद्वितीयश्रीकृष्णप्रीतिः स्रवत्याविर्भवति। कथं स्रवति? गङ्गाम्बुपूरिताच्छ्रीजाह्नवीदेवीवारिपूर्णात्कमण्डलुकाच्छोभनात्सुकृताद्यतिजलपात्राद्यथैव। सर्वतः स्रवतीत्यर्थः। श्रीचैतन्यदेवस्य भावसाहसात्तच्छरीरेऽपरिदृष्टाः कूर्मादिसात्त्विकभावा आविर्भवन्तीति भावः। यथा भक्तिरसामृतसिन्धौ—कृष्णसम्बन्धिभिः साक्षात्किञ्चिद्वा व्यवधानतः। भावैश्चित्तमिहाक्रान्तं सत्त्वमित्युच्यते बुधैः। सत्त्वादस्मात्समुत्पन्ना ये भावास्ते तु सात्त्विकाः ॥ इति। अपि च—चित्तं सत्त्वीभवत्प्राणे न्यस्यत्यात्मानमुद्भटम्। प्राणस्तु विक्रियां गच्छन्देहं विक्षोभयत्यलम्। तदा स्तम्भादयो भावा भक्तदेहे भवन्त्यमी ॥ ते स्तम्भस्वेदरोमाञ्चाः स्वरभेदो ऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृताः ॥ इति।

पुनः कथं स्रवति? **सर्वकालं** नित्यं सर्वदा **कृष्णेतिमन्त्रं** जगत्प्रसिद्धहरेकृष्णेतिमहामन्त्रमनुकीर्त्य स्वपार्षदैः सह मिलित्वा सङ्कीर्त्य।

हरेर्नाम हरेर्नाम हरेर्नामैव केवलम्। कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ इत्यादिबृहन्नारदीयवचनात्कलियुगे श्रीनामकीर्तनं श्रेष्ठसाधनमेव। यथोक्तम्—नाम चिन्तामणिः कृष्णश्चैतन्यरसविग्रहः। पूर्णः शुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामिनोः ॥ इति। द्वादशस्कन्धे च—कलेर्दोषनिधे राजन्नस्ति ह्येको महान्गुणः। कीर्तनादेव कृष्णस्य

मुक्तसङ्गः परं व्रजेत् ॥ इति। अपि च — कृते यद् ध्यायतो विष्णुं त्रेतायां यजतो मखैः। द्वापरे परिचर्यायाः कलौ तद्धरिकीर्तनात् ॥ प्रभासखण्डे च — मधुरमधुरमेतन्मङ्गलं मङ्गलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपम्। सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत्कृष्णनाम ॥ अपि च षष्ठस्कन्धे स्तेनः सुरापो मित्रधुग् ब्रह्महा गुरुतल्पगः। स्त्रीराजपितृगोहन्ता ये च पातकिनोऽपरे ॥ सर्वेषामप्यघवतामिदमेव सुनिष्कृतम्। नामव्याहरणं विष्णोर्यतस्तद्विषया मतिः ॥ न निष्कृतैरुदितैर्ब्रह्मवादिभिस्तथा विशुद्ध्यत्यघवान्व्रतादिभिः। यथा हरेर्नामपदैरुदाहृतैस्तद् उत्तमश्लोकगुणोपलम्भकम् ॥ इति।

किञ्च, नामनामिनोरभेदेऽपि नामसेवनं श्रेष्ठसाधनम्, नाम्नः कारुण्यविशेषात्। यथा श्रीरूपपादानां श्रीकृष्णनामाष्टके—वाच्यो वाचकमित्युदेति भवतो नाम स्वरापद्वयं चार्वस्मात्परमेव हन्त करुणा तत्रापि जानीमहे। यस्तस्मिन् विहितापराधनिवहः प्राणी समन्ताद्भवेदास्येनेदमुपास्य सोऽपि हि सदानन्दाम्बुधौ मज्जति ॥ इति॥

हरेर्नाममाहात्म्यसागरं तरितुं शक्नोति न कश्चित्। अत्र तस्यैकबिन्दुर्यथाकथञ्चिदुपाहार्यः कतिचिद्बिन्दव उपाहार्याः। बृहन्नारदीये—अच्युतानन्दगोविन्दनामोच्चारणभीषिताः। नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ इति। अन्यत्रैव—नामसङ्कीर्तनं विष्णोः क्षुत्तृट्प्रस्खलितादिषु। करोति सततं विप्रास्तस्य प्रीतो ह्यधोक्षजः ॥ इति। ततश्च दशमस्कन्धे — यन्नाम गृह्णन्नखिलाञ्श्रोतॄनात्मानमेव च। सद्यः पुनाति किं भूयस्तस्य स्पृष्टः पदा हि ते ॥ इति। आदिपुराणे —गीत्वा च मम नामानि विचरेन्मम सन्निधौ। इदं ब्रवीमि ते सत्यं क्रीतोऽहं तस्य चार्जुन ॥ इति। विष्णुधर्मे श्रीप्रह्लादेन—जितं तेन जितं तेन जितं तेनेति निश्चितम्। जिह्वाग्रे वर्तते यस्य हरिरित्यक्षरद्वयम् ॥ इति। विष्णुरहस्ये — एतदेव परं ज्ञानमेतदेव परं तपः। एतदेव परं तत्त्वं वासुदेवस्य कीर्तनम् ॥ इत्यादि।

हरेकृष्णेतिमन्त्रस्य माहात्म्यं कलिसन्तरणश्रुतौ कीर्तितमस्ति—द्वापरान्ते नारदो ब्रह्माणं जगाम कथं भगवन्गां पर्यटन्कलिं सन्तरेयमिति। स होवाच ब्रह्मा साधु पृष्टोऽस्मि सर्वश्रुतिरहस्यं गोप्यं तच्छृणु येन कलिसंसारं तरिष्यसि। भगवत आदिपुरुषस्य नारायणस्य नामोच्चारणमात्रेण।

निर्धूतकलिर्भवतीति ॥ नारदः पप्रच्छ तन्नाम किमिति। स होवाच हिरण्यगर्भः। हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे। हरे राम हरे राम राम राम हरे हरे ॥ इति षोडशकं नाम्नां कलिकल्मषनाशनम्। नातः परतरोपायः सर्ववेदेषु दृश्यते ॥ षोडशकलावृतस्य जीवस्यावरणविनाशनम्। ततः प्रकाशते परं ब्रह्म मेघापाये रविरश्मिमण्डलीवेति ॥ पुनर्नारदः पप्रच्छ भगवन् कोऽस्य विधिरिति। तं होवाच नास्य विधिरिति। सर्वदा शुचिरशुचिर्वा पठन् ब्राह्मणः सलोकतां समीपतां सरूपतां सायुज्यमेति। यदास्य षोडशकस्य सार्धत्रिकोटीर्जपति तदा ब्रह्महत्यां तरति। तरति वीरहत्याम्। स्वर्णस्तेयात्पूतो भवति। वृषलीगमनात्पूतो भवति। पितृदेवमनुष्याणामपकारात्पूतो भवति। सर्वधर्मपरित्यागपापात्सद्यः शुचितामाप्नुयात्सद्यो मुच्यते सद्यो मुच्यते इत्युपनिषत् ॥ इति।

अयमर्थः—अत्र रूपकालङ्कारः। उपमानमेव कमण्डलुः, तन्मध्यस्थितगङ्गोदकं तद्बहिःस्रवश्च, उपमेयानि—भगवतश्चैतन्यदेवस्यान्तर्हृदयम्, तस्मिन्तद्भूतप्रेमभक्तिमयभावश्च, तन्मुखनिर्गलितहरिनामधाराश्च। विवेच्यम्—सिद्धस्य नामसङ्कीर्तनमन्तर्भावोदितो ऽनुभावविशेषः, साधकस्य तदनुकरणं नामसङ्कीर्तनमन्तर्भावोदितो ऽनुभावविशेषः, पूर्णशक्तिमतस्तत्पूर्णशक्तिप्रभावेण भावोद्भावनकारणम्, यथा सनातनगोस्वामिपादैः बृहद्भागवतामृतटीकायामुद्धृतं कस्यचिद्वाक्यम्—सिद्धस्य लक्षणं यत्स्यात्साधनं साधकस्य तदिति। तत्र पुनश्चैतन्यदेवस्य बाह्यतो भगवद्भक्तरूपत्वं दृश्यते, वस्तुतस्तु तस्य नित्यसिद्धराधिकामहाभावस्वरूपत्वेन ह्लादिनीसारसंवलितचिच्छक्तिस्वरूपेण भावेन हरिनामभिः प्रेमधाराभिश्च सर्वाणि जगन्ति प्लावयति ॥6॥

सप्तमश्लोकः

पूर्वश्लोकषट्के श्रीषड्भुजगौराङ्गस्य षट्कस्थितास्त्रादीनि वर्णयित्वाधुना श्लोकद्वयेनैव श्रीषड्भुजस्य स तादृशैः षड्भिर्भुजैः भक्तान् प्रति यां कृपां करोति तामेव कीर्तयितुं प्रवर्तते—

हन्तुं क्षमं सुकरमत्यशनप्रयास-
लौल्यप्रजल्पनियमाग्रहलोकसङ्गान्।
षड्भिर्भुजैरमलभक्तिविनाशकांस्तम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम्॥7॥

यं षड्भिर्भुजैः पूर्ववर्णितरामकृष्णचैतन्यदेवकरैः सुकरमयत्नेनामलभक्तिविनाश-कानुत्तमभक्तेर्विनशनप्रतीकान्प्रतिबन्धकान्हन्तुं क्षमं क्षयाधिकारिणम्, तमर्चामीत्यादि। उत्तमभक्तिः किंभूता? भक्तिरसामृतसिन्धौ — अन्याभिलाषिताशून्यं ज्ञानकर्माद्यनावृतम्। आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा॥ इति। ततश्च नारदपञ्चरात्रे—सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम्। हृषीकेन हृषीकेशसेवनं भक्तिरुच्यते॥ इति।

भक्तिविनाशकाः के? तदुक्तमुपदेशामृते—अत्याहारः प्रयासश्च प्रजल्पो नियमाग्रहः। जनसङ्गश्च लौल्यं च षड्भिर्भक्तिर्विनश्यति॥ इति। षड्भिर्भुजैः श्रीषड्भुजः षड्विनाशकान्हन्ति। अत्र ते भक्तिविनाशकाः श्रीलभक्तिविनोदठाकुरविरचित-भक्त्यालोकानुसारेण व्याख्याताः।

तत्रात्यशनमत्याहारः, आहारेऽसंयमः। भक्तियोगिनामाहारे समवृत्तत्वं निश्चितम् एव—नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नत इति युक्ताहारस्येति च भगवतोक्तत्वात् ततश्चैव विष्णुधर्मोत्तरे — कथञ्चिदपि नाश्नीयादकृत्वा कृष्णपूजनम्। न चासमर्प्य गोविन्दे किञ्चिद्भुञ्जीत वैष्णवः॥ इति। अपि च हयशीर्षपञ्चरात्रे—न त्वेवापूज्य भुञ्जीत भगवन्तं जनार्दनम्। न तत्स्वयं समश्नीयाद् यद्विष्णौ न निवेदयेत्॥ इति।

तत्र भोजननियमाः, कौर्मे—प्राङ्मुखोऽन्नानि भुञ्जीत सूर्याभिमुखमेव वा। आसीनः

स्वासने सिद्धे भूम्यां पादौ निधाय च ॥ आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः। श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतं भुङ्क्ते उदङ्मुखः ॥ पञ्चार्द्रो भोजनं कुर्याद् भूमौ पात्रं निधाय च। उपवासेन तत्तुल्यं मनुराह प्रजापतिः ॥ उपलिप्ते शुचौ देशे पादौ प्रक्षाल्य वै करौ। आचम्यार्द्राननोऽक्रोधः पञ्चार्द्रो भोजनं चरेत् ॥ महाव्याहृतिभिस्त्वन्नं परिवार्योदकेन तु। अमृतोपस्तरणमसीत्युपक्रोशन्क्रियां चरेत् ॥। स्वाहाप्रणवसंयुक्तां प्राणायेत्याहुतिं ततः। अपानाय ततो हुत्वा व्यानाय तदनन्तरम् ॥ उदानाय ततः कुर्यात्समानायेति पञ्चमीम्। विज्ञाय तत्त्वमेतेषां जुहुयादात्मनि द्विजाः ॥ शेषमन्नं यथाकामं भुञ्जीत व्यञ्जनैर्युतम्। ध्यात्वा तन्मनसा देवमात्मानं वै प्रजापतिम् ॥ इति। अमृतापिधानमसीत्युपरिष्टादपः पिबेत् ॥ इति। तत्रैव – यद् भुङ्क्ते वेष्टितशिरा यच्च भुङ्क्ते विदिङ्मुखः। सोपानत्कश्च यद् भुङ्क्ते सर्वं विद्यात्तदासुरम् ॥ नार्धरात्रे न मध्याह्ने नाजीर्णे नार्द्रवस्त्रधृक्। न च भिन्नासनगतो न याने संस्थितोऽपि वा ॥ न भिन्नभाजने चैव न भूम्यां न च पाणिषु। अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम्। अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ इति।

अथ प्रयासो निरर्थकः श्रमः। स द्विविधः, ज्ञानप्रयासः कर्मप्रयासश्च। तत्र ज्ञानप्रयासः, मुण्डकश्रुतौ—नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनुं स्वाम् ॥ इति। भक्तिं विना ज्ञानं नैव सिध्यति। तथा दशमस्कन्धे ब्रह्मोक्तौ—ज्ञाने प्रयासमुदपास्य नमन्त एव जीवन्ति सन्मुखरितां भवदीयवार्ताम्। स्थाने स्थिताः श्रुतिगतां तनुवाङ्मनोभिर्ये प्रायशोऽजित जितोऽप्यसि तैस्त्रिलोक्याम् ॥ इति। उदपास्य ईषदप्यकृत्वा सद्भिर्मुखरितां स्वत एव नित्यं प्रकटितां भवदीयवार्तां स्वस्वस्थान एव स्थितास्तत्सन्निधिमात्रेण स्वत एव श्रुतिगतां श्रवणं प्राप्तां तनुवाङ्मनोभिर्नमन्तः सत्कुर्वन्तो ये जीवन्ति केवलं यद्यपि नान्यत्कुर्वन्ति तैः प्रायशस्त्रिलोक्यामन्यैरजितोऽपि त्वं जितः प्राप्तोऽसीति किं ज्ञानश्रमेणेत्यर्थः। तत्रैव च—श्रेयःस्रुतिं भक्तिमुदस्य ते विभो क्लिश्यन्ति ये केवलबोधलब्धये। तेषामसौ क्लेशल एव शिष्यते नान्यद्यथा स्थूलतुषावघातिनाम् ॥ इति। श्रेयसामभ्युदयापवर्गलक्षणानां स्रुतिः स्रवणं यस्याः सरस इव निर्झराणाम्। तां ते तव भक्तिमुदस्य त्यक्त्वा। श्रेयसां मार्गभूतामिति वा। तेषां क्लेशलः क्लेश एवावशिष्यते। अयं भावः – यथाल्पप्रमाणं धान्यं परित्यज्य ये ऽन्तःकणहीनान्स्थूलधान्याभासांस्तुषानेवावघ्नन्ति तेषां न किञ्चित्फलम्, भवं भक्तिं तुच्छीकृत्य ये केवलबोधाय प्रयतन्ते तेषामपीति। इति श्रीश्रीधरस्वामिचरणाः।

तत्र कर्मप्रयासः, कृष्णबहिर्मुखयोगदानव्रतादिकर्मानुष्ठानम्, यद्वा, महाजनाचारविरुद्धमसद्भक्तिप्रवृत्त्यनुष्ठानम्। यथोक्तं प्रथमस्कन्धे—धर्मः स्वनुष्ठितः पुंसां विष्वक्सेनकथासु यः। नोत्पादयेद्यदि रतिं श्रम एव हि केवलम् ॥ इति। ब्रह्मयामले च—श्रुतिस्मृतिपुराणादिपञ्चरात्रविधिं विना। ऐकान्तिकी हरेर्भक्तिरुत्पातायैव कल्पते ॥ इति।

अथ लौल्यम्, उत्कटलालसा मनसश्चञ्चलत्वञ्च। यथोक्तं भगवद्गीतायां – इन्द्रियाणां

हि चरतां यन्मनो ऽनुविधीयते। तदस्य हरति प्रज्ञां वायुर्नावमिवाम्भसि ॥ इति। अपि च – इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ। तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥ इति। तस्मात्सर्वेन्द्रियाणामेव भगवदर्पणं कर्तव्यम्। यथोक्तं नवमस्कन्धे – स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने। करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ॥ मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम्। घ्राणं च तत्पादसरोजसौरभे श्रीमत्तुलस्या रसनां तदर्पिते ॥ पादौ हरेः क्षेत्रपदानुसर्पणे शिरो हृषीकेशपदाभिवन्दने। कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रया रतिः ॥ इति। श्रुतिं श्रोत्रम्। मुकुन्दलिङ्गालयाः श्रीकृष्णस्य श्रीमूर्तिवन्मन्दिराणि। कामं स्रक्चन्दनादिसेवाम्।

अथ **प्रजल्पः**, अनृतनिन्दितग्राम्यादिकथानां संलापः। यथा द्वादशस्कन्धे – मृषा गिरस्ता ह्यसतीरसत्कथा न कथ्यते यद्भगवानधोक्षजः। तदेव सत्यं तदु हैव मङ्गलं तदेव पुण्यं भगवद्गुणोदयम् ॥ तदेव रम्यं रुचिरं नवं नवं तदेव शश्वन्मनसो महोत्सवम्। तदेव शोकार्णवशोषणं नृणां यदुत्तमः श्लोकयशोऽनुगीयते ॥ इति। तद्धैतुकी वागेव श्रीभगवत्पदारविन्देऽर्पणीया, सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः। नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते ॥ इति भगवद्गीतावचनानुसारेण।

अथ **नियमाग्रहः**, विधिनिषेधानामग्रहस्त्यागः, यद्वा, तदाग्रहणं स्तब्धानुष्ठानम्। ननु, शास्त्रोक्तानामसङ्ख्यानां नियमानां प्रधाना नियमाः कथं ज्ञेयाः? प्रायः श्रीगुर्वाचारदर्शनात्। श्रीहरिभक्तिविलासादिग्रन्थेष्वनादिशौचाहारनिद्रादिनियमा लिखिताः, किन्तु ते सर्वे श्रीकृष्णस्मारणानुकूल्यं सेव्यन्ते ॥ यथोक्तं पाद्मे – स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित्। सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥ इति।

अथ **लोकसङ्गः**, श्रीकृष्णवहिर्मुखजनसंसर्गः। तत्सङ्गादेव तद्वहिर्मुखतैव जायते, सङ्गात्सञ्जायते काम इतिभगवद्गीतावचनात्। तस्मान्महर्षिकात्यायनेनोक्तम् – वरं हुतवहज्वालापञ्जरान्तर्व्यवस्थितिः। न शौरिचिन्ताविमुखजनसंवासवैशसम् ॥ इति। अपि च–असद्भिः सह सङ्गस्तु न कर्तव्यः कदाचन। यस्मात्सर्वार्थहाणिः स्यादधः पातश्च जायते ॥ तस्मादसत्सङ्गस्य संन्यासो वैष्णवाचारलक्षणमित्युक्तं स्वयं श्रीचैतन्यदेवेन। ॥7॥

अष्टमश्लोकः

षट्साधनप्रतीपान्भुजानां तत्प्रतिकर्तृत्वञ्च वर्णयित्वा, इदानीमाशीर्मुखेन उत्साहादिभक्त्यनुकूलगुणान् श्रीषड्भुजस्य तद्दातृत्वञ्च वर्णयति–

उत्साहनिश्चयकुसङ्गनिरासधैर्य-
सद्वृत्तिभक्तिसकलाङ्गविधानवीर्यान्।
तान्बाहुभिर्दयितभक्तगणे दधानम्
अर्चामि षड्भुजमनन्तगुणात्मदेवम्॥8॥

बाहुभिः षट्करैः दयितभक्तगणे निजप्रेष्ठसेवकवृन्दे दधानं स्थापयन्तं, तमर्चयामि। किं स धत्ते? उत्साहादिवीर्यांस्तत्तदनुष्ठानशक्तीः। किमर्थम्? इदं षट्खण्डं धनं श्रीकृष्णभक्तिं साधयति। यदुक्तमुपदेशामृते—उत्साहान्निश्चयाद्धैर्यात्तत्तत्कर्मप्रवर्तनात्। सङ्गत्यागात्सतो वृत्तेः षड्भिर्भक्तिः प्रसिध्यति ॥ इति। श्रीचैतन्यदेवो भक्तिमार्गे सदा स्वभक्तान्प्रति साहाय्यं करोतीति भावः।

अथोत्साहः, श्रवणकीर्तनादिभक्त्यङ्गानुष्ठाने मानसोल्लासः। उत्साहेन विना भजनालस्यमभिनिष्पद्यते। उत्साहमयसाधनं तु शीघ्रमेव सिध्यति। यथोक्तं पातञ्जलयोगदर्शने—तीव्रसंवेगानामासन्नः। इति। अपि च द्वितीयस्कन्धे—अकामः सर्वकामो वा मोक्षकाम उदारधीः। तीव्रेण भक्तियोगेन यजेत पुरुषं परम्॥ इति। अकाम एकान्तभक्तः। उक्तानुक्तसर्वकामो वा। पुरुषं पूर्णं परं निरुपाधिमित्यर्थः। तीव्रेण दृढेन स्वभावत एवानुपघात्येनेति विघ्नानवकाशतोक्ता। कामना तु यदृच्छिकेनापि स्यात्। यथोक्तं महाभारते—भक्तक्षणः क्षणो विष्णोः स्मृतिः सेवा स्ववेश्मनि। स्वभोज्यस्यार्पणं दानं फलमिन्द्रादिदुर्लभम् ॥ इति। तदुक्तं श्रीकर्दमं प्रति श्रीकपिलेन— वै जातु मृषैव स्यात्प्रजाध्यक्ष मदर्हणमिति। अथवा, यत्तत्कामस्तीव्रेणैव यजेत। ततश्च शुद्धशक्तिसम्पादनायैवान्ते पर्यवसिष्यत्यसावित्यभिप्रायेण सविशेषणमुपदिष्टम्। तदनेनैकान्तभक्तेषु मुमुक्षौ वा तद्भक्तियोगस्यैवाभिधेयत्वं किं वक्तव्यम्। अपि तु सर्वकामेष्वपीति तदेव सर्वथापि निर्णीतम्। यद्वा, अकामत्वं भजनीयपरमपुरुषसुखमात्रस्वसुखत्वम्। भक्तिमात्रकामत्वे व्याख्याते धर्मपुरुषार्थिन्यतिव्याप्तिः स्यात्। तीव्रेण सर्वेषु साध्येषु परमसाधकत्वेन। इति श्रीजीवगोस्वामिचरणाः।

अथ निश्चयः, आस्तिक्यबुद्धिर्भजनभाविसाफल्यविश्वासः। यथोक्तं श्रीकृष्णदासकविराजपादैः—समाप्तं सर्वकृत्यं मे श्रीकृष्णे पूजिते मया। तद्भक्तिपूर्णविश्वासः श्रद्धेति कथ्यते बुधैः ॥ इति। भक्तिं विना न किंचित्सिध्यति, किन्तु शुद्धभक्तिः सर्वाणि वर्णाश्रमादिकर्माणि साधयति। यथोक्तं पाद्मे—मत्कर्म कुर्वतां पुंसां क्रियालोपो भवेद्यदि। तेषां कर्माणि कुर्वन्ति तिस्रः कोट्यो महर्षयः ॥ इति। अपि च बृहन्नारदीये—संसारेऽस्मिन्महाघोरे मोहनिद्रासमाकुले। ये हरिं शरणं यान्ति ते कृतार्था न संशयः ॥ इति।

अथ कुसङ्गनिरासः, असत्सङ्गत्यागः। असत्सङ्गः सप्तधा—अद्वैतवादिनः, नास्तिकाश्च, विषयिणः, विषयसङ्गासक्ताः, स्त्रियः स्त्रीणां पक्षे पुमांसो वा, स्त्रीसङ्गासक्ताः, कपटधर्मिणः, दुराचारिणोऽन्त्यजाश्च। सर्वे ते सर्वदा परिवर्जनीयाः। ननु, सांप्रतकालेऽसत्सङ्गत्यागोऽशक्योऽस्ति, व्यवहारजीवनेऽवश्यमनेकासज्जनसङ्गमादिति चेन्, न। सङ्गमः सङ्गो नास्ति। सङ्गस्य लक्षणमुपदेशामृत उक्तम्—ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति। भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ इति। सङ्गो प्रीतिसंवलितसंगमः।

अथ धैर्यम्, सुखदुःखयोः समत्वमात्मसंयमश्च। तदुक्तं तत्रैव – वाचो वेगं मनसः क्रोधवेगं जिह्वावेगमुदरोपस्थवेगम्। एतान्वेगान्यो विषहेत धीरः सर्वामपीमां पृथिवीं स शिष्यात् ॥ इति। केवलं धीरपुरुषं शान्तम् एव तत्कामविहीनत्वात्। अपि च धैर्यं

क्षमा। यथोक्तं पाताञ्जलयोगदर्शने ऽभ्यासप्रसङ्गे – स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः। इति। प्रायोऽल्पकाले सिद्धिं न कश्चन प्राप्नोति किन्त्वसंशयं भक्तभक्तिभगवत्कृपयैकदा प्राप्स्यति। तन्निष्ठाऽवन्तिकब्राह्मणेन दर्शितैकादशस्कन्धे–एतां स आस्थाय परात्मनिष्ठामध्यासितां पूर्वतमैर्महद्भिः। अहं तरिष्यामि दुरन्तपारं तमो मुकुन्दाङ्घ्रिनिषेवयैव ॥ इति। परमात्मनिष्ठां देहदैहिकाभिमानेभ्यः परं शुद्धो य आत्मा जीवस्तस्य निष्ठां विचारितलक्षणं स्वरूपं केवलमास्थायेति परमात्मनिष्ठायामस्यां मम आ ईशात्स्थितमात्रमेव तमः संसारं तु सेवयैव तरिष्यामि न त्वन्यथेत्यर्थः एवकाराल्लभ्यते। ननु तर्हि परमात्मनिष्ठायां स्थितिमात्रमपि किं करोषि तत्राह–पूर्वतमैः प्राचीनैरध्यासितामिति। इति श्रीविश्वनाथचक्रवर्तिचरणाः।

अथ सद्वृत्तिः, महाजनोदाहृतसदाचारः। यदुक्तं हरिभक्तिविलासे – न किञ्चित् कस्यचित्सिध्येत्सदाचारं विना यतः। तस्मादवश्यं सर्वत्र सदाचारो ह्यपेक्ष्यते ॥ इति। सदाचारस्य लक्षणमुक्तं विष्णुपुराणे – सदाचारवता पुंसा जितौ लोकावुभावपि। साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः। तेषामाचरणं यत्तु सदाचारः स उच्यते ॥ इति। अपि च महाभारते – तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नासावृषिर्यस्य मतं न भिन्नम्। धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः। इति। तद्धेतोः सदाचारः स्वसाम्प्रदायिकशिष्टमहाजनेभ्यः शिक्षितव्यः।

अथ भक्तिसकलाङ्गविधानम्, हरिभक्तिविलासादिग्रन्थेषु साधनभक्तेर्यथाशक्तिविधिसेवनम्। चतुःषष्टीनि प्रधानान्यङ्गान्युक्तान्युदाहृतानि च भक्तिरसामृतसिन्धौ। तेषां मध्य इदं दशकं प्रारम्भिकम् – गुरुपादाश्रयस्तस्मात्कृष्णदीक्षादिशिक्षणम्। विश्रम्भेण गुरोः सेवा साधुवर्त्मानुवर्तनम् ॥ सद्धर्मपृच्छा भोगादित्यागः कृष्णस्य हेतवे। निवासो द्वारकादौ च गङ्गादेरपि सन्निधौ ॥ व्यवहारेषु सर्वेषु यावदर्थानुवर्तिता। हरिवासरसम्मानो धात्र्यश्वत्थादिगौरवम् ॥ इति। इदं पञ्चकं निखिलश्रैष्ठ्यम् – श्रद्धा विशेषतः प्रीतिः श्रीमूर्तेरङ्घ्रिसेवने। श्रीमद्भागवतार्थानामास्वादो रसिकैः सह ॥ सजातीयाशये स्निग्धः साधौ सङ्गः स्वतो वरे। नामसङ्कीर्तनं श्रीमन्मथुरामण्डले स्थितिः ॥ इति ॥8॥

श्रुतिफलम्

अथाष्टकस्यान्ते श्रुतिफलमाह–

श्रीजड्भुजाष्टकमिदं पठति प्रभाते
यो गौरवेण लिखितं भृगुदासकेन।
शीघ्रं स कृष्णरतिरूपमलभ्यरत्नं
श्रीगौरचन्द्रकृपयैव तदाभ्युपैति ॥9॥

यः किश्चित्प्रभातेऽरुणकाले गौरवेणादरेणेदं भृगुदासकेन फिन्लन्ददेशीयहेल्सिन्किनगरनिवासिना नफ़्तालिब्रूपौत्रेण रोगेर्ब्रूपुत्रेण मोन्त्ब्रूनामकेन भृगुपादाख्येन

कनिष्ठकृष्णदासेन लिखितं श्रीषड्भुजाष्टकमेकान्तं सङ्घशो वा पठति कीर्तयति, स तदा शीघ्रं त्वरितं कृष्णरतिरूपं श्रीव्रजेन्द्रनन्दनप्रेमभक्त्याकृतिमलभ्यरत्नं दुष्प्रापचिन्तामणिमभ्युपैति प्राप्नोति।

ननु, तत्फलानुपपत्तिः स्यात्, ग्रन्थकारस्याशीर्वादानधिकारित्वादिति चेन्, न। तत्फलं पाठकेन प्राप्तं श्रीगौरचन्द्रकृपयैव केवलं गौरवर्णस्य श्रीचैतन्यदेवस्य कारुण्येन, न ग्रन्थकाराधिकारित्वात्। ग्रन्थकारो ग्रन्थस्य निमित्तमात्रम् एव। तत्पठनस्य साधुफलमसाधुफलं वा निमित्तकारणे नास्ति। मधु माध्वीकरोति मधुकरेण विनापि वै। श्रीचैतन्यदेवः कारुण्यसिन्धुरेवेति भावः। अत एव सर्वं सुसिद्धम्। श्रीश्रीषड्भुजार्पणमस्तु ॥9॥

अग्न्यक्षिबाणगौराब्दे कल्याणे पूर्णिमादिने।
ज्यैष्ठेऽयं भृगुदासेन ग्रन्थो नीतोऽस्ति पूर्णताम् ॥

It was the year 1999 when the writer of these lines was planning a visit to Poland to attend the International Conference on Sanskrit and Related Studies at the University of Warsaw. He spoke about it to his pupil Shri Vishwa Nath Sharma who had earlier visited a number of countries in Europe in connection with his professional work. He told him to contact one Rucinski who is a great lover of Sanskrit and whom he had met during his visit to Poland. Accordingly the writer of these lines contacted him (Rucinski) who came to see him in his hotel in Warsaw along with his son and daughter. Of these it was the son, the young Filip who could speak in Sanskrit though not having had the opportunity of visiting India and studying the language from any teacher, as a matter of fact, not having had any formal education at all. He had learnt it by self-study through the books that his father Tomash Rucinski had brought from India when he had been on a visit there earlier. The young Filip Rucinski has grown into an adult now and has taken up the pursuit of Sanskrit as a mission. He comes from a family, the first of its kind not only of Poland but perhaps the whole of Europe, where every member is engaged in pursuit of Sanskrit; the father, Tomash Rucinski, who though not a scholar of Sanskrit is in deep love with it; the mother, Anna Rucinska, who has studied Sanskrit in depth; the younger brother Skarbimir Rucinski who has passed the Shastri examination from the Sampurnanand Sanskrit University, Varanasi and is now pursuing the course for the Acharya degree at the same University; the sister Anna Kandel who though not having had any formal education in Sanskrit is quite fluent in it and he himself with his impeccable credentials in Sanskrit. He took to Sanskrit in Poland itself through self-study initially. Later in 2002 he managed to come to India to join the Sampurnanand Sanskrit University at Varanasi from where he passed the Shastri examination, went back to Poland to do Masters in Sanskrit from the Warsaw University's Oriental Institute and after doing that is enrolled there itself for his Ph. D. programme. Giving himself the Indian name Shivananda, he is writing a treatise on the Ṣaṭtriṁśat Tattvas in Sanskrit, a few pages from which he has sent him. Those are being reproduced below by way of specimen. It may also be mentioned in passing, that the mother of Filip Rucinski who was in India the time the writer of these lines was visiting Poland in 1999 had started learning Sanskrit along with her younger son in Varanasi. She of the name of Anna Rucinska joined the Sanskrit University there and has now produced a thesis in

Sanskrit of some six hundred pages. For the present the writer of these lines would like to confine himself to the exposition of the Ṣaṭtriṁśat Tattvas by Filip Rucinski.

ओं परमात्मने नमः। ओं शिवाय नमः।

षट्त्रिंशत्तत्त्वविमर्शोद्यमः

नत्वा गुरूंश्शुद्धविद्यान्पितरौ च धियो निधी।
धीञ्च देवीं वाचश्शक्तिं गुरुमुखाद्विनिर्गताम्॥
दानापदानाच्छब्दानां शोधयामि शनैः शनैः
सर्वतत्त्वानि संधाय तत्त्वैक्यं संस्फुरेद्यतः॥
स्वसंवित्तेरनुमानात्तथा शास्त्रप्रमाणकैः।
विमृश्येत षट्त्रिंशत्तत्त्वानां संबन्धस्ततः॥

अथ शिवानन्दस्य षट्त्रिंशत्तत्त्वविमर्शोद्यमः

अथ शुद्धोऽध्वा निरूप्यते।

अथ परमशिवः स्वतन्त्रो महासामान्यकल्पः, तस्मिन् को भेदः कथं वैनं वाग्ग्राहयितुं समर्था? भेदग्राहकं हि ज्ञानम् शब्दस्वरूपम्। तत्त्वप्रतिपादनं च शरीरे न त्वात्मनि परमशिवस्योपपद्यते, अवाङ्मनसगोचरत्वात्तस्य परमशिवस्योक्तत्वात्। स च न कस्यापि भेदविषयः, स्वातन्त्र्यात्मकत्वात्। कतिपयकतिपयभेदानुगतं तत्त्वमुक्तं श्रीमदभिनवगुप्तेन। स्वातन्त्र्यादप्यनन्ता अनन्तभेदोपपन्नाः शक्तयः परमशिवस्य। उद्भाव्यमानो भेदो वाभेदो वा सृष्टिसंहाररूपा शक्तिः। सर्वासु शक्तिषु मुख्ये द्वे ययोर्मध्यात्सर्वमुन्मील्यते निमील्यते च। ते च शिवशक्ती चिदानन्दस्वरूपे अद्वयं परमतत्त्वम्। द्वितीयस्य विहीनस्यैकतरो न प्रकाशते न स्पन्दते वा इत्यद्वयमस्मिन्मतेऽवबुध्यते न तु यथा वेदान्तदर्शने जीवात्मब्रह्मणोरैक्यं तत्रापि द्वैतस्य प्रसंगात्। शैवमते शिवः शक्तिः पुनरपि शक्तिः शिव इत्यद्वयम्। तथा चोत्तरोत्तरतत्त्वस्य कारणत्वेऽप्यधोऽधस्तत्त्वस्य च कार्यत्वेऽपि ये के भावा उद्भाव्यन्ते तेषु तेष्वन्यतत्त्वान्यपि व्यक्ताव्यक्तानि शक्तिरूपेण तिष्ठन्ति, सर्वं सर्वमयमित्युक्त्या।

अद्वयपरमशिवस्य स्वातन्त्र्याच्चिच्छक्तिः शिवतत्त्वम्। चिदिति प्रकाशः। स्वतन्त्रचितेरानन्दः शक्तितत्त्वम्। स्पन्द उल्लासो विमर्शः स्वात्मानुभूतिश्चितश्चमत्कार

इत्यानन्दः। स्वतन्त्रचिदानन्दस्येच्छाशक्तिः सदाशिवतत्त्वम्। इच्छाशक्तौ द्वे शक्ती गर्भीभूते—ज्ञानं क्रिया च, ज्ञानक्रिययोः साम्यादिच्छायाम्। न हि शिवेनाचेतितस्य वस्तुनोऽस्ति कदाचित् कुत्रचित्सत्ता, समष्टिचेतनभावचैतन्यस्य ज्ञानक्रियास्वातन्त्र्यरूपत्वात्। ज्ञानक्रिययोश्चाविनाभावः। व्यवहारेऽपि न ह्यस्ति कश्चिज्ज्ञानगम्यो भावो, ज्ञानं वा यत्र क्रिया न विद्यते। न चास्ति कुत्रचित्क्रिया यत्र ज्ञानं न विद्यते तत्प्रवृत्त्यनारम्भादिति सिद्धं ज्ञानक्रिययोरविनाभाव, इच्छायाम् अनयोश्च साम्यम्। इच्छाशक्तिश्च निरिदन्ताहं-भावजननी। अतः अहमिति स्थितौ विषयो न प्रकाशते, अप्रकाशनं हि विषयप्रकाशनाय प्रथमोद्वेगः कामश्चेतनस्य बीजम्। तेनाहं विषयरूपं गृह्णातीदमहमिति। तज्ज्ञानशक्तिरीश्वरः। स च ईश्वरः यथेप्सितं विषयं अहंभावनया ईष्टे। तस्य ज्ञानशक्तेः क्रियाशक्तिरनन्तः शुद्धविद्यापरपर्यायः यत्राहं च इदं च समानौ पूर्णतया प्रकाशेते। व्यवहारेऽप्यहंतेदंतासंतुलिते तृतीयस्योत्पत्तिरूपा क्रिया जायते।

देशस्य कालस्य चानन्तभेदव्यापारशक्तिः क्रियाशक्तिः। देशकालौ कञ्चुकवर्गे निरूपयिष्येते, अत्र तु या क्रियोक्ता सा शक्तिमात्रम्, कालश्च देशश्च व्यक्तसृष्टिपरम्परायामाविर्भवतः। कालशक्तिस्तु स्पन्दो नित्यनादः शक्तितत्त्वात्मकः। देशशक्तिस्तु प्रकाशः सर्वव्यापी बिंदुः शिवत्वात्मकः। साधितश्च स्पन्दप्रकाशयोः देशकालयोश्चाभेदः पाश्चात्यवैज्ञानिकैः। शिवशक्त्योरभेदः पूर्वमेव सिद्धः। शुद्धविद्यात्मिका क्रियाशक्तिश्चानन्त्यकारिणी ज्ञानशक्तेरुद्भूयते। ज्ञानशक्तिरीश्वरात्मिका इच्छाशक्तेश्च। इच्छाशक्तिः सदाशिवात्मिका अद्वय्यां महासत्तायामाश्रिता। एताभिः पञ्चभिश्शक्तिभिः स्वातन्त्र्यं सिद्धं भवति। एष एवागमेषु प्रसिद्धः पञ्चमुखः शिवः। यच्च किञ्चित्क्वचिद्वस्तु व्यक्ताव्यक्तं दृष्टादृष्टं शिवमुखेभ्यश्चर्च्यते।

या एता चिदानन्देच्छाज्ञानक्रियाः पञ्च शक्तयः पञ्चमुखं शिव-शक्ति-सदाशिवेश्वर-शुद्धविद्यारूपं तत्त्वपञ्चकं परमशिवस्य। तदयं शुद्धोऽध्वा। तच्च वेदान्तदर्शने ब्रह्म इत्युच्यते। अस्मिन्दर्शने एषा महामाया परमशिवस्य महिमा।

अथ शुद्धाशुद्धोऽध्वा निरूप्यते।

अथ स परमशिवः स्वतन्त्रोऽपि स्वस्वातन्त्र्यात्पञ्चशक्तिप्रपञ्चनार्थं महामायया स्वस्वरूपं पिधायाणुरूपं गृह्णाति। स्वल्पत्वात्प्राणनादत्वाच्च संकोचमात्रः अणुरित्युच्यते। संकुचितदृष्ट्या मलम् एव अणुः। विशालदृष्ट्या आणवमलं नास्त्येव, महामायाया अभेदात्, मलमज्ञानमिच्छन्तीत्यागमाच्चाज्ञानं संकुचितज्ञानमिति। तत्र मलेऽहं नाहमिति संकीर्णाद्भेदोऽस्ति। तद्द्वित्वरूपैव माया। मिनोति ह वै सर्वाणि भूतानि देशकालपरिच्छिन्नरूपाणि विधत्ते माया। स्वमायासीमित इव परमशिवः पुरुषो भवति। तस्य सीमान उक्तपञ्चशक्तयः परमशिवस्य विपरीतक्रमेण कञ्चुकरूपा भवन्तीत्युच्यन्ते। विपरीतक्रमः सृष्टिक्रमः प्रतिबिम्बनवत्। विपरीतत्वाद् द्वित्वभावः, सर्वं विपरीतं प्रतिभाति। ता अपि शक्तयो विशेषणकर्त्र्यः अनन्तभेदविशेषसंपन्ना शुद्धविद्याशक्तिः कलातत्त्वं, किंचित्कर्तृत्वरूपम्। कलयति गणयति ध्वन्यत इत्याद्यर्थत्वात्किञ्चिन्मात्रता कला। ईश्वरस्य

ज्ञानशक्तेरपूर्णतारूपं किञ्चिज्ज्ञत्वमशुद्धविद्यातत्त्वम्। तया विद्यया पुरुषे पुर्यष्टकावच्छिन्नात्मानं विविनक्ति। सदाशिवस्य पूर्णेच्छाशक्तेरपूर्णम्मन्यता किंचिदिच्छैव रागः। तत्र वैराग्यमपि राग उक्तोऽभिनवगुप्तेन धर्मादिविषयत्वात्। त्रिषु कञ्चुकेषु कर्तृकार्ययोर्ज्ञातृज्ञेययोर्विभेदा अन्तरालाः विच्छेदाः कालतश्च देशतश्च, कालेन देशे चेच्छादेः सिद्धिदर्शनात्। नित्यस्य शक्तितत्त्वरूपस्य स्पन्दस्य विभेदः कालतत्त्वम्। सर्वव्यापिनश्चित्प्रकाशस्य नियतिर्व्यवच्छेदो किञ्चिद्व्यापकत्वं नियतितत्त्वम्। तथा च प्रकृतिजन्यकार्यकारणभावनियतिदर्शनान्न सर्वं सर्वस्मात्संभाव्यत इति पुण्यपापफलानि तदनुकूला विधिनिषेधाः कल्प्यन्ते पुरुषैः।

उत्तरतत्त्वानां कारणभावो मायाधीननियतिशक्तेः सृष्टौ संभवति, तन्नास्ति सृष्टिपूर्वायामक्रमरूपायां परमस्थितौ शुद्धाध्वनि। कञ्चुकवर्गेऽपि नास्ति क्रमविशेषः कश्चिज्जानन्निच्छति कश्चिदिच्छञ्जानाति करोति वा। अतः तत्त्वानां प्रतिपादनक्रमः न तूत्पत्तेः। कञ्चुकवर्गश्च जीवस्योत्पत्तेः पूर्वमेव प्रतिपद्यते, ततः जीवो पशुकञ्चुकपाशेन बद्धः सर्वव्यापकत्वामृतत्वपूर्णज्ञानत्वपूर्णकर्तृत्वं पूर्णेच्छापूर्तिं च प्राप्तुमसमर्थः। कथमेतत्? मलप्रभावादित्युच्यते। संकुचितप्रथारूपं पौरुषं हेयोपादेयाविवेकरूपं बौद्धं चाज्ञानं मायीयमलम् उक्तम्। मायीयमलस्वरूपषट्कञ्चुकोपपन्नं परमशिवचैतन्यं पुरुषो भवति।

अथ अशुद्धोऽध्वा निरूप्यते।

मायाया द्वित्वत्वाच्चिदचिन्मात्रः पुरुषः। परमशिवस्य प्रकाशांशश्चिदंशः। अचिदंशः प्रकृतिः। अत्राचिदनुदरा स्त्रीति न्यायान्नात्यन्ततः चितोऽभावः, चिदचित्संमिश्रः मायाया आरभ्य सर्वेषु तत्त्वेषु सामान्यत्वाच्चितः सर्वव्यापकत्वाच्च। त्रिगुणमया प्रकृतिर्यद्वत्सांख्ये। सा प्रत्येकपुरुषस्य तत्तत्कञ्चुकसाहाय्येन दर्पणकार्यं करोति येन पुरुषः स्वसीमितानि रूपाण्यनुभवति। पुरुषस्य प्रकाशः षट्कञ्चुकमयप्रकाशसंमिश्रः, तस्य प्रतिबिम्बनकार्यव्यापारा प्रकृतेः सात्त्विका क्रिया बुद्धिः। पूर्वमेव बुद्धौ प्रेरणात्मकाः प्रतिबिम्बिता रागः विद्या च क्रिया च। पुरुषस्य विविक्तस्य बहिर्विषयस्य च बुद्धिप्रतिबिम्बितः प्रकाशः विद्यया गृह्यते न तु बुद्ध्या, गुणात्मकत्वात् चिन्न्यूनत्वाच्च बुद्धेः। देशकालस्यापि प्रतिबिम्बितस्य न कुत्रचिद् बहिः स्थितिः। अपि तु प्रतिबिम्बनव्यापाररूपे प्राणे। प्राणश्च बुद्धौ प्रतिष्ठित इत्युक्तमभिनवगुप्तेन। प्रत्येकबुद्धिश्च स्पन्दशक्त्यात्मकसंविदो विस्तारः। अत एव प्रत्येकमातुर्बाल्ययौवनवार्धक्ये च कालादेर्भिन्नानुभवः। कञ्चुकाभावे न किञ्चिज्ज्ञेयं मनइन्द्रियगोचरं भवति किल। कञ्चुकोद्गतं ज्ञानं भेदज्ञानमज्ञानमित्युच्यते। तद्बन्ध इत्यप्युच्यते। बन्धेन हीनो न ज्ञानं विद्यते क्वचित्।

बहिःप्रसृता बुद्धिः मनःकर्मेन्द्रियज्ञानेन्द्रियसहिता विषयप्रकाशं प्रतिबिम्बयति चेत्तदा तत्प्रकाशः पुरुषप्रकाशेन संमिश्रात्तयोरभेदग्रहणादहं करोम्यहं जानामीत्यनुभवोऽहंकारः। स प्रकृतेः सात्त्विकराजसी क्रिया। यदा पुनः पुरुषस्य प्रकाशो विषयगतप्रकाशेभ्यो विविच्यते, एष पुरुषप्रकाशस्तच्च विषयप्रकाश इति तदा सा बुद्धिर्विवेकबुद्धिः हेयोपादेयविवेचनकौशलम्। बौद्धिकेऽज्ञानेऽपगते शुद्धदेशेऽयमहंकारः शिवात्मैक्यमननक्षमः।

Miscellaneous

The University of Oxford is one of the most well-known of the Universities of the world. It has a long tradition of Sanskrit scholarship. It has in it an Indian Institute. The money for the construction of its building was provided in the main by the Indians, which was opened formally by the Prince of Wales in 1886. There are two verses in Sanskrit that are engraved on its entry-gate the second of which expresses the good wishes for the promotion of the study of Indology, the Āryavidyā as it calls it, and the strengthening of the Indo-British ties. The verse under reference is :

ईशानुकम्पया नित्यमार्यविद्या महीयताम्।
आर्यावर्ताङ्ग्लभूम्योश्च मिथो मैत्री विवर्धताम्॥

As time passed by, the authorities of the University of Oxford ordered the shifting of the Department of Sanskrit from the very building that had been set up for promoting Indian studies. The space vacated by it they allotted to the Accounts Department. This was a big shock to T. Burrow, the then Boden Professor of Sanskrit, who expressed his sorrow and anguish in the following verses of which the last one comparing the situation with the dismal looking Ayodhyā with Rāma out of it in exile is sure to touch a special chord with Indian readers :

ततः षष्टितमे वर्षे दुर्णयग्रस्तबुद्धिभिः।
विद्यालयमहामात्रैरार्यधर्मपराङ्मुखैः॥
सरस्वतीं लघूकृत्य पाण्डित्यमवमान्य च।
तयोर्भूम्योस्तिरस्कृत्य मैत्रीमनर्थिकामिव॥
कायस्थराक्षसानां च परस्वादानगृद्धिनाम्।
गणकानां च हस्तेषु प्रापिता स्वार्थसिद्धये॥
विद्याविहीना शालैषा परैर्नीता पराभवम्।
अयोध्या प्रोषिते रामे नष्टश्रीरिव शोचति॥

Conclusion

The Sanskrit writings of European scholars as reproduced above, show that they have the potential of contributing to writing

in original in Sanskrit. They have in-depth understanding of the Sanskrit language and its diction which they have analysed and interpreted minutely. If only they had practised writing in Sanskrit more vigorously, they would have enriched Sanskrit literature with a large number of their valuable writings.

❑❑❑

Index

S

T

U

V

W

Y

Addendum

Töttösi Csaba, the pioneer of Sanskrit studies in Hungary, was conferred in 2010 the prestigious President of India Certificate of Honour in Sanskrit. In acknowledgement of greetings of Radhavallabh Tripathi, Vice-Chancellor, Rashtriya Sanskrit Sansthan, New Delhi, he wrote to him a letter in Sanskrit that had appeared in the *Saṁskṛta vārtā*, the Newsletter of the said Sansthan in its issue of April-June, 2011 from where it is being reproduced below :

"स्वस्ति। बुदपेष्टपुरवासी तोत्तोशिनामकः श्रीमतः संस्कृताद्यनेकविद्याविनयराजमानाञ्छ्रीत्रिपाठिराधावल्लभाख्यान् विज्ञापयति यद् भवल्लिखितपत्रगतकल्याणवचनेन परमनुगृहीता वयम्। 1956 ख्रिस्ताब्दे गीर्वाणभाषाध्यापनं हङ्गेरिदेशे प्रतिष्ठाप्य षट्चत्वारिंशत्संवत्सरा अस्माभिः संस्कृतव्याकरणकाव्येतिहासाद्युपदेशेन परिगमिताः। भारतदेशजशिष्टादिष्टविद्या अस्मच्छिष्यैः स्वधीता इति परितुष्टाः स्मः। शमिह भावत्कं भव्यमनुदिनमेधमानमाशास्महे।

2011 ख्रिस्ताब्दे पञ्चममासस्य सप्तदशे वासरे।"

Born on 29th September 1930, **Prof. Satya Vrat Shastri** had his early education under his father, Prof. Charu Deva Shastri. He was consistently top rank holder up to Post-Graduation and won University Medals. After doing his Ph. D. at the Banaras Hindu University he joined the University of Delhi where during the forty years of his teaching career he held important positions of the Head of the Department of Sanskrit and Dean of the Faculty of Arts. He was also the Vice-Chancellor of Shri Jagannath Sanskrit University, Puri, Orissa. He is the first recipient of the Jnanpith Award in Sanskrit, 2009 and the Padma Bhushan Award, 2010.

He has the distinction of having been Visiting Professor in five Universities on three Continents. Among his many foreign students the most prominent is Her Royal Highness Maha Chakri Sirindhorn, the Princess of Thailand. He has attended and chaired a number of national and international conferences and seminars and delivered more than a hundred lectures in Universities and institutions of higher learning in Europe, North America, Southeast Asia and the Far East.

Both a creative writer and a literary critic, Prof. Satya Vrat Shastri has to his credit three Sanskrit Mahākāvyas of about a thousand stanzas each, a Prabandhakāvya, a Patrakāvya (in two volumes) and three Khaṇḍakāvyas. The well-acclaimed critical work, *The Rāmāyaṇa-A Linguistic* Study which is the first ever linguistic appraisal of not only the Vālmīki-*Rāmāyaṇa* but of any extant Sanskrit work, *Kālidāsa Studies* in two volumes, two studies on Thailand, *Sanskrit and Indian Culture in Thailand* and *Thaideśa ke Brāhmaṇa, Discovery of Sanskrit Treasures* (in seven volumes), *Sanskrit Studies–New Perspectives* and more than a century and a half of research articles and Forewords to more than a hundred and twenty five books are his contributions as a critic. He is the subject matter of nineteen theses for the degrees of M.Phil., Ph.D. and D.Litt. in Indian Universities.

He is the recipient of seventy honours and awards, national and international, including Padma Shri, Padma Bhushan, President of India Certificate of Honour, Thai Royal Decoration "The Most Admirable Order of Direk Gunabhorn", the Honour "Autorita Academische Italiano Straniere", the Civil and Academic Authority for Foreigners from the Govt. of Italy, the Medallion of Honour from the Catholic University, Leuven, Belgium, the Golden Prize from CESMEO, the International Institute of Advanced Asian Studies, Torino, Italy and five Honorary Doctorates from Indian and foreign Universities. He has recently been elected Fellow of the Academia Studi Mediterrani, the Academy of Mediterranean Studies, Aggrigento, Italy.

In the Citation for the Honorary Doctorate at the Silpakorn University, Bangkok, he was described as "a living legend in the field of Sanskrit."

ISBN : 978-81-910948-3-1





VIJAYA BOOKS
DELHI